ISSN 2277-4165

# JOURNAL OF THE DEPARTMENT OF SANSKRIT

(PEER-REVIEWED ANNUAL RESEARCH JOURNAL)

Vol. XXVI-XXVII (Combined)
2020-2021, 2021-2022

RABINDRA BHARATI UNIVERSITY
KOLKATA
November, 2025

ISSN 2277-4165

# JOURNAL
# OF
# THE DEPARTMENT OF
# SANSKRIT

**(PEER-REVIEWED ANNUAL RESEARCH JOURNAL)**

**Vol. XXVI-XXVII (Combined)**
**2020-2021, 2021-2022**

**RABINDRA BHARATI UNIVERSITY**
**KOLKATA**
**November, 2025**

Journal of the Department of Sanskrit
Rabindra Bharati University
Vol. XXVI-XXVII (Combined)
2020-2021, 2021-2022

ISSN 2277-4165

© Rabindra Bharati University

Published : November, 2025

*Published by*
The Registrar
Rabindra Bharati University,
56A, B. T. Road, Kolkata-700 050.

Printed by
The Saraswati Printing Works
2 Guruprosad Chowdhury Lane,
Kolkata-700 006

Price : ₹ 500.00/-

# Editorial

By God's grace we are going to bring out present combined volume (XXVI-XXVII) of 2020-2021 and 2021-2022. In fact, we are falling behind in the publication of our annual departmental journal. Now we strive to recover the journal's annual status by publishing a combined volume in its sedulous journey.

The focal aim of our journal is to publish articles exclusively on Sanskritic studies and to foster a vibrant and dynamic community of Sanskritic scholarship. Like previous volumes this one also contributes some original thoughts on our study. We aim to provide a platform for rigorous research that explores the original ideas encompassing diverse fields such as Veda, Grammar, Philosophy, Literature etc. We encourage innovative articles that provide a deeper understanding of intellectual and cultural heritage of India.

This volume is full of young scholars' contribution. Congratulation to these almost budding ones of letters! The number of articles in this volume is eleven in all. The subjects dealt with here are like this - two on Upanisadic thoughts, four on Grammatical literature. Apart from these four ones are on Purāṇic literature, Epic literature, Dramaturgical deliberation and contribution of a rare personality. The eleventh one is written on Prākṛt grammar highlighting the interdependent relation between Sanskrit and Prākṛt.

We have no word to express our extreme gratitude to the honourable reviewers for their ungrudging and sincere co-operation in the painstaking process of reviewing the articles.

In every academic venture we get full support from our Honourable Vice-Chancellor. We acknowledge with regard the cooperation of our Registrar and the concerned office.

An academic activity like journal awaits recognition from academic world. Hope this volume will be appreciated by the learned savants.

*prajñāprakarṣaḥ sarveṣām upari vasati*

November, 2025
Kolkata

**Indira Chatterjee**
*Editor*

# Editorial Board

**Chairperson** : *Hon'ble Vice-Chancellor*

**Editor-in-Chief** : Prof. Indira Chatterjee
*Head of the Department*

**Editorial Board** : Prof. Parboty Chakraborty
Prof. Amal Kumar Mondal
Prof. Monidipa Das
Dr. Pradip Chandra Das
Dr. Subrata Mondal

**Advisory Board** : Mrinal Kanti Ganguli, Former Asutosh Professor, Calcutta University
Biswanath Mukherjee, Former Professor, Burdwan University
Bidyut Baran Ghosh, Former Professor, Sanskrit College and University
Gangadhar Kar, Former Professor, Jadavpur University
Manjula Devi, Former Professor, Gauhati University
Mukta Biswas, Former Professor, Gauhati University
Braja Kishore Swain, Former Professor, Jagannath Sanskrit University, Puri
Bishnupada Mahapatra, Professor, SLBSNSU, New Delhi

# Contents


सुबर्थेन प्रातिपदिकार्थस्यान्वयविषये कौण्डभट्टनागेशाचार्ययोर्मतपर्यालोचनम्
**सुव्रत-मण्डलः** 9

पाणिनीयदिशा पुंवद्भावस्योत्सर्गापवादभावविमर्शः
**कौशिक-प्रधानः** 20

कासुचित् अप्रधानोपनिषत्सु सृष्टिरहस्यम्
**सागर-बेरा** 35

प्राकृतव्याकरणे अव्ययविमर्शः
**सैकत-दासः** 43

सुपद्म-व्याकरणस्यालोके समासस्य संक्षिप्तालोचनम्
**श्रेयश्री-दासः** 51

कृष्णानन्दसरस्वतीप्रणीतस्य अन्तर्व्याकरणनाट्यपरिशिष्टस्य सन्ध्यध्यायानां सामाजिकं श्लेषात्मकं चाध्ययनम्
**कुन्दन-रायः** 65

अर्थोपक्षेपकविमर्शः
**राजदीप-सरकारः** 73

Vedic Interpretation and Kshitish Chandra Chatterji-A Glimpse of Study
**Pradip Kumar Mahapatra** 85

Animality and Humanity: An Upaniṣadic Perspective on the Interplay of Instinct and Consciousness
**Nandita Barui** 97

Citra in Some Epics of Sanskrit Literature
**Debarati Nandy** 111

Origin and Course of The River Brahmaputra as depicted in The Kālikāpurāṇa
**Pritam Ghosh** 124

# सुबर्थेन प्रातिपदिकार्थस्यान्वयविषये कौण्डभट्टनागेशाचार्ययोर्मतपर्यालोचनम्

**सुव्रत-मण्डलः**

**विषयसारः-**

वेदपुरुषस्य षडङ्गेष्वन्यतमं प्रधानभूतञ्च हि व्याकरणम्। शिक्षाग्रन्थे वेदपुरुषस्यास्यत्वेन परिगणनं व्याकरणस्य विहितम्। महाभाष्यकारेण फणीन्द्रेणापि स्वकीये महाभाष्ये व्याकरणस्य वेदाङ्गेषु श्रेष्ठत्वं प्रतिपादयताभाणि - 'प्रधानञ्च षट्स्वङ्गेषु व्याकरणं, प्रधाने च कृतो यत्नः फलवान् भवति'[1] इति। किञ्च शब्दानुशासनशास्त्रस्य मुख्यप्रयोजनख्यापनावसरे आचार्येण वेदरक्षादिकमस्य प्रयोजनम् इति ख्यापितम्। एतादृशस्य गुणान्वितस्य व्याकरणशास्त्रस्य ज्ञानपरम्परा अपि सुमहती। महेश्वरबृहस्पत्यादय आचार्या इह प्रसिद्धाः। व्याकरणशास्त्रस्याष्टौ सम्प्रदायाः विशेषरूपेण ख्याताश्च।

> 'इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।
> पाणिन्यमरजैनेन्द्राः जयन्त्यष्टौ च शाब्दिकाः।।' इति

प्रसिद्धवचनात्सुमहापरम्परायाः एकः परिचयः प्राप्यते। इतोपि नैके वैयाकरणाः सुप्रसिद्धाः आसन्। परन्तु एतेषु वैयाकरणेषु विशिष्टस्थानम् पाणिनेः। नैकानि कारणानि पाणिनेः श्रेष्ठत्वे। तेष्वन्यतमं कारणं हि लघुत्वम्। विषयेस्मिन् प्राप्यते प्रसिद्धं वचनम् –

> 'समुद्रवद्व्याकरणं महेश्वरे तदर्धकुम्भोद्धरणं बृहस्पतौ ।
> तद्भागभागाच्च शतं पुरन्दरे कुशाग्रविन्दूत्पतितं हि पाणिनौ।।' इति।

पाणिनेः श्रेष्ठत्वमाधारीकृत्यैव आधुनिकेतिहासकाराः व्याकरणशास्त्रस्येतिहासख्यापनावसरे पाणिनिमाधारीकृत्यैव वैयाकरणाचार्याणां प्रख्यापनं विहितवन्तः। वैयाकरणेषु केचन पाणिनिपूर्ववर्तिनः केचन च पाणिनिपरवर्तिन इति कृत्वा तेषां वर्णनं विहितं स्वीयग्रन्थेषु। वस्तुतः पाणिनिव्याकरणं त्रिमुनिव्याकरणमिति समधिकं प्रसिद्धम्। तत्र सूत्रकारः पाणिनिः वृत्तिकारः कात्यायनो भाष्यकारश्च पतञ्जलिः। पाणिनिव्याकरणे अपि नैकाः परम्पराः दृश्यन्ते। पाणिनीयेषु केचन सूत्रक्रमानुयायिनः वामनजयादित्यादयः, केचन प्रक्रियाक्रमानुयायिनः भट्टोजिदीक्षितवरदराजाचार्यादयः। किञ्च भर्तृहरिकौण्डभट्टनागेशादयश्चाचार्या दार्शनिकदृशा अपि व्याकरणज्ञानचर्चां विहितवन्तः। एते पदवाक्यप्रमाणज्ञा आचार्याः शब्दस्य स्वरूपविषये, किञ्च काल्पनिकतया विभक्तानां शब्दावयवानामर्थविषये, तदर्थानाञ्च मिथः अन्वयविषये सुचिन्तितं राद्धान्तं स्वीयदार्शनिकतत्त्वर्द्धेषु ग्रन्थेषूपपादितवन्तः। एवं पाणिनिव्याकरणस्यापि ज्ञानपरम्परा सुविशाला। तेषां समेषां पर्यालोचनमिहासाध्यम्। अतो निबन्धेऽश्वस्मिन् सुमहावैयाकरणदार्शनिकयोः कौण्डभट्टनागेशाचार्ययोः सुबर्थविषये राद्धान्तः स्वीयशास्त्रेषु प्रतिपादितस्तूपस्थाप्यते। सुबर्थपर्यालोचनावसरे तावुभावेव कारकविहितसु-

[1] महाभाष्यस्य पस्पशाह्निके

पामर्थस्तदर्थेन प्रकृत्यर्थस्यान्वयश्चोपादितवन्तौ। यतो हि तौ पाणिनिमतानुयायिनौ, अतः कर्मकारकादिषु विहितानां द्वितीयादिसुपां सामान्यतया कर्मत्वादिकं निरूप्य विशेषतः तेषां पर्यालोचनं विहितम्। कर्मत्वादीनां स्वरूपविषये च तयोर्भिन्ना मतिर्नितरां दृश्यते। समासत इह तयोः मतानि पर्यालोच्य प्रकृत्यर्थेन प्रत्ययार्थस्यान्वयविषये शाब्दबोधे च तयोर्मतभेदाः सोदाहरणमुपस्थाप्यन्ते। उपसंहृतौ चैतादृशज्ञानपरम्पराया उपयोगः साम्प्रतिके काले कीदृश इति पर्यालोचयिष्यते।

**कुञ्चीशब्दाः – प्रातिपदिकम्, सुबर्थः, आश्रयः, विश्लेषः, अवधिः, शाब्दबोधः इत्यादयः।**

**कर्मकारकविहितसुबर्थपर्यालोचनम् –**

पाणिनीयसूत्रानुसारं कर्तुः क्रियया आप्तुमिष्टतमं कारकं हि कर्म। अपि चेप्सिततमक्रियया युक्तमनीप्सितमपि कारकं कर्मसंज्ञं भवति। एवमन्यैश्च सूत्रैः कर्मसंज्ञा विधीयते। अतः कर्मणि विहिताया द्वितीयायाः कर्मत्वमेवार्थः इति उभावेव स्वीकृतवन्तौ। प्राप्यते च फणीन्द्रवचनम् - 'सुपां कर्मादयोप्यर्थाः'[2] इति। परन्तु दार्शनिकदृष्ट्या द्वितीयायाः **आश्रयोर्थः** स्वीकृत आचार्येण कौण्डभट्टेन। कौण्डभट्टाचार्येण निगदितं तथाहि –

'आश्रयोवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा।
यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः।।
द्वितीयातृतीयासप्तमीनामाश्रयोर्थः।।'[3] इति।

एवं प्रकारेण आश्रयः, अवधिः, उद्देश्यः, सम्बन्धः, शक्तिरित्यादयो विभक्त्यर्था इति आचार्येण कौण्डभट्टेन निगदितम्। तत्र च तेन द्वितीयाया आश्रयोर्थः प्रतिपादितः। आचार्येणाश्रयार्थस्वीकारे कारणञ्च निगदितम् - 'तथा च क्रियायाः फलस्य च धातुनैव लाभादनन्यलभ्य आश्रयोर्थः'[4] इति। दर्पणटीकाकारैराश्रयार्थः परिष्कृतः - 'किञ्चिद्धर्मानवच्छिन्नाश्रयतावानित्यर्थः'[5] इति। वस्तुतः तेन चतुर्थीपञ्चम्योरर्थयोरुद्देश्याव-ध्योराश्रयात्मकत्वेपि न हानिः। अतः ओदनं पचति इत्यत्र विक्लित्त्याश्रयत्वादोदनस्य कर्मता। विक्लित्तिर्हि धातोरर्थः। आश्रय एव द्वितीयार्थः इत्याचार्याणां मतिः। अनुरूपमेव घटं करोति, घटं जानामि इत्यादौ यथाक्रमं उत्पत्त्याश्रयत्वाद् आवरणभङ्गरूपधात्वर्थफलाश्रयत्वाच्च घटस्य कर्मत्वम्। तत्र च विहिताया द्वितीयाया आश्रयत्वमेवार्थ इति निष्कर्षः।

ननु घटमकरोद् घटं ज्ञास्यति इत्यादिषु अतीतानागतस्थलेष्वाश्रयत्वासम्भवेन कथं तत्र द्वितीया स्यादिति प्रश्नो नितरां समुदेति द्वितीयाया आश्रयरूपार्थस्वीकारात्। विषयेस्मिन् सत्कार्यवादिनां नैयायिकानाञ्च राद्धान्तः समर्थित आचार्येण। तथा ह्युक्तमाचार्येण - 'अतीतादेराश्रयतया च विषयतया ज्ञानाश्रयतया नैयायिकानामिव सत्कार्यवादसिद्धान्ताद्वोपपद्यते'[6] इति। सत्कार्यवादिनां मतानुसारं कस्यापि पदार्थस्योत्पत्तिर्न भवति। नष्टोपि न भवति। आविर्भावस्तिरोभावश्च तेषां सम्भवतः। तस्मादेव उत्पन्नो नष्टश्चेति प्रतीतिः। एवं सूक्ष्मरूपेण अतीतकाले अनागतकाले च घटस्य स्थितिः। अतः आश्रयत्वस्वीकारेपि नास्ति कापि बाधा।

2 महाभाष्ये - १/४/२१ -इति सूत्रस्य व्याख्याने
3 वैयाकरणभूषणसारे सुबर्थनिर्णये कारिकासंख्या - २४
4 वैयाकरणभूषणसारे - सुबर्थनिर्णये
5 तत्रैव आश्रयार्थविषये दर्पणटीकायां
6 वैयाकरणभूषणसारे - सुबर्थनिर्णये

प्रसङ्गादत्र वाक्यपदीयकाराणां मतमुपस्थाप्यते –

'तिरोभावाभ्युपगमे भावानां सैव नास्तिता।
लब्धक्रमे तिरोभावे नश्यतीति प्रतीयते।।'[7] इति।

मीमांसकैः कैश्चन नैयायिकैश्च रामः ग्रामं गश्च्छति इत्यादौ संयोगस्य द्विनिष्ठत्वाद् रामादीनामपि कर्मत्वनिवारणाय परसमवेतत्वं हि द्वितीयावाच्यत्वमित्युपपादितम्। एवं प्रयागतः काशीं गच्छतीत्यादौ क्रियाजन्यविभागस्य प्रयागादिषु सत्त्वात्तत्र प्रयागं गच्छतीत्यापत्तिः स्यात्। तन्निवारणाय धात्वर्थावच्छेदकत्वं फले विशेषणं तच्च द्वितीयावाच्यमित्यामनन्ति नैयायिकाः। आचार्यः कौण्डभट्टः मतद्वयमेव निराकृतवान्। तथाहि तेनोक्तम - 'तन्न रोचयामहे, परसमवेतत्वादेर्गौरवेणावाच्यत्वाद्' इति। तथाहि द्वितीयायाः परसमवेतत्वार्थस्वीकारे तण्डुलं पचति चैत्र इतिवत् तण्डुलं पच्यते स्वयमेव इत्यत्रापि द्वितीयापत्तिः स्यात्, विक्लित्त्यनुकूलतण्डुलान्यसमवेताग्निसंयोगरूप-धात्वर्थाश्रितत्वात्। एवमेव गमयति कृष्णं गोकुलम् इतिवत् पाचयति कृष्णं गोपः इत्यत्रापि द्वितीयापत्तिः स्यात्। अतः आचार्यः मतमिदं निराकृतवान्।

धात्वर्थावच्छेदकफलशालित्वं कर्मत्वमित्यपि न युज्यते। तथा सति काशीं गच्छन् पथि मृतः इत्यादौ काश्याः कर्मत्वं न स्यात्तादृशफलशालित्वाभावात्। अनुरूपमेव ग्रामं न गच्छति इत्यादिष्वपि बोद्धव्यः।

ततश्चाचार्येण कौण्डभट्टेन कर्मणो भेदसप्तकं निर्वर्त्त्यादिकं वाक्यपदीयमतानुसारं प्रतिपादितम्। कर्मण ईप्सितादिभेदः संज्ञासिद्धौ उपलक्षणमेव। न तु शाब्दबोधे तेषां भानं भवतीत्याचार्याणां मतिः। एवं कृते पर्यालोचने दृश्यते यद् द्वितीयाया आश्रयत्वरूपोर्थः तेन सह च प्रातिपदिकार्थस्यान्वयः इत्येवाचार्याणां सविमर्शः परामर्शः।

**नागेशाचार्येणापि** स्वकीयेषु दार्शनिकसिद्धान्तसमन्वितेषु शास्त्रेषु कर्मणि विहिताया द्वितीयायाः अर्थः परिष्कृतः। तथाहि निगदितमाचार्येण - 'कर्मणि विहितद्वितीयायाः कर्मत्वशक्तिमानर्थः। कर्मणीति सूत्रस्वरसात्'[8] इति। एवं कर्मणि द्वितीयाविधायकं सूत्रमाश्रित्य तेन द्वितीयायाः कर्मत्वशक्तिमान् इति अर्थः प्रतिष्ठितः। अतः चैत्रस्तण्डुलं पचति इत्यत्र कर्मभूततण्डुलविशिष्टः चैत्राभिन्नकर्तृकः वर्तमानः पाकः इति शाब्दबोधः।

एवं कौण्डभट्टमतान्नागेशाचार्यस्य भिन्ना मतिः स्पष्टैव। परन्तु कौण्डभट्टमतं सम्पूर्णतया तेन न निराकृतम्। आश्रयरूपोर्थोप्याचार्येण स्वीकृतः। तथा हि तन्नये – कर्तुरीप्सिततमं कर्म इति सूत्रबोधितकर्मविहितद्वितीयाया आश्रयोर्थः फलस्य धातुनैव लाभात्। अतः अन्वयोप्यनुरूप एव स्यात्। एवं सूत्रानुसारमाचार्येण द्वितीयायाः कर्मत्वमर्थः प्रदर्शितो दार्शनिकदृष्ट्या कर्मत्वशक्तिमाान् इत्यर्थः अपि चाश्रयरूपोर्थो द्वितीयाया अङ्गीकृतो नागेशाचार्येण।

विशेषार्थे उपपदे च विहिताया द्वितीयाया विषये न तथा पर्यालोचनं वैयाकरणदार्शनिकसिद्धान्तसमन्वितेषु ग्रन्थेषु भूषणसारलघुमञ्जूषादिषु उपलभ्यते। अतः पाणिनीयसूत्रानुसारमेव तत्र तत्र विहिताया द्वितीयाया अर्थस्तैर्गृहीत इति ज्ञातुं शक्यत इति।

---

[7] वाक्यपदीये - ३/१/३८

[8] वैयाकरणसिद्धान्तलघुमञ्जूषायां - द्वितीयार्थनिरूपणप्रसङ्गे

**कर्तृकारकविहितसुबर्थपर्यालोचनम्–**

पाणिनिसूत्रप्रामाण्यात् कर्तृकारके विहितायास्तृतीयाया: कर्तृकारकमर्थ:। 'अनभिहिते'[9] इत्यधिकारे पाठाद् अनभिहिते कर्तृकारके तृतीया विभक्तिर्विधीयते। ननु को नाम कर्ता इत्यत्र च पाणिनिना सूत्रितं - 'स्वतन्त्र: कर्ता'[10] इति। कर्तृविषये महाभाष्यकारमतिर्हि – धात्वर्थव्यापाराश्रयत्वं हि कर्तृत्वमिति। आचार्येण भर्तृहरिणा स्वातन्त्र्यमेव कर्तृत्वेनालोचितम्। वाक्यपदीयकारेण कर्तृस्वरूपविषये निगदितं तथाहि –

'प्रागन्यत: शक्तिलाभात् न्यग्भावापादानादपि।
तदधीनं प्रवृत्तित्वात् प्रवृत्तानां निवर्तनात्।।
अदृष्टत्वात्प्रतिनिधे: प्रविवेको च दर्शनात्
आरादप्युपकारित्वे स्वातन्त्र्यं कर्तुरिष्यते।।'[11] इति।

वैयाकरणभूषणसारकारा: कौण्डभट्टमहोदया अपि क्रियायां स स्वातन्त्र्यवान्भवति स कर्ता इति स्वीकुर्वन्ति। स्वातन्त्र्यविषये तेषां मतिर्हि-धात्वर्थव्यापाराश्रयत्वं हि स्वातन्त्र्यम्। एवं तन्नये कर्ता भवति धातुवाच्यव्यापाराश्रय:। तस्मात् कर्तृकारके या तृतीया विभक्तिस्तस्या अर्थो भवति धातुवाच्यव्यापाराश्रय:। तत्र व्यापारो धातुवाच्य एव। एवम् आश्रयमात्रमेव तृतीयाया अर्थ: समायाति, अनन्यलभ्यो हि शब्दार्थ इति न्यायात्।

अनेन प्रकारेण नैयायिकानां मतमपि निराकृतमाचार्येण। तथा हि केचन नैयायिका: कृतिमेव तृतीयार्थत्वेनामनन्ति। परन्तु तस्या धात्वर्थत्वादाश्रयत्वमेव तृतीयार्थ इत्याचार्याणां मतम्। एवं देवदत्तेन तण्डुल: पच्यते इति वाक्ये देवदत्तेन इति स्थले कर्तृतृतीयाया आश्रयोर्थ:। तेनार्थेन प्रकृत्यर्थस्याभेद सम्बन्धेनान्वय:। तेन च सम्पूर्णवाक्यस्य शाब्दबोधो भवति- तण्डुलाभिन्नाश्रयनिष्ठविक्लित्तिजनको देवदत्ताभिन्नाश्रयनिष्ठो व्यापार इति।

आचार्येण कर्तुर्भेदत्रयमुपस्थाप्य तत्र शाब्दबोधोप्युपपादित:। तन्नये – शुद्ध:, प्रयोजको हेतु:, कर्मकर्ता चेति कर्तुर्भेदत्रयम्। उदाहरणमपि प्रदर्शितम्—

मया हरि: सेव्यते इति शुद्धकर्तुरुदाहरणम्। मदभिन्नाश्रयको हरिकर्मकसेवनानुकूलो व्यापार इति तत्र शाब्दबोध:।

प्रयोजककर्तुर्हेतुकर्तुर्वोदाहरणमुपस्थापितमाचार्येण–कार्यते हरिणा इति। हर्यभिन्नाश्रयक उत्पादनानुकूलो व्यापार इति तत्रान्वयो ज्ञेय:।

अन्तिमतश्च गमयति कृष्णं गोकुलमिति वाक्यं कर्मकर्तुरुदाहरणरूपेणोपस्थापितमाचार्येण। तत्र च शाब्दबोध: स्यात् - गोकुलकर्मकगमनानुकूलकृष्णाश्रयकतादृशव्यापारानुकूलो व्यापार इत्येवं प्रकारक:।

**नागेशाचार्योऽपि** स्वीयग्रन्थेषु **कर्तृकारके** विहितायास्तृतीयाया अर्थविषये तदर्थेन च प्रकृत्यर्थस्यान्वयविषये बहुधा चर्चितम्। तथाहि वैयाकरणसिद्धान्तलघुमञ्जूषायां कर्तरि विहितायास्तृतीयाया: कर्तृत्वशक्तिमान् कर्तृक्रियासम्बन्धश्चार्थ: प्रतिपादित:। उक्तं तथाहि - 'तृतीयाया: कर्तृकरणे अर्थ:।

---

9 अष्टाध्याय्याम् –२/३/१

10 तत्रैव – २/३/१८

11 वाक्यपदीये-साधनसमुद्देशे – कारिका - ११,१२

कर्तृकरणयोस्तृतीयेति सूत्रात्। कर्तृत्वं च कर्तृसंज्ञाबोधितकर्तृत्वशक्तिमत्त्वम्'[12] इति। एवं देवदत्तेन तण्डुलः पच्यते इत्यत्र नागेशनये कर्तृतृतीयायाः कर्तृत्वशक्तिमानर्थः कर्तृक्रियाभावसम्बन्धश्चार्थः। स चार्थः प्रकृत्यर्थेनाभेदेनान्वयः। अत उक्तवाक्यात् – देवदत्ताभिन्नकर्तृशक्तिमद्विशिष्टो यो व्यापारः तज्जन्या तण्डुलाभिन्नाश्रयविशिष्टा विक्लित्तिः इति बोधः।

अपरतो बृहच्छब्देन्दुशेखर आलोचितं तेन - 'एतद्विहिततृतीयायाश्चाश्रयमात्रमर्थः। धात्वर्थस्य धातुनैव लाभात् इति। अत्र तु कौण्डभट्टेन तस्य मतैक्यं दृश्यते।

## करणकारकविहितसुबर्थपर्यालोचनम्

कौण्डभट्टाचार्याणां नागेशाचार्याणाञ्च नये **करणतृतीयाया आश्रयो व्यापारश्चार्थः**। एवं चैत्रः कुठारेण काष्ठं छिनत्तीत्यत्र तृतीयार्थ आश्रयो व्यापारश्च प्रकृत्यर्थेनाभेदसम्बन्धेनान्वेति। एवं कुठाराभिन्नाश्रयनिष्ठव्यापार इत्यत्र कुठारेणेत्यस्य। तदनुरूपञ्च शाब्दबोधः।

एवं कृते पर्यालोचने दृश्यते करणविहितसुबर्थविषये नास्ति तथा विप्रतिपत्तिः तयोः।

## सम्प्रदानकारकविहितसुबर्थपर्यालोचनम –

आचार्येण **कौण्डभट्टेन** सम्प्रदानस्वरूपपर्यालोचनवेलायां प्रतिपादितम्- 'कर्मणा यमभिप्रैति स सम्प्रदानम इति सूत्रात् कर्मणा करणभूतेन यमभिप्रैति ईप्सति तत्कारकं सम्प्रदानम्'[13] इति। 'कर्मणा यमभिप्रैति स सम्प्रदानम्'[14] इति पाणिनिविरचिते सूत्रे कर्मणेति तृतीयार्थः करणत्वं, तच्च करणत्वमिह प्रतियोगित्वरूपम्। अभिप्रैतीत्यस्यार्थः सम्बद्धुमिच्छतीति। तथा च दानकर्मप्रतियोगिकसम्बन्धनिष्ठप्रकारतानिरूपिका या दातृनिष्ठा इच्छा तन्निरूपितविशेष्यताश्रय इति सूत्रार्थः। विशेष्यतायाश्च प्रकारतानिरूपिताया एव ग्रहणात् तादृशप्रकारतानिरूपितदातृनिष्ठेच्छीयविशेष्यताश्रयः सम्प्रदानमित्यर्थः। तादृशीच्छा च विप्रो गोस्वामी भवतु इत्याकारा। तदीयविशेष्यताश्रयत्वात् विप्राय गां ददाति इत्यादौ विप्रः सम्प्रदानम्।

प्रसङ्गेस्मिन् वक्तव्यम् - 'कर्मणा यमभिप्रैति स सम्प्रदानम् इति पाणिनिना सूत्रितम्। कात्यायनाचार्यवचनञ्चेह - 'क्रियया यमभिप्रैति सोपि सम्प्रदानम् इति। वस्तुतो लोके कर्मपदेन क्रियापि बोध्यते। परिभाषेन्दुशेखरे नागेशाचार्येणालोचितम - 'उभयगतिरिह भवति' इति। एवं सूत्रे कर्मग्रहणेन क्रियाया अपि ग्रहणं भवति। अतस्तेनैव राज्ञे वार्तां निवेदयति इत्यादिष्वपि पूर्वोक्तरीत्या राज्ञे इत्यत्र सम्प्रदाने चतुर्थी ज्ञेया। निवेदनक्रियया राजानमभिप्रैति इति बोध्यम्।

अपरतो वृत्तिकारा आमनन्ति यत्सम्प्रदानमिति महासंज्ञा। तस्मात् इयं संज्ञा अन्वर्था। सम्प्रदानमित्यस्य सम्यक्प्रदीयते अस्मै इत्यर्थः। दानं हि स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वोत्पादनम्। एवं यत्रापुनर्ग्रहणाय दीयते तत्रैव दानक्रियाकर्मणा सम्बद्धुमिष्टस्य सम्प्रदानत्वमिति वृत्तिकारमते सम्प्रदानस्य स्वरूपम्। यथा ब्राह्मणाय गां ददाति इति। परन्तु यत्र पुनर्ग्रहणाय दानं तत्र तु न सम्प्रदानत्वम्। तथाहि – रजकस्य वस्त्रं ददातीत्यादौ सम्प्रदानत्वाभावाद् रजकाय इति चतुथयन्तरूपं न स्यादिति वृत्तिकाराणामाशयः। आचार्येण कौण्डभट्टेनापि वृत्तिकारमतं प्रोक्तं स्वकीये वैयाकरणभूषणसारे - 'वृत्तिकारास्तु सम्यक्प्रदीयते यस्मै तत्सम्प्रदानम्

---

[12] वैयाकरणसिद्धान्तलघुमञ्जूषायां तृतीयार्थनिरूपणावसरे

[13] वैयाकरणभूषणसारे पत्रसंख्या – १८६(प्रकाशकः – चौखाम्बासुरभारतीप्रकाशनम्,वाराणसी, प्रकाशनवर्षम् - २१)

[14] अष्टाध्याय्याम् १/४/३२

इत्यन्वर्थसंज्ञया स्वस्वत्वनिवृत्तिपर्यन्तमर्थं वर्णयन्तो रजकस्य वस्त्रमित्याहु:’[15] इति। अन्यथा तु दानक्रियया अभिप्रायप्रकाशे सम्प्रदानं स्वीकर्तुं शक्यते तस्या: संज्ञाया: पारिभाषिकत्वात्।

आचार्येण कौण्डभट्टेन सम्प्रदानस्य भेदत्रयं स्वीकृतम् – अनिराकर्तृसम्प्रदानम्, प्रेरयितृसम्प्रदानम्, अनुमन्तृसम्प्रदानञ्चेति। तथाहि वाक्यपदीयकाराणां मतमुल्लिखितमाचार्येण –

‘अनिराकरणात्कर्तुस्त्यागाङ्गं कर्मणेप्सितम्।
प्रेरणानुमतिभ्याञ्च लभते सम्प्रदानताम्।।’[16] इति।

अथ सम्प्रदानविहिताया: चतुर्थ्या अर्थस्तदर्थेन प्रकृत्यर्थस्यान्वय आचार्याणां मतानुसारमालोच्यते। तथा हि तदर्थविषये निगदितमाचार्येण –‘उद्देश्यश्चतुर्थ्यर्थ:’ इति। स च उद्देश्यरूपश्चतुथयर्थ: प्रकृत्यर्थेन अभेदसम्बन्धेनान्वितो भवति। एवं राजा विप्राय गां ददातीत्यस्माद् गवाभिन्नाश्रयनिष्ठस्वस्वत्वध्वंससमाना-धिकरणपरस्वत्वोत्पत्त्यनुकूला विप्रोद्देशिका राजाभिन्नाश्रयनिष्ठा वर्तमानकालावच्छिन्नेच्छारूपव्यापार इति शाब्दबोधो जायते।

नागेशाचार्येणापि स्वीयग्रन्थेषु सम्प्रदानविषये सम्प्रदानविहितचतुर्थ्यर्थविषये तथा च प्रातिपदिकार्थेन चतुर्थ्यस्यान्वयविषये बहुधा पर्यालोचितम्।

परमलघुमञ्जूषायां तथाहि सम्प्रदानलक्षणं प्रतिपादितमाचार्येण- ‘क्रियामात्रकर्मसम्बन्धाय क्रियायामुद्देश्यं यत्कारकं तत्त्वं तत्सम्प्रदानत्वम्’[17] इति। अस्मिन लक्षणे मात्रशब्द: साकल्यवाचक:। कोषे च प्राप्यते वचनम् – मात्रं कार्त्स्न्येवधारणे इति। एवं सर्वक्रियाकर्मसम्बन्धाय क्रियायामुद्देश्यं यत्कारकं तत्त्वं सम्प्रदानत्वमिति लक्षणं समायाति। तथाहि – ब्राह्मणाय गां यच्छतीत्यत्र दानक्रियाया: कर्म गौ:, तस्य सम्बन्धाय दानक्रियायामुद्देश्यभूतो ब्राह्मण:। तच्च कारकम्। अतस्तत्र सम्प्रदानत्वम्। एवं सम्प्रदाने सति - ‘चतुर्थी सम्प्रदाने’[18] इत्यनेन चतुर्थी विभक्ति:।

एवमेव दूतो वार्तां राज्ञे निवेदयति इति वाक्ये निवेदनक्रियाया: कर्म वार्ता। तस्य सम्बन्धाय निवेदनक्रियायामुद्देश्यभूतो राजा। तच्च कारकम्। अतस्तत्र सम्प्रदानत्वात चतुर्थी विभक्ति:। बृहच्छब्देन्दुशेखरे वैयाकरणसिद्धान्तलघुमञ्जूषायाञ्चानुरूपमेव सम्प्रदानस्वरूपमाचार्येण प्रतिपादितम्।

अथ नागेशाचार्यमतानुसारं सम्प्रदानविहितचतुर्थ्या अर्थ आलोच्यते। आचार्येण वैयाकरणसिद्धान्तमञ्जूषायां निगदितं - ‘कारकचतुर्थ्या: सम्प्रदानमर्थ:, चतुर्थी सम्प्रदाने इति सूत्रात्[19] इति। अपि च वैयाकरणसिद्धान्तलघुमञ्जूषायामुक्तमाचार्येण - ‘कारकचतुर्थ्या: सम्प्रदानत्वशक्तिमानर्थ:। सा शक्तिश्च तत्तद्धात्वर्थकर्मनिष्ठफलनिरूपकत्वेनेच्छाविषयो यस्तन्निष्ठ:’[20] इति। एवं राजा विप्राय गां ददाति इत्यत्र विप्रशब्दोत्तरस्य ङेप्रत्ययस्य सम्प्रदानत्वशक्तिमानित्यर्थ:। तेनार्थेन प्रकृत्यर्थस्य अभेदसम्बन्धेनान्वय:। सम्प्रदानत्वशक्तिमतश्च क्रियाकारकभावेन धात्वर्थव्यापारे अन्वय:। एवमुक्तवाक्यात्

[15] वैयाकरणभूषणसारे पत्रसंख्या – १८९ (प्रकाशक: – चौखाम्बासुरभारतीप्रकाशनम्,वाराणसी, प्रकाशनवर्षम् - २१)

[16] वाक्यपदीये तृतीयकाण्डे श्लोकसंख्या –१२९

[17] परमलघुमञ्जूषायां कारकनिरूपणे पत्रसंख्या –२७३ (प्रकाशक:- चौखाम्बासुरभारतीप्रकाशनम्, वाराणसी ,प्रकाशनवर्षम्- २०११)

[18] अष्टाध्याय्यां - २/३/१३

[19] वैयाकरणसिद्धान्तमञ्जूषायां पत्रसंख्या –१७२ (प्रकाशक: – सम्पूर्णानन्दसंस्कृतविश्वविद्यालय:, वाराणसी , प्रकाशनवर्षम्-१९७७)

[20] वैयाकरणसिद्धान्तलघुमञ्जूषायां पत्रसंख्या –१२६१ (प्रकाशक: – राषष्ट्रयसंस्कृतसंस्थानम्, नव देहली, प्रकाशनवर्षम्- २००६)

राजाभिन्नकर्तृविशिष्टो गवाभिन्नकर्मत्वशक्तिमद्विशिष्टस्वस्वत्वनिवृत्तिसमानाधिकरण-परसत्त्वोत्पत्त्यनुकूलो विप्राभिन्नसम्प्रदानत्वशक्तिमद्विशिष्टो वर्तमानकालिको व्यापार इति शाब्दबोधो जायते।

एवं कृते पर्यालोचने सम्प्रदानकारकविहितचतुर्थ्यर्थविषये उभयो: मतपार्थक्यं दृश्यते। शाब्दबोधप्रकारोपि तस्माद्भिन्न उभययो:।

**अपादानकारकविहितसुबर्थपर्यालोचनम् –**

**कौण्डभट्टमहोदयेन** स्वकीये दार्शनिकसिद्धान्तसमन्विते वैयाकरणभूषणसारे अपादानविहितपञ्चम्यर्थनिरूपणावसरे निगदितम् - 'अवधि: पञ्चम्यर्थ:' इति। आचार्येणात्र 'ध्रुवमपायेऽपादानम्'[21] इत्यस्य व्याख्यानमुपस्थापितम् - 'अपायो विश्लेषस्तज्जनकक्रिया इति, तत्रावधिभूतमपादानमित्यर्थकादवधिभूतमिति भाव:'[22] इति। ध्रुवविषये आचार्येण वाक्यपदीयकारमतिरेवानुसृता। तथा ह्युदाहृतमाचार्येण वाक्यपदीयकारमतम्—

'अपाये यदुदासीनं चलं वा यदि वाचलम्।
ध्रुवमेवातदावेशात्तदपादानमुच्यते।।
पततो ध्रुव एवाश्वो यस्मादश्वात् पतत्यसौ।
तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमिष्यते।।'
उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्मजे।
विभागे प्रविभक्ते तु क्रिये तत्र विवक्षिते।।[23] इत्यादिकम्।

एवम्श्च आचार्येण हरिणा अपाये यदतदाविष्टं तद्विश्लेषजनकक्रियानाश्रयं तदेवाचलं चलं वा अवधिर्भवतीत्युक्तं तन्मतं कौण्डभट्टेनापि समर्थितम्। एवं 'परस्परस्मान्मेषावपसरत:' इत्याद्युदारणेषु परस्परादिशब्दवाच्ययो: मेषयो: अपदानत्वसियर्थमाचार्येण स्वमतिरुपस्थापिता - 'विश्लेषाश्रयत्वे सति तज्जनकतत्क्रियानाश्रयत्वम् तत्क्रियायामपादानत्वम् वाच्यम् इति। एवमाचार्येण अपदानस्वरूपं प्रतिपादितम्। अवधिश्च पञ्चम्यर्थ इति पर्यालोचित:। उक्तञ्च वृक्षकर्मकविभागवति वस्त्रे वृक्षात् वस्त्रं पतति इति सङ्गच्छते। 'बलाहकाद् विद्योतते' इत्यादौ नि:सृत्येत्यध्याहार्यमित्याचार्याणामाशय:। 'रूपं रसात् पृथक् इत्यत्र च बौद्धिकमपादानत्वं स्वीकार्यमथवा पृथग्विनेत्यादि सूत्रमनुसन्धेयमित्याचार्याणां कौण्डभट्टानामाशय:।

**आचार्येण नागेशेनापि** स्वकीयेषु दार्शनिकतत्त्वसमृद्धेषु ग्रन्थेषु अपादानविषये स्वीया मतिरुपस्थापिता। तथा च पञ्चम्यर्थविषये तदर्थेन च प्रातिपदिकार्थस्यान्वयविषये विशेषमतिरुपनिबद्धा। तथा हि अपादानविषये आचार्येण स्वकीयायां परमलघुमञ्जूषायां निगदितम् -
'तत्तत्कर्तृसमवेततत्तत्क्रियाजन्यप्रकृतधात्वर्थवाच्यविभागाश्रयत्वमपादानत्वम्'[24] इति। तत्तत्कर्तृसमवेता या तत्तत्क्रिया तत्तत्क्रियाजन्य: प्रकृतधातुवाच्यो यो हि विभागस्तदाश्रयत्वम् अपादानत्वमिति तदाशय:। एवं रामो ग्रामाद् गच्छति इत्यादौ ग्रामादेरपादानत्वं ज्ञेयम्। अस्मिन्नुदाहरणे कर्ता राम: तस्मिन् समवेता या गमिधातुवाच्या क्रिया तज्जन्य: प्रकृतवाक्ये प्रतीयमानो विभाग: गमिधात्वर्थवाच्योपि तदाश्रयत्वं ग्रामस्यास्तीत्यपादानसिद्धि:।

---

[21] अष्टाध्याय्यां - १/४/२४

[22] वैयाकरणभूषणसारे सुबर्थनिर्णये पञ्चम्यर्थनिरूपणप्रसङ्गे

[23] तत्रैव, वाक्यपदीयस्य साधनसमुद्देशात् (श्लोकसंख्या – १३८-१४) समुदाहृत:

[24] परमलघुमञ्जूषायाम् – पत्रसंख्या-१७९ (प्रकाशनवर्षम् -२६,प्रकाशक: – चौखाम्बाविद्याभवनम्, वाराणसी)

वैयाकरणसिद्धान्तलघुमञ्जूषायाञ्चोक्तमाचार्येण नागेशभट्टेन - 'तस्मादवधिभावोपगमातिरिक्तावधित्वोपयोगिव्यापारानाश्रयत्वे सति इति वक्तव्यम्, अयमेव ध्रुवपदार्थः।' इति। तादृशं ध्रुवत्वमेवापादनत्वमित्याचार्याणामाशयः। लघुशब्देन्दुशेखरेपि दृश्यतेनुरूपा मतिराचार्याणाम्।

अपादानपञ्चम्या अर्थविषये चाचार्येण वैयाकरणसिद्धान्तलघुमञ्जूषायां पर्यालोचितम् - 'पञ्चम्या अपदानत्वशक्तिमानर्थः। अपादाने पञ्चमीति सूत्रात्'[25] इति। परमलघुमञ्जूषायाञ्चोपस्थापितमाचार्येण 'पञ्चम्यर्थोवधिः'[26] इति। एतस्य टीकायां वंशीमिश्रेणालोचितम्-'अवधिः अपादानत्वशक्तिमामन्।..... अपादानत्वशक्तिमान् क्रियाकारकभावसम्बन्धश्च अपादानपञ्चम्यर्थ इति निष्कर्षः'[27] इति। एवं कृते पर्यालोचने दृश्यते यत नागेशनये अपादानपञ्चम्यर्थोवधिः। अपादानत्वशक्तिमान् क्रियाकारकभावसम्बन्धश्च तदपरपर्यायः।

अधुना शाब्दबोधप्रकारः पर्यालोच्यते। वृक्षात्पर्णं पततीति वाक्ये वृक्षात् इत्यत्र पञ्चम्यर्थः अपादानत्वशक्तिमान्। प्रकृत्यर्थोभेदेन सम्बन्धेन विशेषणम्। एवमुक्तवाक्यात् – वृक्षाभिन्नापादाननिष्ठक्रियाकारकसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतावत् पर्णाभिन्नकर्तृनिष्ठक्रियाकर्तृभावसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतावद्विभागपूर्वकपतनम् इति। अनुरूपमेव पर्वतात् पततः अश्वात् अश्ववाहः पतति इत्यस्य - पर्वताभिन्नापादाननिष्ठक्रियाकारकभावसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतावत्पतनाश्रयो यो हि अश्वः तदभिन्नापादाननिष्ठक्रियाकारकभावसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतावदश्ववाहाभिन्नकर्तृनिष्ठक्रिया-कारकभावसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतावद्विभागपूर्वं पतनमित्यर्थः।

परस्परान्मेषौ अपसरतः इत्यस्य च परस्पराभिन्नापादाननिष्ठक्रियाकारकभावसम्बन्धावच्छिन्ना या प्रकारता तन्निरूपिता या विशेष्यता तद्वत्, द्वित्वविशिष्टमेषाभिन्नापादाननिष्ठा क्रियाकारकभावसम्बन्धावच्छिन्ना या प्रकारता तन्निरूपिता या विशेष्यता तद्वदपसरणमित्यर्थः समायाति।

एवं कृते पर्यालोचने दृश्यते अपादानकारकविहितपञ्चम्यर्थविषये तयोः विशेषमतिरस्ति। तदर्थानुसारञ्च शाब्दबोधप्रकारोपि भिन्न इति सोदाहरणमिहोपस्थापितम्।

ङस् ओस् आम् इति त्रिकस्य षष्ठी इति प्राचीनैः संज्ञा विहिता। षष्ठीविभक्तिरपि प्रातिपदिकात् कारके विशेषार्थे उपपदे च परे विधीयते। वस्तुतः कर्तरि कर्मणि च कारके कृद्योगे षष्ठी प्रातिपदिकात् विधीयते। अतः कर्तरि विहितायाः षष्ठ्याः अर्थ कर्ता कर्मणि च विहितायाः षष्ठ्याः अर्थः कर्म इति। अतः कारके विहितायाः षष्ठ्या विषये न तथा विमर्शो दार्शनिकनिकाये दृश्यते। पूर्ववदेव कर्तृकारकस्य कर्मकारकस्य चार्थावबोधः कार्यः, प्रातिपदिकार्थेन च प्रत्ययार्थस्यान्वयोनुरूपमेव विज्ञेयः।

## अधिकरणकारकविहितसुबर्थपर्यालोचनम् –

**कौण्डभट्टनये** तु अधिकरणसप्तम्यर्थः आश्रयो भवति। भट्टोजिदीक्षिताचार्याणामपीहानुरूपा मतिः। तथा हि निगदितं भट्टोजिदीक्षितेन- 'आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तेरेव वा। यथायथं

---

[25] वैयाकरणसिद्धान्तलघुमञ्जूषायां पत्रसंख्या – १२८४ (प्रकाशनवर्षम् - २६, प्रकाशकः – राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली)

[26] वंशीटीकायुतपरमलघुमञ्जूषायां पत्रसंख्या – १८३ (प्रकाशनवर्षम् - २६, प्रकाशकः – चौखाम्बा विद्याभवनम्, वाराणसी)

[27] वंशीटीकायुतपरमलघुमञ्जूषायां पत्रसंख्या – १८३ (प्रकाशनवर्षम् - २६, प्रकाशकः – चौखाम्बा विद्याभवनम्, वाराणसी)

विभक्त्यर्थः सुपां कर्मेति भाष्यतः'[28] इति। कस्याः विभक्तेः आश्रयोर्थः इति जिज्ञासायां वैयाकरणमतोन्मज्जनटीकाकारो वदति- 'द्वितीयातृतीयासप्तमीनामाश्रयोऽर्थः'[29] इति। तस्मादिदं समागतं यत भट्टोजिदीक्षितमते आधारसप्तम्या आश्रयः अर्थः।

**वाक्यपदीये निगदितम्-**

'कर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियाम्।
उपकुर्वत्क्रियासिद्धौ शास्त्रेधिकरणं स्मृतम्।।'[30] इति।

एतदेव आयाति यत्, परम्परया यः क्रियाश्रयो भवति स एव अधिकरणं भवति। एवं च अधिकरणपदार्थः परम्परया क्रियाश्रयः, तत्र क्रियायाः धातुनैव लाभात्तस्याः शब्दगततया अनन्यलभ्यत्वात् आश्रयमात्रं सप्तम्यर्थ इति भावः। आश्रयत्वं च अखण्डोपाधिरूपं शक्यतावच्छेदकमिति मतिः।

**कौण्डभट्टनये** आधारसप्तम्याः आश्रयः अर्थो वर्तते। वैयाकरणभूषणसारे तेन निगदितम्- 'सप्तम्याः अप्याश्रयोर्थः। सप्तम्यधिकरणे च इति सूत्रात्। तच्च आधारोधिकरणम् इति सूत्रात् प्रतीयते आधारः।'[31] इति। सप्तम्यधिकरणे चेति सूत्रेण अधिकरणे सप्तमी भवति। तत्र अधिकरणस्वरूपबोधकं सूत्रं च आधारोधिकरणमिति तदनुसारं अधिकरणं नाम आधारः, आश्रयः, इत्यनयोश्च आनुपूर्वीकृत एव भेदः, न तु अर्थकृतः, तस्मात् अधिकरणे सप्तमी भवतीति कृत्वा सप्तम्याः अधिकरणमर्थः, अधिकरणमर्थः, अधिकरणं च आधारः, स च आश्रयानतिरिक्तः इति कृत्वा सप्तम्याः आश्रयः अर्थः इति सिद्धमिति भावः। प्राचीनवैयाकरणानां नये अधिकरणकारकस्य स्ववृत्तितद्वृत्तित्वरूपपरम्परासम्बन्धेन साक्षादेव क्रियायामेव अन्वयः भवति। यथा देवदत्तः कटे आस्ते इत्यत्र स्वम्- अधिकरणं कटः, तद्वृत्तिः कर्ता देवदत्तः, तद्वृत्तित्वं च आसनक्रियायां वर्तते तस्मात् स्ववृत्तितद्वृत्तित्वरूपपरम्परासम्बन्धेन कटः आसनक्रियायामन्वेति।

कौण्डभट्टनये शाब्दबोधप्रकारो हि - स्थाल्यामोदनं गृहे मैत्रः पचतीत्यत्र स्थाल्यामिति स्थले सप्तम्यर्थः आश्रयः। तत्र प्रकृत्यर्थस्य स्थाल्याः अभेदसम्बन्धेन अन्वयः स्यात्। आश्रयस्य च स्ववृत्तितद्वृत्तित्वसम्बन्धेन अन्वयः भवति। अमर्थः आश्रयः, तत्र ओदनस्य अभेदसम्बन्धेन अन्वयः स्यात्। आश्रयस्य धात्वर्थे विक्लित्तौ आधाराधेयभावसम्बन्धेन अन्वयः बोध्यः। विक्लित्तेः जन्यजनकभावसम्बन्धेन पचिधात्वर्थे अधिश्रयणादिरूपे व्यापारे अन्वयः। गृहपदोत्तरसप्तम्याः आश्रयः अर्थः। तत्र प्रकृत्यर्थस्य गृहस्य अभेदसम्बन्धेन अन्वयः स्यात्। आश्रयस्य च धात्वर्थे व्यापारे स्ववृत्तितद्वृत्तित्वस्वसम्बन्धेन अन्वयः स्यात्। मैत्रस्य तिबर्थे आश्रये अभेदसम्बन्धेन अन्वयः भवति। आश्रयस्य च धात्वर्थव्यापारे आधाराधेयभावसम्बन्धेन अन्वयः स्यात्। ततश्च शाब्दबोधः भवति- स्थाल्यभिन्नाश्रयवृत्तिः ओदनाभिन्नाश्रयवृत्तिः या विक्लित्तिः, तदनुकूलः गृहाभिन्नाश्रयत्ववृत्तितद्वृत्तिः मैत्राभिन्नाश्रयवृत्तिः अधिश्रयणादिरूपव्यापार इति।

**नागेशभट्टनये** अधिकरणसप्तम्याः अधिकरणत्वशक्तिमान् अर्थो भवति। सिद्धान्तलघुमञ्जूषायां तेनोक्तम्- 'अधिकरणसप्तम्याः अधिकरणत्वशक्तिमानर्थः। अधिकरणे सप्तमीति सूत्रात्'[32] इति।

---

28 वैयाकरणमतोन्मज्जने कारिकासंख्या -२ (पत्रसंख्या १, प्रकाशनवर्षम् १९९८, प्रकाशकः भारतीयविद्यासंस्थानम्, वाराणसी, उत्तरप्रदेशः)

29 वैयाकरणमतोन्मज्जने कारिकासंख्या -२, पत्रसंख्या १, (प्रकाशनवर्षम् १९९८, प्रकाशकः भारतीयविद्यासंस्थानम्, वाराणसी, उत्तरप्रदेशः)

30 अम्बाकर्त्रीयुतवाक्यपदीये तृतीयकाण्डे द्वितीयभागे पत्रसंख्या ३७५ (प्रकाशनवर्ष- १९९७, प्रकाशकः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वारणसी, उत्तरप्रदेशः)

31 दीपिकायुतवैयाकरणभूषणसारे पत्रसंख्या- १७५ (प्रकाशनवर्षम्- २१, प्रकाशकः मिथिलासंस्कृतशोधसंस्थानम्, दरभङ्गा, विहारः)

32 वैयाकरणसिद्धान्तलघुमञ्जूषायां पत्रसंख्या- १३२२ (प्रकाशनवर्षम्- २६,प्रकाशकः राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली)

वैयाकरणसिद्धान्तमञ्जूषायां निगदितम्- 'कारकसप्तम्याश्चाधिकरणमर्थः, अधिकरणे सप्तमी इति सूत्रात्[33] इति। एवं वक्तुं शक्यते यत् नागेशनये अधिकरणसप्तमीविभक्तेः अधिकरणत्वशक्तिमान् व्यापारः क्रियाकरकभावसम्बन्धाश्चार्थः।

नागेशनये शाब्दबोधप्रकारो हि- स्थाल्यामोदनं गृहे मैत्रः पचति इत्यत्र सप्तम्यर्थः अधिकरणत्वशक्तिमान्, तत्र प्रकृत्यर्थस्य स्थाल्याः अभेदसम्बन्धेनान्वयः भवति। अधिकरणत्वशक्तिमतश्च ओदने आधाराधेयभावसम्बन्धेन अन्वयः स्यात्। अमर्थः कर्मत्वशक्तिमान् तत्र ओदनस्याभेदसम्बन्धेन अन्वयः स्यात्। कर्मत्वशक्तिमतश्च विषयस्य पच्धात्वर्थे विक्लित्तौ क्रियाकर्मभावसम्बन्धेन अन्वयः स्यात्। विक्लितेश्च जन्यजनकभावसम्बन्धेन पचिधात्वर्थे अधिश्रयणादिरूपे व्यापारे अन्वयः स्यात्। गृहपदोत्तरसप्तम्याः अधिकरणत्वशक्तिमान् अर्थः, तत्र प्रकृत्यर्थस्य गृहस्य अभेदसम्बन्धेन अन्वयः भवति। अधिकरणत्वशक्तिमतश्चार्थस्य चैत्रे आधाराधेयभावसम्बन्धेन अन्वयः भवति। मैत्रस्य तिबर्थे कर्तरि गृहस्य अभेदसम्बन्धेन अन्वयः स्यात्। कर्तुश्च धात्वर्थव्यापारे क्रियाकर्तृभावसम्बन्धेनान्वयः भवति। ततश्च शाब्दबोधः स्यात्-

स्थाल्यभिन्नाधिकरणत्वशक्तिमन्निष्ठौदनाभिन्नकर्मत्वशक्तिमद्विशिष्टविक्लित्त्यनुकूलः गृहाभिन्नाधिकरण-त्वशक्तिमन्निष्ठमैत्राभिन्नकर्तृत्वशक्तिमद्विशिष्टः अधिश्रयणादिव्यापारः इति। एवमिहापि कृते पर्यालोचने सुष्पष्टतया आचार्ययोः मिथः अधिकरणकारकविहितसुबर्थविषये मतानैक्यमस्ति इति दृश्यते। तदनुगुणञ्च शाब्दबोधप्रकारस्य वैभिन्न्यं सोदाहरणमिहोपस्थापितम्।

**उपसंहृतिः –**

न केवलं सुबर्थपर्यालोचनावसरे अपि च धात्वर्थविषये, तिङर्थविषये, कृदर्थविषये अन्यत्र च एते आचार्याः स्वकीयराद्धान्तान् विशेषतया प्रतिपादितवन्तः। यद्यपि सूत्रक्रमानुसारं प्रक्रियानुसारं वा आधुनिककाले नवीनग्रन्थाः शोधकार्याणि च बहुलतया दृश्यन्ते न तथा दार्शनिकसिद्धान्तपरम्परायाः विकाशः दृश्यते। अनेन प्रबन्धेन अहं पाणिनीयतन्त्रमाश्रित्यैव दार्शनिकदृशा एकस्यैव विषयस्य सयुक्तिकं भिन्नमतोपस्थापनमाचार्याभ्यां विहितम् इति प्रदर्शितवान्। एतेन प्रेरिताः सन्तो विद्वांसो ये च व्याकरणशास्त्रे कृतभूरिपरिश्रमाः आधुनिकगवेषकाः वैयाकरणदार्शनिकज्ञानपरम्परायाः चर्चां कुर्वन्तु नवीनतत्त्वानाञ्चोपस्थापनं विदधतु। तदैव पुनः अन्तःसलिला वैयाकरणदार्शनिकज्ञानपरम्परा पुनः प्रकटिता सती कुलं प्लावयन्ती प्रवाहिता भविष्यति। विना च व्याकरणज्ञानपरम्पराचर्चां तादृशं कार्यमनायाससाध्यं भवेत्। अत एवास्ति महान् उपयोगो दार्शनिकदृशा व्याकरणज्ञानपरम्पराचर्चायाः इति निष्कर्षः।

[33] वैयाकरणसिद्धान्तमञ्जूषायां पत्रसंख्या- १९९ (प्रकाशनवर्षम्- १९७७, प्रकाशकः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, उत्तरप्रदेशः)

**सहायकग्रन्थसूची –**

कौण्डभट्टः. **वैयाकरणभूषणसारः**. सम्पा. अनु. भीमसेनशास्त्री. वाराणसी : चौखम्बासंस्कृतभवनम्. १९९२.

नागेशभट्टः. **परमलघुमञ्जूषा**. सम्पा. लोकमणिदाहालः.वाराणसी : चौखम्बासुरभारतीप्रकाशनम्. २११.

नागेशभट्टः. **परमलघुमञ्जूषा**. सम्पा. व्याख्याकारः डाँ जयशङ्करलालत्रिपाठी. वाराणसीः चौखम्बा कृष्णदास अकादमी.२०४१ (वि.सं)

पतञ्जलिः. **अष्टाध्यायी.** सम्पा. आचार्य पं. सत्यनारायण खण्डूड़ी..वाराणसीः चौखम्बा कृष्णदास अकादमी.२०१४.

भट्टोजिदीक्षितः**.वैयाकरणसिद्धान्तकौमुदी**. सम्पा. गिरिधरशर्मा परमेश्वरानन्दशर्मा. प्रथमखण्डः. दिल्लीः मोतीलालबनारसीदासः.२०१०.

# पाणिनीयदिशा पुंवद्भावस्योत्सर्गापवादभावविमर्शः

**कौशिक-प्रधानः**

[इह शोधप्रबन्धे पुंवद्भावस्योत्सर्गापवादभावः यथाग्रन्थं विमृश्य प्रतिपादितः]

**प्रमुखाः विन्दवः—**
प्रवृत्तिनिमित्तम्, प्रवृत्तिनिमित्तभेदाच्छब्दप्रकाराः, भाषितपुंस्कः, पुंवद्भावः, उत्सर्गापवादभावश्चेत्यादयः।

**प्रस्तावना—**

ऐन्द्र-चान्द्र-काशकृत्स्नादिव्याकरणेषु रत्नायमानं साङ्गोपाङ्गं संस्कृतव्याकरणं पाणिनीयमेव समुपलभ्यते। पूर्वोक्तेषु व्याकरणेषु समग्रस्य शब्दराशेः व्युत्पत्तिसामर्थमदृष्ट्वा पाणिनिमुनिः लौकिकवैदिकोभयविधप्रयोगसाधनार्थं महेश्वरप्रसादप्राप्तौजसा शब्दसिद्धिप्रतिपादनपरां सूत्रेषूपनिबद्धामष्टाध्यायीग्रन्थं प्रणिनाय। अस्य ग्रन्थरत्नस्यात्यन्तं सुसंगतं सूक्ष्मतमपदार्थावद्योतनसामर्थ्यं पश्यन्तः प्राच्याः पाश्चात्याश्च विद्वांसो मुक्तकण्ठेनैनं प्रशंसन्ति। मुण्डकोपनिषद्यपराविद्यायाः प्रसङ्गे षडङ्गेन साकं चत्वारो वेदाः समुपदिष्टाः।[1] वेदमूलकत्वात्सर्वेषां व्याकरणाध्ययनमवश्यं कर्तव्यम्। वेदार्थप्रतिपादकेषु सुप्रसिद्धेषु षड्वेदाङ्गेषु सकलशास्त्रेषु च व्याकरणं[2] तथास्याराधकत्वाद् वैयाकरणाः[3] प्रमुखाः सन्ति। अतः शब्दसाधुत्वप्रतिपादनपरं व्याकरणशास्त्रं लोके सुप्रसिद्धं जातम्। व्याकरणाध्ययनावसरे मयापि पुंवद्भावविषयः पठितः, तत्र सन्ति नैके विधिनिषेधाः, ततः प्रारम्भे किञ्चित् काठिन्यमनुभूयते मादृशैः पाठार्थिभिः। इह शोधपत्रे एतेषां समेषां विधिनिषेधानां सरलीकरणाय यथामति प्रयत्नः मया कृतः।

**प्रवृत्तिनिमित्तं नाम किम्?**

यथा कञ्चिद् विशेषज्ञानं प्रति सामान्यज्ञानं कारणं भवति, तथा भाषितपुंस्कज्ञानायादौ प्रवृत्तिनिमित्तं किमिति ज्ञातव्यम्। प्रवृत्तिनिमित्तं नाम वाच्यत्वे सति वाच्यार्थवृत्तित्वे सति वाच्यार्थे प्रकारतया भाषमाणत्वम्। एवं प्रवृत्तिनिमित्तं चित्रत्वरूपम्, यत्सर्वेषु लिङ्गेषु एकम् अर्थाद् यद्विशेषणं पुरस्कृत्य घटादिशब्दास्तत्तद्व्यक्तिषु प्रयुज्यन्ते तद्विशेषणं प्रवृत्तिनिमित्तमित्युच्यते। तदुक्तं शेखरे— ''यदर्थज्ञानेन तद्विशिष्टे शब्दस्य प्रवृत्तिस्तत्प्रवृत्तिनिमित्तम्'' इति।[4] प्रवृत्तिनिमित्तम्पदशक्यतावच्छेदकम्। यथा, घटत्वं घटपदस्य प्रवृत्तिनिमित्तम्। एवं शुक्लादिपदस्य शुक्लत्वम्, पाचकादेः पाककर्तृत्वम्, देवदत्तादेस्तत्पिण्डादौ नाम आकृतिविशेषे प्रवृत्तिनिमित्तम्भवति। प्रवृत्तिनिमित्तशब्दस्य व्युत्पत्तिः— प्रवृत्तेः= शब्दानामर्थबोधनशक्तेः निमित्तम् प्रयोजकम् इति। तच्च शक्यतावच्छेदकम्भवतीति ज्ञेयम्। तल्लक्षणञ्च प्रकारतया शक्तिग्रहविषयत्वमिति तत्त्वचिन्तामणौ श्रीगङ्गेशोपाध्यायाः। शक्यतावच्छेदकं नाम वाच्यतावच्छेदकमिति।

**प्रवृत्तिनिमित्तभेदाच्छब्दस्य प्रकाराः—**

स्फोटात्मकशब्द आस्यावयवैः उच्चारितः सन् ध्वन्यात्मको भवति। तस्य स्फोटात्मकशब्दस्य प्रयोजको भवति प्रतिभा, प्रतिभेयमेव शब्दार्थः। शब्दप्रयोगेण वक्तुः प्रतिभया श्रोतुः प्रतिभा स्फुरिता भवति। वक्तृश्रोत्रोः प्रतिभाद्वयस्य तादात्म्यसम्पादनमेव शब्दप्रयोगस्य लक्ष्यम्। वागर्थौ तु सम्पृक्तावित्याचार्यैः प्रतिपादितौ। भर्त्तृहरिणा वागर्थस्यापृथक्त्वमेवं भणितम् ''एकस्यैवात्मनो भेदौ शब्दार्थावपृथक्स्तितौ।।'' इति।[5] वस्तुतस्तु शब्दः, अर्थः, ज्ञानञ्चैकलोलीभूतमभिन्नञ्च। तदुक्तं हेलाराजेन— ''लोलीभूतानि शब्दार्थज्ञानानि घट इत्येवमवगम्यते'' इति।[6]

उत्पत्त्यवस्थाविशेषेण चतस्रः वाचः- परा, पश्यन्ती, मध्यमा, वैखरी चेति। अनुशासनदृष्ट्या वैखरी वाक् पुनः नाम-आख्यात-उपसर्ग-निपात-कर्मप्रवचनीयभेदेन विभक्ता। एते शब्दाः प्रवृत्तिनिमित्तभेदाच्चतुर्विधाः। यद् विशेषणमाश्रित्याभिधेयार्थे शब्दः प्रयुज्यते, तद् विशेषणमेव शब्दप्रवृत्तेः निमित्तम्। प्रवृत्तिनिमित्तभेद एव शब्दभेदस्य हेतुः। शब्दार्थे प्रयोक्तुः या प्रवृत्तिर्भवति, सा प्रवृत्तिः प्रवृत्तिनिमित्तभेदाच्चतुर्विधा।[7] ताः प्रवृत्तयः- जातिः, गुणः, क्रिया, यदृच्छा चेति।[8] प्रवृत्तेः चतुर्विधत्वाच्छब्द अपि चतुर्विधो भवति। भाष्यकारेण शब्दस्य त्रिधा प्रवृत्तिः स्वीकृता, सिद्धान्ते यदृच्छाशब्दः तेन प्रत्याख्यातः।[9] वस्तुविशेषः कदापि शब्दस्य प्रवृत्तिनिमित्तं न भवति, किञ्च वस्तुसामान्यमेव शब्दप्रवृत्तौ निमित्तं भवति। यथा, घटशब्दस्य प्रवृत्तिनिमित्तं कम्बुग्रीवादिमद् वस्तुसामान्यम्।

**किं नाम भाषितपुंस्कम्?**

भाषितः पुमान् येन तद्भाषितपुंस्कमिति बहुव्रीहिः। तदस्यास्तीति विग्रहे अर्शआद्यचा भाषितपुंस्कशब्दो निष्पद्यते। यः शब्दः यत् प्रवृत्तिनिमित्तमाश्रित्य पुंलिङ्गे प्रवर्तते तदेव प्रवृत्तिनिमित्तमाश्रित्य यदि अन्यस्मिन् लिङ्गे प्रवर्तते तदा तद् भाषितपुंस्कं भवति। वासुदेवदीक्षितेनापि मनोरमायामेवमेव उच्यते— ''*भाषितः पुमान् येन तद्भाषितपुंस्कं, तदस्यास्तीति अर्शआद्यच्। पुंस्त्वे स्त्रीत्वे च एकप्रवृत्तिनिमित्तकमिति यावत्।*'' इति।[10] इत्थं भाषितपुंस्कस्य निर्वचनं सर्वैः नाङ्गीकृतम्। तत्र जिनेन्द्रबुद्धिना कथ्यते— यद्यत्र भाषितः पुमान येन तद्भाषितपुंस्कमित्युच्येत तर्हि कुटीभार्यः द्रोणीभार्य इत्यादावतिप्रसङ्गः स्यात्। भवति हि कुटशब्दो घटे पुंलिङ्गो, गेहे तु स्त्रीलिङ्गः।[11] द्रोणशब्दस्तु परिमाणविशेषे पुंलिङ्गो, गवादन्यां तु स्त्रीलिङ्ग इति। नागेशेनापि शेखरे पूर्वोक्तमतं समर्थितं स्यात्। तेनोद्यते यत्- भाषितः पुमान येनेति तु नोक्तम्, किमर्थं नोक्तम्? कुटीजीविक इत्यादावतिप्रसङ्गात्। यतो हि कुटशब्दो घटे पुमान्, गेहे स्त्री। गर्भिभार्यः प्रसूतभार्य इत्यत्र तु गर्भी व्रीहिः, प्रसूतोऽयम इत्यादिप्रयोगात्पुंस्त्वविशिष्टस्यापि बोधनाद्भाषितपुंस्कत्वमस्ति, उभयत्रापि गर्भसम्बन्धोऽपत्याऽपत्यवत्सम्बन्धः प्रवृत्तिनिमित्तमिति।[12] अतः भाषितः पुमान् यस्मिन्नर्थे प्रवृत्तिनिमित्ते (समानायामाकृतौ) स भाषितपुंस्कशब्देनोच्यते इति कैयटादयः। काशिकायामप्येवमेव निर्वचनं प्रदत्तं स्यात्—''*भाषितः पुमान् यस्मिन्नर्थे प्रवृत्तिनिमित्ते स भाषितपुंस्कशब्देनोच्यते। तद्योगादभिधेयमपि यन्नपुंसकं तदपि भाषितपुंस्कम् तस्य प्रतिपादकं यच्छब्दरूपं तदपि भाषितपुंस्कम।*'' इति।[13] रामभद्राचार्येण तदीये राघवतोषिण्यां भाषितपुंस्कशब्दस्य सारभूतं कारिकाद्वयं निर्मीयते—

*''भाषितश्च पुमान येन सुप्रवृत्तिनिमित्ततः।*
*तद्वै भाषितपुंस्कं हि नित्यमेवावतिष्ठते।।*

*यस्मिन् भाषितपुंस्कं हि नित्यमेवावतिष्ठते।*
*तच्च शब्दस्वरूपं हि भाषितपुंस्कमीरितम्।'*[14] इति।

सर्वे तृच्-तृन्-प्रत्ययान्तशब्दाः उभयोः लिङ्गयोः प्रयुज्यन्ते, अतः एते सर्वे शब्दाः भाषितपुंस्काः सन्ति।

भाषितपुंस्कशब्दस्योक्तपुंस्कनाम्ना क्वचिद् व्यवहारः प्राप्यते। यथा- लघुसिद्धान्तकौमुद्याम् 'स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु (६.३.३४)' इति सूत्रवृत्तौ- उक्तपुंस्कादनूङ्.. इति। प्रक्रियाकौमुद्यामपि शब्दस्यास्य प्रयोगः प्राप्यते।[15] भाषितपुंस्कविषये शब्दानुशासने इतस्ततः प्रयुक्तायां प्रसिद्धकारिकायामप्यस्य शब्दस्योल्लेखः प्राप्यते। तद्यथा—

*''यन्निमित्तमुपादाय पुंसि शब्दः प्रवर्तते।*
*क्लीबवृत्तौ तदेव स्यादुक्तपुंस्कं तदुच्यते।।''* इति।

एवञ्च नपुंसकत्वे लिङ्गान्तरे च यस्य एकमेव वाच्यतावच्छेदकं तच्छब्दस्वरूपं भाषितपुंस्कशब्देन विवक्षितम्।

**पुंवद्भावः किम्?**

पुंवदिति रूपातिदेशः। पुंस इव पुंवदिति षष्ठन्ताद्वतिः। तदाह बालमनोरमा— ''*पुंवाचकस्येव रूपमिति।*''[16] पुंसीव पुंवद् इत्यत्र वतिः 'तत्र तस्येव (५.१.११६)' इति सूत्रेण। पुंवदित्यत्र पुंशब्देन तुल्यमित्यर्थः ग्रहणीयो भवतीति पदमञ्जर्यां हरदत्तः।[17] पुंवदिति वचनाज्ज्ञायतेऽतिदेशोऽयम अर्थात पुंस इवास्याः (स्त्रियाः) कार्यं भवतीति। भाष्यकारेणाप्येवं निगदितम्— ''*एवं जातीयकस्य स्त्रीशब्दस्य पुंशब्दातिदेशो भवती*'' ति।[18] पुंसीव अवस्था तन्नाम आकृतिः प्राप्त यः शब्दः, तस्य पुंवद्भावेनाभिधानम्।

**पुंवद्भावप्रकरणम्—**

अष्टाध्याय्याः षष्ठाध्याये तृतीयपादे 'अलुगुत्तरपदे (६.३.१)' इत्यधिकारे पुंवद्भावप्रकरणमन्तर्भूतमस्ति। अत्रावधेयम् 'अलुगि'ति ६.३.२४ इत्यन्तमधिक्रियते, 'उत्तरपदे' इति पादान्तमधिक्रियते। तत्र 'स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु (६.३.३४)' इति सूत्रादारभ्य 'पुंवत् कर्मधारयजातीयदेशीयेषु (६.३.४२)' इति सूत्रं यावत् नवसूत्रेषु पुंवद्भावः चर्चितो वर्तते। प्रकरणमिदम् 'उत्तरपदे' इत्यधिकारे वर्तते इति स्मर्तव्यम् इह प्रकरणे विद्यमानानां सूत्राणां प्रकृतिः संक्षेपेण पट्टिकामाध्यमेन प्रदीयते।

| | |
|---|---|
| | • पुंवद्भावविधायकान्युत्सर्गसूत्राणि |
| १. | स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु (६.३.३४) |
| २. | तसिलादिष्वाकृत्वसुचः (६.३.३५) |
| ३. | क्यङ्मानिनोश्च (६.३.३६) |
| | • पुंवद्भावनिषेधकान्यपवादसूत्राणि |
| ४. | न कोपधायाः (६.३.३७) |
| ५. | संज्ञापूरण्योश्च (६.३.३८) |
| ६. | वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे (६.३.३९) |
| ७. | स्वाङ्गाच्चेतोऽमानिनि (६.३.४०) |

| | |
|---|---|
| ८. | जातेश्च (६.३.४१) |
| | • पुंवद्भावनिषेधं प्रबाध्य पुन: पुंवद्भावविधायकसूत्रम् |
| ९. | पुंवत् कर्मधारयजातीयदेशीयेषु (६.३.४२) |

इतोऽपि 'तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य (७.१.७४)' इत्यनेन विभाषया पुंवद्भाव: उक्त:। किञ्च कैश्चिद् वार्तिकैरपि पुंवद्भावस्य विधानं भवति। यथा, 'तसिलादि..( ६.३.३५)' इति सूत्रे पाठितै: 'शसि बह्वल्पार्थस्य पुंवद्भावो वक्तव्य:', 'त्वतलोर्गुणवचनस्य', 'भस्याढे तद्धिते', 'ठक्छसोश्च' इत्येतै: वार्तिकै: पुंवद्भाव: कृत:। अपि च 'आन्महत: समानाधिकरणजातीययो: (६.३.४६)' इति सूत्रे पाठितेन 'महत आत्वे घासकरविशिष्टेषूपसंख्यानं पुंवद्भावश्च' इति वार्तत्तकेन पुंवद्भावस्योपसंख्यानं भवति। 'तेन सहेति तुल्ययोगे (२.२.२८)' इति सूत्रे भाष्ये उक्तया 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावो वक्तव्य:' इति इष्ट्यापि पुंवद्भावो भवति। इत ऊर्ध्वमेतेषां समेषां समासेन यथाशास्त्रमनुक्रंस्यते मया।

**उत्सर्गसूत्राणां विमर्श:—**

महतो महत: शब्दौघान् अल्पायासेन प्रतिपादनाय पाणिनिना किञ्चित्सामान्यविशेषवल्लक्षणं शास्त्रं व्यरच्यत। तत्सामान्यविशेषवल्लक्षणं भवत्युत्सर्गापवादौ। तत्र सामान्येनोत्सर्ग: कर्त्तव्य:, तस्य विशेषेणापवाद: इति।[19] अत्रापि केषुचन सूत्रेषूत्सर्गरूपेण पुंवद्भावस्य विधानं भवति, केषुचिदपवादरूपेण तस्य पुंवद्भावस्य प्रतिषेधो विधीयते। आदौ तावदुत्सर्गाणां विषये चर्चा क्रियते।

भाषितपुंस्कादनूङ:= अर्थाद् यस्माद् भाषितपुंस्काच्छब्दाद् ऊङ्प्रत्ययो न कृतस्तस्य स्त्रीलिङ्गस्य शब्दस्य पूरणीप्रियादिवर्जिते स्त्रीलिङ्गे समानाधिकरणे उत्तरपदे परत: पुंलिङ्गशब्दस्येव रूपं भवतीति 'स्त्रिया: पुंवद्... (६.३.३४)' इत्यस्य सूत्रार्थ:। 'उत्तरपदे' इत्यधिकारे पठितमस्ति सूत्रमिदम्। अत: उत्तरपदाधिकारे पुंवद्भाव: प्रकृतसूत्रेणातिदिश्यते। इह सूत्रे 'स्त्रिया:' इति पदे स्त्रीशब्देन कस्य ग्रहणमिष्टमित्याशङ्क्य भाष्ये त्रय: पक्षा: सम्भाविता: नाम स्त्रीशब्देन प्रत्ययग्रहणं वा, शब्दग्रहणं वा, अर्थग्रहणं वेति। तत्र प्रत्ययपक्षे अर्थपक्षे च दोषमुद्भाव्य स्त्रीशब्देन मध्यमपक्ष: नाम शब्दपक्ष: स्वीक्रियते, येन सूत्रार्थ: सङ्गति: स्यात्। भाषितपुंस्कविषये आदावालोचितं तत्रैव द्रष्टव्यम्। ऊङ्[20] इति कश्चन स्त्रीप्रत्यय:, न ऊङ् अनूङ् इति नञ्तत्पुरुष: अथवा ऊङोऽभाव: अनूङ् इति अर्थाभावेऽव्ययीभाव:। भाषितपुंस्काद् अनूङ् इति भाषितपुंस्कादनूङ्, तस्या:= भाषितपुंस्कादनूङ् इति बहुव्रीहिनञ्गर्भितपञ्चमीतत्पुरुष:। अत्रास्मादेव निपातनात् पञ्चम्या अलुग् वेदितव्य:। ''छन्दोवत्सूत्राणि भवन्ति'' इति छन्दोवशाच्च पदमिदं लुप्तषष्ठीकम्। समानमधिकरणं यस्य तत् समानाधिकरणम्, तस्मिन् समानाधिकरणे इति बहुव्रीहि:। प्रिया आदिर्येषान्ते प्रियादय:[21], पूरणी (पूर्यते अनेन इत्यस्मिन् अर्थे पृ-धातो: ल्युटि पूरण इति शब्द: सिद्ध्यति, पूरणरूप: अर्थ: यस्य प्रत्ययस्य, तदन्तो भवति पूरणी) च प्रियादयश्च ते पूरणीप्रियादय:, न पूरणीप्रियादय इति अपूरणीप्रियादय:, तेषु= अपूरणीप्रियादिषु इति बहुव्रीहिद्विन्द्वगर्भितनञ्तत्पुरुष:। वाक्यशेषाध्याहारात् पुंवदित्यनेन स्त्रीप्रत्ययस्य निवृत्ति: शक्यते विज्ञातुम्। अत: यस्माद् भाषितपुंस्काच्छब्दाद् ऊङ्प्रत्ययो न कृतस्तस्य स्त्रीशब्दस्य पूरणीप्रियादिवर्जिते स्त्रीलिङ्गे समानाधिकरणे उत्तरपदे परत: पुंशब्दातिदेशो भवति। उदाहरणेन स्पष्टीक्रियते— दर्शनीया भार्या यस्य स: ((देवदत्त:)= दर्शनीयभार्य:। अत्र दर्शनीया एवं भार्या

इत्येतयो: समर्थयो: 'अनेकमन्यपदार्थे (२.२.२४)' इति सूत्रेण बहुव्रीहिसमास: जात:। भाषितपुंस्कादनूङ: 'दर्शनीया' (दर्शनीयत्वरूपे एकस्मिन् प्रवृत्तिनिमित्ते लिङ्गान्तरेऽपि शब्दोऽयं प्रयुज्यते) इति स्त्रीलिङ्गशब्दस्य पूरणीप्रियादिरहिते स्त्रीलिङ्गे 'भार्या' इति समानाधिकरणे उत्तरपदे परत: प्रकृतसूत्रेण नाम 'स्त्रिया: पुंवद्... (६.३.३४)' इत्यनेन पुंलिङ्गशब्दस्येव रूपं (दर्शनीय) भवति। दर्शनीयभार्या, तत: 'गोसात्रयोरुपसर्जनस्य (१.२.४८)' इत्येनन भार्याशब्दस्य ह्रस्वे स्वादिकार्ये च दर्शनीयभार्य: इति रूपं सिद्ध्यति। इतराणि कानिचनोदाहरणानि पट्टिकायां दीयते—

| | **विग्रहवाक्यम** | **विशेष्यम्** | **विशेषणम्** | **लिङ्गम्** |
|---|---|---|---|---|
| १. | श्लक्ष्णा चूडा यस्य | स: (यज्ञदत्त:) | श्लक्ष्णचूड: | पुंसि |
| २. | दीर्घे जङ्घे यस्य | स: (भीम:) | दीर्घजङ्घ: | पुंसि |

सूत्रे 'स्त्रिया:' इत्यभावे ग्रामणि ब्राह्मणकुलं दृष्टिरस्य स: ग्रामणिदृष्टिरित्यत्रापि पुंस्त्वापत्ति: स्यात्, तद्वारणाय 'स्त्रिया:' इत्युक्तम्। सीता भार्या यस्य स: सीताभार्य: राम: इत्यादौ पुंवद्भाव: स्यात्, तद्वारणाय 'भाषितपुंस्काद्' इत्युच्यते। अत्र सीताशब्दे सीतारूपसंज्ञाया: व्यक्ते: वा (यदृच्छारूपं प्रवृत्तिनिमित्तम्) लिङ्गान्तरेषु नैव समानम्। प्रवृत्तिनिमित्ततुल्यत्वाभावे द्रोणीभार्य: इत्यादौ पुंवद्भाव: भवति। परन्त्वत्र द्रोणत्वं न तुल्यम्, पुंस्त्वे परिमाणपरमिदम्, स्त्रीत्वे गवादन्यपरम्। 'अनूङ्' इत्यभावे ब्रह्मबन्धूभार्य:, वामोरूभार्य: इत्यादौ ऊङ्प्रत्ययान्तेऽपि पुंवद्भाव: स्यात्। 'समानाधिकरणे' इत्यस्याभावे व्यधिकरणेऽप्युत्तरपदे परे पूर्वपदस्य पुंवद्भावापत्ति: स्यात्। यथा, कल्याण्या माता कल्याणीमाता इत्यत्र पुंवद्भावो मा भूत् तदर्थं 'समानाधिकरणे' इति। 'स्त्रियाम्' इत्यभावे कल्याणी प्रधानमेषां कल्याणीप्रधाना इमे इत्यत्र पुंवद्भाव: प्राप्यते, तद्वारणाय 'स्त्रियाम्' इत्युक्तम् 'अपूरणी' इति किम्? तदभावे कल्याणी पञ्चमी यासां ता: कल्याणीपञ्चमा रात्रय:, कल्याणीदशमा: इत्यादौ पूरणी परे (पूरणप्रत्ययान्त: पञ्चमी दशमा च परे) पुंस्त्वापत्तिर्भवति। शीलवती प्रिया यस्य स: शीलवतीप्रिय:, कल्याणीप्रिय: इत्यादौ पुंस्त्ववारणाय 'प्रियादिषु' इत्युक्तम्। अत्रावधेयं 'दृढभक्तिश्च शूरश्च' इति चाणक्यवचने पुंस्त्वं कथं, यतो हि भक्तिशब्दस्य प्रियादिषु पाठान्निषेधाच्च। अत्र अस्त्रीवाचिन: पूर्वपदस्य दृढशब्दस्य विवक्षिततत्वाद् दृढभक्तिरिति लक्ष्यं सिद्धमित्येवं समाधेयम्। स्त्रीत्वमिह न विवक्षितम्, तस्मादस्त्रीलिङ्गस्य दृढशब्दस्यायं प्रयोगो भवति। किञ्च पदसंस्कारेण दृढं भक्तिरस्येति वाच्यम् एवम् अभाविष्ट पृथिवीव्यक्तकातर: इत्यत्रापि ज्ञेयमिति दुर्घटवृत्तौ शरणदेव:।[22]

तसिलादिषु प्रत्ययेषु परतो भाषितपुंस्कादनूङ:= यस्माद् भाषितपुंस्काच्छब्दाद् ऊङ्प्रत्ययो न कृतस्तस्य स्त्रीलिङ्गस्य शब्दस्य पुंलिङ्गशब्दस्येव रूपं भवतीति 'तसिलादिषु...(६.३.३५)' इत्यस्य सूत्रार्थ:। पूर्वसूत्रात् 'स्त्रिया: पुंवद्भाषितपुंस्कादनूङ्' इत्यनुवर्ते। स्मर्तव्यम् 'उत्तरपदे' इत्यधिकार: नाश्रीयतेऽत्रार्थासम्भवात्।[23] तसिल् आदिर्येषां ते तसिलादय:, तेषु= तसिलादिषु इति बहुव्रीहि:। आ इत्यव्ययम्, कृत्वसुच: पञ्चम्यन्तम् त्रिपदमिदं सूत्रम्। 'पञ्चम्यास्तसिल् (५.३.७)' इत्यारभ्य 'संख्याया: क्रियाभ्यावृत्तिगणने कृत्वसुच् (५.४.१७)' इत्यन्तं ये प्रत्ययास्तेषु परेषु भाषितपुंस्कादनूङ: स्त्रिया: पुंवद्भवतीति। आकृत्वसुच: इत्यत्र किमर्थमभिविधौ समास: न कृत: इति तु चिन्त्यम्। इह तसिलादय आकृत्वसुच: पठ्यमानेषु केषुचित पुंवद्भावो नेष्यते, अपि च केषुचिदन्यत्र पठ्यमानेषु पुंवद्भाव इष्यते। अत:

भाष्यकारेण तसिलादिषु परिगणनं कर्तव्यमित्युच्यते। तत्र तसिलादिषु 'त्रतसौ, तरप्तमपौ, चरड्जातीयरौ, कल्पब्देशीयरौ, रूप्यप्पाशपौ, थम्थालौ, दार्हिलौ, तिल्थ्यनौ' चेत्येताः अन्तर्भवन्ति। एतेषु प्रत्ययेषु परेषु भाषितपुंस्कादनूङः स्त्रिशब्दस्य पुंशब्दातिदेशो भवतीत्यर्थः। उदाहरणं यथा, तस्याः शालायाः (आगतः) इति विग्रहे तच्छब्दात् 'पञ्चम्यास्तसिल् (५.३.७)' इत्यनेन तसिलि 'तत् + ङसि् + तसिल् इति जाते सुपो लुकि 'तत् + तसिल् इति स्थिते तसिलः 'प्राग्दिशो विभक्तिः (५.३.१)' इति विभक्तिसंज्ञकत्वात् 'त्यदादीनामः (७.२.१०२)' इति त्यदाद्यत्वे, स्त्रीत्वविवक्षायां 'अजाद्यतष्टाप् (४.१.४)' इति टापि अनुबन्धलोपे च 'त + आ + तस्' इति जाते 'तसिलादिषु..(६.३.३५)' इत्यनेन पुंवद्भावे टापः आकारस्य निवृत्तौ 'त + तस्' इत्यवस्थायां विभक्तिकार्ये, 'तद्धितश्चासर्वविभक्तिः (१.१.३८)' इत्यनेनाव्ययसंज्ञायाम्, सुपो लुकि, रुँत्वे विसर्गे च 'ततः' इति रूपं निष्पन्नं भवति। इतराण्युदाहदणानि पट्टिकायां प्रदशर्यते—

| | तसिलादिप्रत्ययाः | विग्रहवाक्यम् | प्रक्रिया |
|---|---|---|---|
| १. | त्रल् (सप्तम्यास्त्रल् ५.३.१०) | तस्यां शालायाम् | तत् + ङि + त्रल्<br>तत् + त्रल्<br>त + अ + त्रल् (त्यदादीनामः ७.२.१०२)<br>त + आ (टाप्) + त्रल् (अजाद्यतष्टाप् ४.१.४)<br>त + (×) + त्रल्<br>तत्र |
| २. | तसिल् (पञ्चम्यास्तसिल् ५.३.७) | यस्याः शालायाः | यत् + ङसि + तसिल्<br>यत् + तस्<br>य + अ + तस् (त्यदादीनामः ७.२.१०२)<br>य + आ (टाप्) + तस् (अजाद्यतष्टाप् ४.१.४)<br>य + (×) + तस्<br>यतः |
| ३. | तमप् (अतिशायने तमबिष्ठनौ ५.३.५५) | सर्वाः इमाः दर्शनीयाः, इयमासामतिशयेन दर्शनीया | दर्शनीया + तमप् (अतिशायने तमबिष्ठनौ ५.३.५५)<br>दर्शनीया + तम (हलन्त्यम् १.३.३)<br>दर्शनीय + आ + तम<br>दर्शनीय + (×) + तम<br>दर्शनीय + तम + टाप् (अजाद्यतष्टाप् ४.१.४)<br>दर्शनीयतमा + सुँ<br>दर्शनीयतमा (स्त्रियाम्) |

एवमेव तरप्प्रत्यये- दर्शनीयतरा, चरड्प्रत्यये- पूर्वं पट्वी इति पटुचरी, जातीयरि- पट्व्याः प्रकारा इति पटुजातीया, कल्पप्प्रत्यये- ईषदसमाप्ता पट्वी इति पटुकल्पा, देशीयरि- ईषदसमाप्ता पट्वी इति पटुदेशीयी, रूप्यप्प्रत्यये- प्रशस्ता दर्शनीया इति दर्शनीयरूपा, पाशप्प्रत्यये- याप्या दर्शनीया इति दर्शनीयपाशा, थमुप्रत्यये- कया आकृत्या इति कथम्, थाल्प्रत्यये- यया आकृत्या इति यथा, दाप्रत्यये- तस्यां वेलायामिति तदा, र्हिल्प्रत्यये- तस्यां वेलायामिति तर्हि, तिल्प्रत्यये- प्रशस्ता वृकी इति वृकतिः, थ्यन्प्रत्यये- अजाभ्यः हिता इति अजथ्या।

प्रकृतसूत्रे पाठितैः कैश्चिद्वार्तिकैरपि पुंवद्भावः उक्तः। तेषां संक्षेपेणालोचनं क्रियते— 'शसि बह्वल्पार्थस्य पुंवद्भावो वक्तव्यः' इत्यनेन वार्तिकेन शसि परे बह्वर्थकस्य अल्पार्थकस्य च पुंस्त्वमुक्तम्। यथा, बह्वीभ्यः देहि इति बहुशः इत्यत्र पुंस्त्वे ङीषो निवृत्तिर्भवति। एवमेव अल्पाभ्यः देहि इति अल्पशः इत्यत्र पुंस्त्वे टापो निवृत्तिर्भवति। 'त्वतलोर्गुणवचनस्य' इति वार्तिकेन त्वप्रत्यये तल्प्रत्यये च परे गुणोपसर्जनद्रव्यवाचिनः पुंस्त्वं भवति। यथा, पट्व्या भावः इति विग्रहे त्वप्रत्यये- पटुत्वम्, तल्प्रत्यये- पटुता इत्यत्र पट्वी-शब्दात् त्वे तलि च प्रत्यये परे प्रकृतवार्तिकेन पुंवद्भावे ङीपो निवृत्तिर्भवति। गुणवचनस्येत्युक्तत्वात् कर्त्र्या भावः कत्रीत्वमित्यत्र पुंवद्भावो न भवति। 'सतीत्वं सखि! रक्षणीयम्'श्इत्यत्र कथं न पुंवद्भावः, अत्र 'न कोपधायाः (६.३.३७)' इति सूत्रे न इति योगविभागात् प्रतिषेधः। एवमेव तन्वीत्वम् इत्यत्रापि ज्ञेयम्।[24] 'भस्याढे तद्धिते' ढभिन्ने तद्धिते परे स्त्रियाः पुंवद्भावो भवति। यथा, हस्तिनीनां समूहः हास्तिकम् इत्यत्र पुंस्त्वे नान्तलक्षणङीपो निवृत्तिर्भवति। 'ठक्छसोश्च' इति वार्तिकेन ठकि छसि च प्रत्यये परे स्त्रियाः पुंवद्भावो भवति। यथा, भवत्याः छात्रः इति भवतीशब्दात् 'भवतष्ठक्छसौ (४.२.११५)' इत्यनेन ठकि छसि च कृते प्रकृतवार्तिकेन पुंवद्भावे, ठस्य ककारदेशे, वृद्धौ च- भावत्काः इति, छस्य ईयादेशे, जश्त्वे- भवदीयाः इति निष्पन्नं भवति। अपि च 'कुक्कुट्यादीनामण्डादिषु' इति वार्तिकेन कुक्कुटी-प्रभृतीनाम् अण्डाद्यसमानाधिकरणे उत्तरपदे परे पुंवद्भावो भवति। यथा, कुक्कुट्या अण्डम् इति कुक्कुटाण्डम् इत्यत्र पुंस्त्वेन जातिलक्षणङीषो निवृर्तत्तभवति। एवमेव मृग्याः क्षीरमिति मृगक्षीरम्, मृग्याः पदमिति मृगपदम्, काक्याः शाव इति काकशावः। तसिलादिष्वेतेषामन्त र्भावो नास्तीति हेतोः पृथक्तया वक्तव्यम्।

क्यङ्प्रत्यये मानिनि शब्दे चोत्तरपदे भाषितपुंस्कादनूङः= यस्माद् भाषितपुंस्काच्छब्दाद् ऊङ्प्रत्ययो न कृतस्तस्य स्त्रीलिङ्गस्य शब्दस्य पुंलिङ्गशब्दस्येव रूपं भवतीति 'क्यङ्मानिनोश्च (६.३.३६)' इत्यस्य सूत्रार्थः। अत्रापि पूर्वसूत्रात् 'स्त्रियाः पुंवद्भाषितपुंस्कादनूङ'् इत्यनुवर्ते। 'उत्तरपदे' इत्यधिकारो वर्तते। क्यङ्मानिनोः सप्तम्यन्तम्, च इत्यव्ययम्। क्यङ् च मानिन् च तौ क्यङ्मानिनौ, तयोः= क्यङ्मानिनोः इति इतरेतरयोगद्वन्द्वः। मानिनि इत्यनेन साकम् उत्तरपदे इत्यस्यान्वयः। क्यङ् इति कश्चन प्रत्ययः। अतः क्यङि मानिनि चोत्तरपदे भाषितपुंस्कादनूङ स्त्रिशब्दस्य पुंशब्दातिदेशो भवतीत्यर्थः। क्यङ्प्रत्यये परे उदाहरणम् एनी इवाचरति इति विग्रहे 'कर्त्तुः क्यङ् सलोपश्च (३.१.११)' इत्यनेन क्यङि, अनुबन्धलोपे 'एनी + य' इति जाते प्रकृतसूत्रेण पुंवद्भावे 'एत + य' इति स्थिते 'अकृत्सार्वधातुकयोर्दीर्घः (७.४.२४)' इत्यनेनाजन्ताङ्गस्य दीर्घे 'एताय' इति जाते ततः लटि कर्तरि प्रथमायाः एकवचने प्रक्रियाकार्ये 'एतायते' इति रूपं सिद्ध्यति। तद्वत् श्येनी इवाचरतीति श्वेतायते। अत्रावधेयम्- 'एत श्येत' इत्यनयोः स्त्रीत्वविवक्षायां 'वर्णादनुदात्तात् तोपधात् तो न (४.१.३९)' इत्यनेन ङीपि तकारस्य नकारे 'एनी श्येनी' इत्येतौ सिद्ध्यतः। एनी नाम विचित्रवर्णयुक्ता, श्येनी भवति श्वेतवर्णयुक्ता। मानिन इत्युत्तरपदे उदाहरणम्–दर्शनीयामिमां

मन्यते (इयं सीता) इति विग्रहे 'उपपदमतिङ् (२.२.१९)' इत्यनेनोपपदतत्पुरुषसमासे, प्रातिपदिकत्वात् सुपो लुकि 'दर्शनीया + मानिन् इति स्थिते प्रकृतसूत्रेण पुंवद्भावे 'दर्शनीयमानिन् इति जाते स्त्रीत्वविवक्षायाम् 'ऋन्नेभ्यो ङीप् (४.१.५)' इति ङीपि अनुबन्धलोपे स्वादिकार्ये च 'दर्शनीयमानिनी' इति रूपं सिद्ध्यति। दर्शनीयामिमां मन्यते (अयं रामः) इति दर्शनीयमानी (रामः)। दर्शनीयमात्मानं मन्यते इति विग्रहे पूर्वेण 'स्त्रियाः पुंवद्...(६.३.३४)' इत्यनेन सिद्धे वैयधिकरण्यप्रदर्शनार्थं (दर्शनीयमानी अयमस्याः, दर्शनीयमानिनी इयमस्याः) मानिन् इत्यस्योपादानम्।[25] तदुक्तं कौमुद्याम्— ''*स्वभिन्नां कांचिद्दर्शनीयां मन्यते दर्शनीयमानिनी। दर्शनीयां स्त्रियं मन्यते दर्शनीयमानी चैत्रः।*'' इति।

इतोऽपि 'तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य (७.१.७४)' इत्यनेन भाषितपुंस्कमिगन्तं नपुंसकं शब्दरूपं तृतीयादिष्वजादिविभक्तिषु परतो गालवाचार्यस्य मतेन पुंवद् (पुंसा तुल्यमिति) भवति। अर्थात् यथा पुंसि ह्रस्वनुमौ न भवतस्तथात्रापि न भवत इत्यर्थः। मतमिदं गालवाचार्यस्य न तु पाणिनेः, अतः विकल्पः सिद्ध्यति। उदाहरणम्—

| **विभक्तयः** | **गालवाचार्यस्य मतम् (ग्रामणीर्ब्राह्मणः)** | **पाणिनेः मतम् (ग्रामणि ब्राह्मणकुलम्)** |
|---|---|---|
| टा | ग्रामण्या ब्राह्मणकुलेन | ग्रामणिना ब्राह्मणकुलेन |
| ङे | ग्रामण्ये ब्राह्मणकुलाय | ग्रामणिने ब्राह्मणकुलाय |
| ङसि | ग्रामण्यः ब्राह्मणकुलात् | ग्रामणिनः ब्राह्मणकुलात् |
| ङस् | ग्रामण्यः ब्राह्मणकुलस्य | ग्रामणिनः ब्राह्मणकुलस्य |
| ओस् | ग्रामण्योः ब्राह्मणकुलयोः | ग्रामणिनोः ब्राह्मणकुलयोः |
| आम् | ग्रामण्यां ब्राह्मणकुलानाम् | ग्रामणीनां ब्राह्मणकुलानाम् |
| ङि | ग्रामण्यां ब्राह्मणकुले | ग्रामणिनि ब्राह्मणकुले |

ग्रामण्या इत्यत्र ग्रामणीशब्दः ब्राह्मणकुलस्य विशेषणत्वात् नपुंसि विद्यते, तस्मात् 'स्वौजस..(४.१.२)' इत्यनेन टा-प्रत्यये अनुबन्धलोपे 'ग्रामणी + आ' इति जाते प्रकृतसूत्रेण गालवाचार्यस्य मते पुंवद्भावे सति 'ह्रस्वो नपुंसके प्रातिपदिकस्य (१.२.४७)' इति प्राप्तः ह्रस्वादेशः एवञ्च 'इकोऽचि विभक्तौ (७.२.७३)' इति प्राप्तो नुमागमो न भवति। किञ्च 'एरनेकाचोऽसंयोगपूर्वस्य (६.४.८२)' इत्यनेन यणादेशो भवति 'ग्रामण्या' इति। परन्तु पाणिनिमते पूर्वोक्तः ह्रस्वादेशो नुमागमश्च भवति, तेन 'ग्रामणिना' इति सिद्ध्यति। एवमेवान्यासु विभक्तिषु बोध्यम्।

'आन्महतः समानाधिकरणजातीययोः (६.३.४६)' इति सूत्रे पाठितेन 'महत आत्वे घासकरविशिष्टेषूपसंख्यानं पुंवद्भावश्च' इति वार्त्तिकेन घास-कर-विशिष्टेषु परतो महत आत्त्वं पुंवत्त्वं च वक्तव्यम्। 'आन्महतः..(६.३.४६)' इत्यात्त्वे 'पुंवत्कर्मधारय..(६.३.४२)' इति पुंवत्त्वे च सिद्धे किमर्थमिदं वार्त्तिकम्, असामानाधिकरण्यार्थं वार्त्तिकमिदं वक्तव्यम्। यथा, महतो महत्या वा कर इति महाकरः, महतो महत्या वा विशिष्ट इति महाविशिष्टः, महतो महत्या वा घास इति महाघासः।

'तेन सहेति तुल्ययोगे (२.२.२८)' इति सूत्रे भाष्ये उक्तया 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावो वक्तव्यः' इति इष्ट्यापि कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपेषु पञ्चसु वृत्तिषु सर्वनाम्नः पुंवद्भावो वक्तव्यः। यथा, दक्षिणपूर्वा दिक् इत्यत्र समानाधिकरणलक्षणस्य पुंवद्भावस्याप्राप्तत्वाद्, अनयेष्ट्या पुंवद्भावः विहितः।

**अपवादसूत्राणां विमर्शः—**

एतावता पुंवद्भावस्य प्रवृत्तिः चर्चिता, इदानीं प्रसङ्गप्राप्तस्य तस्य निवृत्तिरुच्यते। 'न कोपधायाः (६.३.३७)' इत्यनेन यस्माद् भाषितपुंस्काच्छब्दाद् ऊङ्प्रत्ययो न कृतस्तस्य ककारोपधस्य स्त्रीलिङ्गशब्दस्य उत्तरपदे परतः पुंलिङ्गशब्दस्येव रूपं न भवति। सूत्रमिदमुत्तरपदाधिकारे वर्तते, 'स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्' इत्यनुवर्तते। क उपधा यस्याः सा कोपधा, तस्याः= कोपधायाः इति बहुव्रीहिः। भाषितपुंस्कादनूङः कोपधायाः स्त्रियाः उत्तरपदे परे पुंवद्भावो न। प्राप्तस्य पुंवद्भावस्य प्रकृतसूत्रेण प्रतिषेधः क्रियते। उदाहरणेन स्पष्टीक्रियते—

| **समानाधिकरणे उत्तरपदे परे** | | | | |
|---|---|---|---|---|
| ◆ पाचिकाभार्यः, मद्रिकाभार्यः, वृजिकाभार्यः, रसिकाभार्यः<br>➢ अनेकमन्यपदार्थे (२.२.२४) इत्यनेन बहुव्रीहिसमासः। | | | | |
| **विग्रहवाक्यम्** | **विशेष्यम्** | **विशेषणम्** | **पुंवद्भावप्राप्तिः** | **पुंवद्भावप्रतिषेधः** |
| पाचिका भार्या यस्य | सः देवदत्तः | पाचिकाभार्यः | पाचिका + भार्या (स्त्रियाः पुंवद्.. ६.३.३३) इत्यनेन पुंवद्भावस्य प्राप्तिः स्यात्। | पाचिका (ककारोपधशब्दः) + भार्या (न कोपधायाः ६.३.३७) इत्यनेन प्राप्तस्य पुंवद्भावस्य प्रतिषेधो भवति। |
| मद्रिका (मद्रदेशे भवा) भार्या यस्य | सः पाण्डुः | मद्रिकाभार्यः | मद्रिका + भार्या (स्त्रियाः पुंवद्.. ६.३.३३) इत्यनेन पुंवद्भावस्य प्राप्तिः स्यात्। | मद्रिका (ककारोपधशब्दः) + भार्या (न कोपधायाः ६.३.३७) इत्यनेन प्राप्तस्य पुंवद्भावस्य प्रतिषेधो भवति। |

| **तसिलादिषु परेषु** | | | |
|---|---|---|---|
| ◆ मद्रिकाकल्पा, वृजिकाकल्पा<br>➢ ईषदसमाप्तौ कल्पब्देश्यदेशीयरः (५.३.६७) इत्यनेन कल्पप्। | | | |
| **विग्रहवाक्यम्** | **तद्धितवृत्तिः** | **पुंवद्भावप्राप्तिः** | **पुंवद्भावप्रतिषेधः** |
| ईषदसमाप्ता मद्रिका ईषदसमाप्ता वृजिका | मद्रिकाकल्पा वृजिकाकल्पा | मद्रिका वृजिका च + कल्पप् (तसिलादिष्वाकृत्वसुचः ६.३.३५) इत्यनेन पुंवद्भावस्य प्राप्तिः। | मद्रिका वृजिका च (ककारोपधशब्दौ) + कल्पप् (न कोपधायाः ६.३.३७) इत्यनेन प्राप्तस्य पुंवद्भावस्य प्रतिषेधो भवति। |

**क्यङ्प्रत्यये परे**

◆ मद्रिकायते, वृजिकायते

➢ कर्त्तुः क्यङ् सलोपश्च (३.१.११) इत्यनेन क्यङ्।

| विग्रहवाक्यम् | तद्धितवृत्तिः | पुंवद्भावप्राप्तिः | पुंवद्भावप्रतिषेधः |
|---|---|---|---|
| मद्रिकेवाचरति<br>वृजिकेवाचरति | मद्रिकायते बाला।<br>वृजिकायते गोपा। | मद्रिका वृजिका च + क्यङ् (क्यङ्मानिनोश्च ६.३.३६) इत्यनेन पुंवद्भावप्राप्तिः। | मद्रिका वृजिका च (ककारोपधशब्दः) + क्यङ् (न कोपधायाः ६.३.३७) इत्यनेन प्राप्तस्य पुंवद्भावस्य प्रतिषेधो भवति। |

**मानिनि उत्तरपदे परे**

◆ मद्रिकामानिनी, वृजिकामानिनी

➢ उपपदमतिङ् (२.२.१९) इत्यनेन उपपदतत्पुरुषसमासः

| विग्रहवाक्यम् | विशेष्यम् | विशेषणम् | पुंवद्भावप्राप्तिः | पुंवद्भावप्रतिषेधः |
|---|---|---|---|---|
| मद्रिकामिमां मन्यते | इयं नारी | मद्रिकामानिनी | मद्रिका + मानिन् (क्यङ्मानिनोश्च ६.३.३६) इत्यनेन पुंवद्भावप्राप्तिः। | मद्रिका (ककारोपधशब्दः) + मानिन् (न कोपधायाः ६.३.३७) इत्यनेन प्राप्तस्य पुंवद्भावस्य प्रतिषेधो भवति। |
| वृजिकामिमां मन्यते | इयं स्त्री | वृजिकामानिनी | वृजिका + मानिन् (क्यङ्मानिनोश्च ६.३.३६) इत्यनेन पुंवद्भावप्राप्तिः। | वृजिका (ककारोपधशब्दः) + मानिन् (न कोपधायाः ६.३.३७) इत्यनेन प्राप्तस्य पुंवद्भावस्य प्रतिषेधो भवति। |

अत्र पूर्वोक्तानां त्रयाणामुत्सर्गसूत्राणामपवादस्थलं प्रकृतसूत्रेण निर्दिश्यते। सर्वेषामपवादानामित्थं पर्यालोचना क्रियते चेत् शोधपत्रस्य कलेवरः वर्ध्यते, अतः अवशिष्टानामपवादविषयाणां संक्षेपेण शब्दशः उल्लेखः क्रियते।

'संज्ञापूरण्योश्च (६.३.३८)' इति सूत्रमुत्तरपदाधिकारे वर्तते, 'स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्' एवञ्च 'न' इत्यनुवर्तते। संज्ञा च पूरणी च ते संज्ञापूरण्यौ, तयोः= संज्ञापूरण्योः इति इतरेतरयोगद्वन्द्वः। भाषितपुंस्कादनूङः संज्ञावाचिनः पूरणप्रत्ययान्तस्य च स्त्रीलिङ्गस्य शब्दस्य उत्तरपदे परतः पुंलिङ्गशब्दस्येव रूपं न भवतीत्यस्य सूत्रार्थः। भाषितपुंस्कादनूङः संज्ञावाचिनः स्त्रीलिङ्गस्य शब्दस्य उत्तरपदे परतः उदाहरणम्— गुप्ता[26] भार्या यस्य सः हरिः भवति गुप्ताभार्यः। बहुव्रीहिसमासान्ते गुप्ताभार्य इति शब्दे 'स्त्रियाः पुंवद्..(६.३.३४)' इत्यनेन पुंवद्भावापत्तिः स्यात्, परन्तु गुप्ता इति संज्ञाशब्दत्वात् प्रकृतसूत्रेण पुंवद्भावो निषिध्यते। एवमेव दत्ता भार्या यस्य सः इन्द्रो भवति दत्ताभार्यः, अत्रापि दत्ता इति संज्ञाशब्दात् पुंवद्भावो न भवति। तसिलादिषु परेषु यथा, याप्या[27] दत्ता सा (नारी) इति दत्तापाशा, याप्या गुप्ता सा (स्त्री) इति गुप्तापाशा इत्यादावपि 'तसिलादिषु.. (६.३.३५)' इत्यनेन प्राप्तस्य पुंवद्भावस्य प्रकृतसूत्रेण

प्रतिषेधः क्रियते। क्यङ्प्रत्यये परे यथा, दत्तेवाचरति इति दत्तायते (अम्बिका), गुप्तेवाचरति इति गुप्तायते (बाला) अत्रापि 'क्यङ्मानिनोश्च (६.३.३६)' इति सूत्रप्राप्तस्य पुंवद्भावस्य प्रकृतसूत्रेण प्रतिषेधो भवति। मानिनि उत्तरपदे परे यथा, दत्तामिमां मन्यते इयम (नारी) इति दत्तामानिनी, गुप्तामिमां मन्यते इयम (स्त्री) इति गुप्तामानिनी इत्यत्रापि प्राप्तस्य पुंवद्भावस्य प्रतिषेधो भवति। भाषितपुंस्कादनूङः पूरणीप्रत्ययान्तस्य स्त्रीलिङ्गस्य शब्दस्य उत्तरपदे परतः उदाहरणम्— पञ्चमी[28] भार्या यस्य सः (हरिः) पञ्चमीभार्यः, एवमेव दशमीभार्यः इत्यत्र पूरणीप्रत्ययान्तस्य स्त्रीशब्दस्योत्तरपदे परे पुंवद्भावो न भवति। तसिलादिषु परे यथा, याप्या पञ्चमी इति पञ्चमीपाशा, दशमीपाशा। क्यङ्प्रत्यये परे यथा, पञ्चमीवाचरति इति पञ्चमीयते, दशमीयते। मानिनि उत्तरपदे परे यथा, आत्मानं पञ्चमीं मन्यते इति पञ्चमीमानिनी, दशमीमानिनी।

'वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे (६.३.३९)' इति सूत्रमुत्तरपदाधिकारे वर्तते, 'स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्' एवञ्च 'न' इत्यनुवर्तते। वृद्धेर्निमित्तं यस्मिन् सः वृद्धिनिमित्तः, तस्य= वृद्धिनिमित्तस्येति बहुव्रीहिः। रक्तं च विकारश्च एतयोः समाहारो रक्तविकारम्, न रक्तविकारमिति अरक्तविकारम्, तस्मिन् अरक्तविकारे इति समाहारद्वन्द्वगर्भितनञ्तत्पुरुषः। रक्ते विकारे चार्थेऽविहितो यो वृद्धिनिमित्तस्तद्धितप्रत्ययः, तदन्तस्य भाषितपुंस्कादनूङः स्त्रीशब्दस्य उत्तरपदे परतः पुंशब्दस्येव रूपं न भवतीति सूत्रार्थः। तद्धितेषु वृद्धिनिमित्तं भवन्ति ञणकाः। अरक्तविकारे वृद्धिनिमित्तस्य तद्धितस्य सम्बन्धभूतायाः स्त्रियः उत्तरपदे परे न पुंवद्भाव इत्याशयः। उदाहरणम्— स्त्रौघ्नी[29] (स्त्रुघ्ने भवा) भार्या यस्य सः स्त्रौघ्नीभार्यः (देवदत्तः), माथुरी (मथुरायां भवा) भार्या यस्य सः माथुरीभार्यः (कंसः) इत्यादौ पुंवद्भावापत्तिः स्यात् स्त्रियाः पुंवदित्यादिसूत्रेण, परन्तु अत्रारक्तविकारे विहितस्य वृद्धिनिमित्ततद्धितप्रत्ययान्तस्य स्त्रौघ्नी माथुरी चेति स्त्रिशब्दस्योत्तरपदे परे प्रकृतसूत्रेण प्रतिषेधो भवति। तसिलादिषु परेषु यथा, याप्या स्त्रौघ्नी इति स्त्रौघ्नीपाशा, माथुरीपाशा। क्यङि परे यथा, स्त्रौघ्नीवाचरति इति स्त्रौघ्नीयते बाला, माथुरीयते। मानिनि उत्तरपदे परे यथा, आत्मानं स्त्रौघ्नीं मन्यते इति स्त्रौघ्नीमानिनी, माथुरीमानिनी। यस्य स्त्रीशब्दस्य वृद्धिनिमित्ततद्धितान्तत्वं नास्ति तत्र पुंवद्भावस्य निषेधो न फलति। यथा, मध्यमा भार्या यस्य सः मध्यमभार्यः (अर्जुनः)। किञ्च रक्तविकारे विहितस्य वृद्धिनिमित्ततद्धितान्तस्य स्त्रीशब्दस्योत्तरपदे परे पुंवद्भावो भवति। यथा, रक्ते- कषायेन रक्ता काषायी, 'तेन रक्तं रागात् (४.२.१)' इति अणि, भसंज्ञायां, यकारोत्तराकारस्य लोपे, वृद्धौ, ङीपि च काषायी इति निष्पद्यते। काषायी कन्था यस्य सः काषायकन्थः, रक्तत्वात् पुंवद्भावनिषेधो न। तद्वद्विकारे यथा, हेम्नः विकारः हैमी, हैमी मुद्रिका यस्य सः हैममुद्रिकः (नृपः)। वृद्धिशब्देन वृद्धिं प्रति फलोपधानाभावाद् वैयाकरणभार्य इत्यत्र पुंवद्भावो भवति। यथा, वैयाकरणी[30] भार्या यस्य सः वैयाकरणभार्यः (कौशिकः)।

'स्वाङ्गाच्चेतोऽमानिनि (६.३.४०)' इति सूत्रमुत्तरपदाधिकारे वर्तते, ' स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्' एवञ्च 'न' इत्यनुवर्तते। स्वस्य अङ्गं स्वाङ्गम्, तस्मात स्वाङ्गादिति षष्ठीतत्पुरुषः। न मानी इति अमानी, तस्मिन अमानिनि इति नञ्तत्पुरुषः। ईकारान्तात् स्वाङ्गवाचिनो भाषितपुंस्कादनूङः स्त्रीलिङ्गस्य शब्दस्य मानिनिवर्जिते उत्तरपदे च परतः पुंलिङ्गशब्दस्येव रूपं न स्यादिति सूत्रार्थः। उदाहरणम्— उत्तरपदे परे यथा, दीर्घकेशी[31] भार्या यस्य सः दीर्घकेशीभार्यः (यज्ञदत्तः)। अत्र स्त्रियाः पुंवदित्यादिना पुंवद्भावस्य प्राप्तिः स्यात्, परन्तु प्रकृतसूत्रेण तस्य प्रतिषेधः क्रियते। तसिलादिषु परे यथा, याप्या दीर्घकेशी इति दीर्घकेशीपाशा (नारी), याप्या श्लक्ष्णकेशी इति श्लक्ष्णकेशीपाशा (स्त्री) इत्यादौ तसिलादिना पुंवद्भावप्राप्ते

प्रकृतसूत्रेण प्रतिषेधो विधीयते। क्यङि परे यथा, दीर्घकेशीवाचरति इति दीर्घकेशीयते (बाला), श्लक्ष्णकेशीवाचरति इति श्लक्ष्णकेशीयते (अम्बा) इत्यत्र 'क्यङ्मानिनोश्च' इत्यनेन पुंवद्भावस्य प्राप्तिः स्यात्, परन्तु प्रकृतसूत्रेण तन्निषिध्यते। सूत्रे मानिनिग्रहणाभावात् मानिनि उत्तरपदे परे पुंवद्भावस्य प्रतिषेधो न भवति। यथा, आत्मानं सुकेशीं मन्यते इति सुकेशमानिनी (स्त्री)। ईकारान्तत्वाभावादपि पुंवद्भावप्रतिषेधो न भवति। यथा, अविद्यमानाः केशा अस्या इति अकेशा, अकेशा भार्या यस्य सः अकेशभार्यः।

'जातेश्च (६.३.४१)' इति सूत्रमुत्तरपदाधिकारे वर्तते, 'स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्','न', 'अमानिनि' चेत्यनुवर्तते। येन जातिवाचिनो भाषितपुंस्कादनूङः स्त्रीलिङ्गशब्दस्य च मानिनिशब्दवर्जिते उत्तरपदे परे पुंलिङ्गशब्दस्येव रूपं न भवतीति सूत्रार्थ आयाति। उदाहरणम्— उत्तरपदे परे यथा, कठी[32] भार्या यस्य सः कठीभार्यः (ब्राह्मणः), बह्वृची भार्या यस्य सः बह्वृचीभार्यः (पण्डितः) इत्यत्र स्त्रियाः पुंवदित्यादिना पुंवद्भावप्राप्ते प्रकृतसूत्रेण तन्निषिध्यते जातिवाचित्वात्। तसिलादिषु परे यथा, याप्या कठी इति कठीपाशा (स्त्री), याप्या बह्वृची इति बह्वृचीपाशा (नारी) इत्यत्र तसिलादिना पुंस्त्वे प्राप्ते प्रकृतसूत्रेण तन्निषिध्यते। क्यङि परे यथा, कठीवाचरति इति कठीयते (बाला), बह्वृचीवाचरति इति बह्वृचीयते (शान्ता) इत्यत्र क्यङ्मानिनोश्च इत्यनेन पुंस्त्वे प्राप्ते प्रकृतसूत्रेण तन्निराक्रियते।

**प्रतिषेधप्राप्तस्य पुंवद्भावस्य पुनः पुंवद्भावविधानम्—**

एतावता पुंस्त्वस्य ये प्रतिषेधा आलोचिता, तेषां समेषां पुनः पुंवद्भावविधानं क्रियते 'पुंवत कर्मधारयजातीयदेशीयेषु (६.३.४२)' इत्यनेन योगेन। सूत्रमिदमुत्तरपदे इत्यधिकारे वर्तते, स्त्रियाः पुंवद्भाषितपुंस्कादनूङ इति चानुवर्तते। कर्मधारयश्च जातीयश्च देशीयश्च ते कर्मधारयजातीयदेशीयाः, तेषु= कर्मधारयजातीयदेशी-येषु इति इतरेतरयोगद्वन्द्वः। अतः सूत्रार्थो भाषितपुंस्कादनूङः स्त्रीशब्दस्य स्थाने कर्मधारयसमासे उत्तरपदे जातीयदेशीययोश्च प्रत्यययोः परतः पुंशब्दातिदेशः स्यात्। प्रतिषेधार्थोयमारम्भः। क्रमेणोदाह्रियते—

'न कोपधायाः (६.३.३७)' इत्युक्तः पुंवद्भावस्य प्रतिषेधः, तत्रापि पुनः प्रकृतसूत्रेण पुंवद्भावो भवति। यथा, कर्मधारये समानाधिकरणे उत्तरपदे परे— पाचिका चासौ वृन्दारिका[33] इति पाचकवृन्दारिका इत्यत्र ककारोपधत्वात् प्रतिषेधः प्राप्तः, तं प्रबाध्य प्रकृतसूत्रेण पुंशब्दातिदेशो भवति कर्मधारयसमासत्वात। जातीयदेशीययोः परतः— पाचिका प्रकारा[34] इति पाचकजातीया, ईषदसमाप्ता पाचिका[35] इति पाचकदेशीया इत्यत्र ककारोपधत्वात् प्रतिषेधः प्राप्तः, तं प्रबाध्य प्रकृतसूत्रेण पुंशब्दातिदेशो भवति जातीयदेशीययोः परतः।

'संज्ञापूरणयोश्च (६.३.३८)' इत्युक्तः पुंवद्भावस्य प्रतिषेधः, तत्रापि पुनः प्रकृतसूत्रेण पुंवद्भावो भवति। कर्मधारये— दत्ता चासौ वृन्दारिका इति दत्तवृन्दारिका इत्यत्र कर्मधारयसमासत्वात् संज्ञायामपि भवति पुंस्त्वं प्रकृतसूत्रेण। जातीयदेशीययोः— दत्ता प्रकारा इति दत्तजातीया, ईषदसमाप्ता दत्ता इति दत्तदेशीया इत्यत्र जातीयदेशीययोः परतः संज्ञायामपि भवति पुंस्त्वं प्रकृतसूत्रेण। पञ्चमी चासौ वृन्दारिका इति पञ्चमवृन्दारिका, पञ्चमी प्रकारा इति पञ्चमजातीया, ईषदसमाप्ता पञ्चमी इति पञ्चमदेशीया इत्यत्रापि कर्मधारयत्वात् जातीयदेशीययोश्च परतः पूरण्यामपि भवति पुंस्त्वम्—

'वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे (६.३.३९)' इत्युक्तः पुंवद्भावस्य प्रतिषेधः, तत्रापि पुनः प्रकृतसूत्रेण पुंवद्भावो भवति। कर्मधारये— स्रौघ्नी चासौ वृन्दारिका इति स्रौघ्नवृन्दारिका। जातीयदेशीययोः

परतः— स्रौघ्नी प्रकारा इति स्रौघ्नजातीया, ईषदसमाप्ता स्रौघ्नी इति स्रौघ्नदेशीया।

'स्वाङ्गाच्चेतोऽमानिनि (६.३.४०)' इत्युक्तः पुंवद्भावस्य प्रतिषेधः, तत्रापि पुनः प्रकृतसूत्रेण पुंवद्भावो भवति। कर्मधारये—श्लक्ष्णमुखी चासौ वृन्दारिका इति श्लक्ष्णमुखवृन्दारिका, जातीयदेशीययोः परतः— श्लक्ष्णमुखी प्रकारा इति श्लक्ष्णमुखजातीया, ईषदसमाप्ता श्लक्ष्णमुखी इति श्लक्ष्णमुखदेशीया। 'जातेश्च (६.३.४१)' इत्युक्तः पुंवद्भावस्य प्रतिषेधः, तत्रापि पुनः प्रकृतसूत्रेण पुंवद्भावो भवति। कर्मधारये— कठी चासौ वृन्दारिका इति कठवृन्दारिका, जातीयदेशीययोः परतः— कठी प्रकारा इति कठजातीया, ईषदसमाप्ता कठी इति कठदेशीया।

**उपसंहारः—**

इतोऽपि किञ्चिद् अवशिष्टानि विस्तरभियात्र नैवोल्लिख्यन्ते। विषयस्यास्य पठनवेलायां सावधानेन भवितव्यम्, यतो हीह प्रकरणे नैके विधिनिषेधाः सन्ति। विषयस्यास्य प्रकरणान्तरे नाम समासप्रकरणे तद्धितप्रकरणे (बहुव्रीहिः कर्मधारयश्चेत्यादिसमासे, तसिलादितद्धितेषु) चोपयोगो भवति। पुंवद्भावे कृते निष्पन्नाः शब्दाः प्रायः विशेष्यनिघ्नाः (विशेषणत्वेन प्रयुक्ताः) भवन्ति, अतः प्रयोगावसरे विशेष्यानुरोधेन लिङ्गनिर्धारणं कर्तव्यमिति सामान्यनियमः, परन्तु नियतलिङ्गकानां विषये व्यवस्था भिन्नास्ति। सुतरामभ्यासेन विषयेऽस्मिन् निष्णातो भविष्यतीति शिवम्।

**अन्त्यटीका—**

1 द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति- परा चैवापरा च। तत्रापरा- ऋग्वेदो, यजुर्वेदः, सामवेदोऽथर्ववेदः, शिक्षा, कल्पो, व्याकरणं, निरुक्तं, छन्दो, ज्योतिषमिति। (मुण्डकोपनिषदि- १.१.४-५)

2 प्रधानं च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति। (पस्पशाह्निके)

3 प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम्। (ध्वन्यालोकः, प्रथमोद्योते)

4 ६.३.३४ इत्यत्र शेखरे।

5 वाक्यपदीयम्, वाक्यकाण्डे (२.३१)

6 पदकाण्डम्, सम्बन्धसमुद्देशः, प्रकीर्णप्रकाशे (३.३.२)

7 शब्दानामर्थे या प्रवृत्तिरस्ति सा प्रवृत्तिनिमित्तभेदात् प्रकारचतुष्टयवतीत्यर्थः। (प्रत्याहारसूत्रम्- २, महाभाष्यप्रदीपोद्द्योते)

8 चतुष्टयी शब्दानां प्रवृत्तिः- जातिशब्दाः गुणशब्दाः क्रियाशब्दाः यदृच्छाशब्दाश्च। (प्रत्याहारसूत्रम्- २, महाभाष्ये)

9 त्रयी च शब्दानां प्रवृत्तिः- जातिशब्दाः गुणशब्दाः क्रियाशब्दाः इति न सन्ति यदृच्छाशब्दाः। (प्रत्याहारसूत्रम्- २, महाभाष्ये)।

10 ६.३.३४ इति सूत्रस्थं बालमनोरमायाम्।

11 ६.३.३४ इति सूत्रस्थं तत्त्वबोधिन्याम्।

12 ६.३.३४ इति सूत्रस्थं लघुशब्देन्दुशेखरे।

13 ७.१.७४ इति सूत्रस्थं काशिकायाम्।

14 वृत्तित्रयसमन्विता अष्टाध्यायी, ७.१.७४ इति सूत्रस्य राघवतोषिण्याम्।

15 उक्तपुंस्कात् परस्यानूङः स्त्रीप्रत्ययस्य पुंवत स्यादेकार्थे स्त्रीलिङ्गे पदे परे न तु पूरण्यां प्रियादौ च परतः। (प्रक्रियाकौमुद्याम्

६.३.३४)

16 ६.३.३४ इत्यत्र बालमनोरमायाम्।

17 ७.१.७४ इत्यत्र पदमञ्जर्याम्।

18 ६.३.३४ इत्यत्र भाष्ये।

19 सामान्येनोत्सर्गः कर्तव्यः। तद्यथा— कर्मण्यण् (३.२.१), तस्य विशेषेणापवादः। तद्यथा— आतोऽनुपसर्गे कः (३.२.३)। (महाभाष्यम्, पस्पशायाम्)

20 ऊङुतः (अ सू ४.१.६६)।

21 प्रिया। मनोज्ञा। कल्याणी। सुभगा। दुर्भगा। भक्तिः। सचिवा। अम्बा। कान्ता। क्षान्ता। समा। चपला। दुहिता। वामा। इति प्रियादिः।

22 दुर्घटवृत्ति, হিমাংশু ব্যাখ্যা যুক্ত। সম্পা- পার্বতী চক্রবর্তী। (পৃষ্ঠা- ४१७)

23 अनुत्तरपदार्थोऽयमारम्भः। (६.३.३५ इत्यस्य न्यासटीकायाम्)

24 दुर्घटवृत्ति, হিমাংশু ব্যাখ্যা যুক্ত। সম্পা- পার্বতী চক্রবর্তী। (পৃষ্ঠা- ४१৫)

25 मानिनि— दर्शनीयमानी अयमस्याः। दर्शनीयमानिनीयमस्याः। मानिनो ग्रहणमस्त्र्यर्थमसमानाधिकरणार्थं च। इह तु दर्शनीयामात्मानं मन्यते दर्शनीयमानिनीति पूर्वेणैव सिद्धम्। (६.३.३५ सूत्रस्य काशिकायाम्)

26 गुप्ताशब्दो गोपनक्रियाकृतौ स्वरूपे वा प्रवृत्तिनिमित्ते। (६.३.३८ इत्यस्य न्यासे)

27 याप्यन्ते= अपनीयन्ते तस्माद्गुणा इति याप्यः। (५.३.४७ इत्यस्य न्यासे)

28 पञ्चन + डट्, डटः 'नान्ताद..(५.२.४९)' इत्यनेन मटागमः, टित्त्वात् स्त्रीत्वविवक्षायां 'टिड्ढाणञ्..(४.१.१५)' इति ङीपि पञ्चमी इति।

29 स्त्रुघ्ने भवा इत्यर्थे (तत्र भवः ४.३.५३ इति अणि) स्त्रुघ्न + अण्, अनुबन्धलोपे दीर्घे च स्रौघ्न, ततः (स्त्रीत्वे टिड्ढाणञ्..४.१.१५ इति ङीपि) स्रौघ्न + ङीप् स्रौघ्नी। माथुरी इत्यपि पूर्ववत्।

30 व्याकरणमधीते व्याकरणं वेत्ति वा या स्त्री सा वैयाकरणी।

31 दीर्घाः केशाः यस्याः सा दीर्घकेशी। दीर्घकेश + ङीष् (स्वाङ्गाच्चोप..४.१.५४ इति ङीष्)= दीर्घकेशी।

32 कठशब्दात् स्त्रीत्वे (जातेरस्त्रीविषयादयोपधात् ४.१.६३) इति ङीष्। जातित्वं त्वस्य गोत्रञ्च चरणैः सह इति लक्षणेन। (६.३.४१ इत्यस्य न्यासे)

33 इति विग्रहे तत्पुरुषः समनाधिकरणः कर्मधारयः (१.२.४२) इत्यनेन कर्मधारयसमासः।

34 इति विग्रहे प्रकारवचने जातीयर् (५.३.६९) इत्यनेन जातीयर्।

35 इति विग्रहे ईषदसमाप्तौ कल्पब्देश्यदेशीयरः (५.३.६७) इत्यनेन देशीयर्।

## सन्दर्भग्रन्थसूची—

*अष्टाध्यायी*। सम्पादको गोपालदत्तपाण्डेयः। वाराणसी; चौखम्बासुरभारतीप्रकाशनम्, २००९।

*अष्टाध्यायीसहजबोधः*। (षष्ठो भागः)। सम्पादिका पुष्पादीक्षितः। वाराणसी; प्रतिभाप्रकाशनम्, २०२१।

*अष्टाध्यायी*। (षष्ठो भागः, खण्डः-२)। 'रामभद्रीया', 'राघवतोषिणी', 'रामप्रसादिनी' चेति वृत्तित्रयसमन्विता। वृत्तित्रयप्रणेता रामभद्राचार्यः। सम्पादकः गोविन्दाचार्यः (गोविन्दप्रसादशर्मा)। नवदेहली; केन्द्रियस्कृतविश्वविद्यालयः, २०२३।

*पाणिनीयव्याकरणोदाहरणकोशः*। (चतुर्थभागस्य प्रथमखण्डः)। सम्पादकाः एफ्. ग्रिमल, वि. वेङ्कटराजशर्मा प्रभृतयः। तिरुपतिः; राष्ट्रियसंस्कृतविद्यापीठम्, २०१५।

*व्याकरणमहाभाष्यम्*। (सप्तमो भागः)। 'ज्योत्स्ना' हिन्दीव्याख्योपेतम्। सम्पादकः हरिनारायणतिवारी। वाराणसी; चौखाम्बाविद्याभवनम्, २०१४ (पुनर्मुद्रितं संस्करणम्)।

*व्याकरणमहाभाष्यम्*। 'प्रदीप', 'प्रदीपोद्यत' चेति टीकाद्वयोपेतम्। सम्पादकः भार्गवशास्त्रीजोशी। दिल्ली; चौखाम्बासंस्कृतप्रतिष्ठानम्, २०१४ (पुनर्मुद्रितं संस्करणम्)।

*पाणिनीयाष्टाध्यायीसूत्रवृत्तिः* काशिका। (अष्टमो भागः)। 'न्यासापरपर्यायकाशिकाविवरणपञ्जिका', 'पदमञ्जरी' चेति संस्कृतव्याख्यया; 'भावबोधिनी' इति हिन्दीव्यख्यया च विभूषिता। सम्पादकः जयशङ्करलालत्रिपाठी। वाराणसी; तारा बुक एजेन्सी, २०१२ (पुनर्मुद्रितं संस्करणम्)।

*वैयाकरणसिद्धान्तकौमुदी*। (प्रथमभागः- पूर्वार्द्धः)। 'तत्त्वबोधिनी', 'बालमनोरमा', 'लघुशब्देन्दुशेखर'श्चेति व्याख्यात्रयोपेता। सम्पादकाः गुरुप्रसादशास्त्री, सीतारामशास्त्री, बालशास्त्री च। वाराणसी; चौखम्बासुरभारतीप्रकाशनम्, २०२२ (पुनर्मुद्रितसंस्करणम्)।

*प्रक्रियाकौमुदी*। (द्वितीयो भागः)। 'प्रकाश' व्याख्योपेता। सम्पादकः मुरलीधरमिश्रः। वाराणसी; सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, २०००।

*दुर्घटवृत्तिः*। सम्पादिका पार्वती चक्रवर्ती। कलकाता; संस्कृत बुक डिपो, २०२४।

# कासुचित् अप्रधानोपनिषत्सु सृष्टिरहस्यम्

**सागर-बेरा**

शोधसार: (Abstract):
ऋक्-साम-यजु:-अथर्ववेदा: जगत: सृष्टे: आरम्भात् इदानीन्तनकालपर्यन्तम् अस्माकं समाजे महत्त्वपूर्णयोगदानं प्रयच्छन्ति। मन्त्रद्रष्टार: ऋषय: विविधेषु वैदिकमन्त्रेषु नैकान् वैदिकदेवान् प्रार्थयन्ति। न केवलं वैदिकदेवान् प्रति स्तुति: एव वैदिकसूक्तेषु समुपलभ्यते, अपि तु केषुचित् सूक्तेषु परस्परस्य कथोपकथनं तथा च सृष्टिविषयकं वर्णनमपि दृश्यते। यत्र सूक्ते कथोपकथनं समुपलभ्यते तत् संवादसूक्तम् इति कथ्यते, संवादसूक्तात् नाटकस्य उत्पत्ति: भवति इति अनुमीयते, एवञ्च सृष्टिविषयकं वर्णनं यत्र समुपलभ्यते तत् दार्शनिकसूक्तमस्ति। दार्शनिकसूक्तं वेदान्तदर्शनस्य उत्पत्ते: कारणरूपेण अनुमीयते। वेदस्य चत्वार: भागा: सन्ति संहिता,ब्राह्मणम्,आरण्यकं तथा उपनिषद्। उपनिषद् वेदान्त: इत्युच्यते। तस्मात् उच्यते वेदान्तसारे – **वेदान्तो नाम उपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च**[1] इति। अष्टोत्तरशतसंख्यका: उपनिषद्ग्रन्था: समुपलभ्यन्ते, तेषु ईशादय: एकादश उपनिषद: प्रधानरूपेण परिगण्यन्ते। अप्रधानोपनिषद्ग्रन्थेषु (अथर्वशिरोपनिषद्, कठरुद्रोपनिषद्, सुबालोपनिषद् इत्येतासु) ब्रह्माण्डस्य उत्पत्ते: यानि तथ्यानि प्राप्यन्ते तेषां विश्लेषणं '**कासुचित् अप्रधानोपनिषत्सु सृष्टिरहस्यम्'** इति शोधप्रबन्धे पूर्णतया क्रियते।
कूटशब्दा: – अथर्वशिरोपनिषद्, कठरुद्रोपनिषद्, सुबालोपनिषद्, अप्रधाना उपनिषद:, सृष्टिरहस्यम्, लयप्रक्रिया।

**प्रस्तावना:**

आप्राचीनकालात् मनुष्या: ब्रह्माण्डस्य उत्पत्तिरहस्यं ज्ञातुं बहुप्रयासं कृतवन्त:। सृष्टिविषयकस्य मूलतत्त्वस्य मुख्यस्रोत: अस्ति वेद: तथा उपनिषद्। विश्वस्य प्राचीनग्रन्थ: अस्ति वेद:। तस्मात् वेदमाश्रित्य मूलत: भू-वैज्ञानिकै: ब्रह्माण्डस्य रहस्यविषये बहूनि तत्त्वानि उपस्थापितानि। न केवलं वेदे, उपनिषदि अपि ब्रह्माण्डस्य उत्पत्तिविषये बहूनि अमूल्यरत्नानि प्राप्यन्ते। एकादशसंख्यकासु प्रधानोपनिषत्सु प्रश्न-मुण्डक-माण्डूक्य-ऐतरेय-श्वेताश्वतरादिषु उपनिषत्सु ब्रह्माण्डस्य उत्पत्तिविषये चर्चा: वर्तन्ते। एवमेव या: खलु उपनिषद: अप्रधाना: सन्ति तत्रापि एतादृशं वर्णनं अस्माभि: दरीदृश्यते। एतासु अप्रधानोपनिषत्सु अथर्वशिर-कठरुद्र-सुबालादिषु उपनिषत्सु ब्रह्माण्डस्य उत्पत्तिविषये विस्तृततया वर्णनं समुपलभ्यते। एतासु अप्रधानोपनिषत्सु ब्रह्माण्डस्य उत्पत्तिविषयकानि यानि तत्त्वानि प्राप्यन्ते तानि विश्लेषयिष्यन्ते। प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इति वचनेन अस्माभि: ज्ञायते यत् यदा कोऽपि जन: कस्मिन्नपि कार्ये प्रवृत्त: भवति तदा तस्य

कार्यस्य किं फलमस्ति तद् ज्ञात्वा एव तस्मिन् कार्ये प्रवृत्तः भवति। वैदिकसूक्तेषु विशेषतया पुरुष-नासदीय-हिरण्यगर्भादिषु यथैव ब्रह्माण्डोत्पत्तिविषये चर्चा वर्तते तथैव एतासु अप्रधानोपनिषत्सु अपि बहुमूल्यतथ्यानि अस्माभिः प्राप्यन्ते। तेन पृथिव्याः उत्पत्तेः पूर्वं कीदृशी अवस्था आसीत्, कथं तस्याः सृष्टिर्भवति, सृष्टेः परं स्थितिः कीदृशी आसीत् इत्यादयः विषयाः सर्वे ज्ञातुं प्रभवन्ति। सृष्टिरहस्यम् आधारीकृत्य पूर्वमपि शोधपत्रं लिखितम् आसीत्। अस्मिन् प्रसङ्गे जोगिन्दर-सिंमहोदयस्य eduzon इत्यस्यां पत्रिकायां (http://www.eduzonejournal.com) प्रकाशितः उपनिषद एवं स्मृति ग्रंथों में सृष्टि परक सिद्धांत इति शोधप्रबन्धः। अत्र प्रबन्धे आचार्येण मनुसंहिता-याज्ञवल्क्यसंहितादिभ्यः स्मृतिग्रन्थेभ्यः तथा च एकादशभ्यः प्रधानोपनिषद्ग्रन्थेभ्यः तथ्यं संगृह्य सृष्टिपरकसिद्धान्तस्य विचारः क्रियते। परन्तु अप्रधानोपनिषत्सु सृष्टिपरकानि यानि तत्त्वानि सन्ति तानि अत्र प्रबन्धे स्वल्परूपेण विचारितानि। केवलं त्रिशिखिब्राह्मणोपनिषदः तथा च अथर्वशिरोपनिषदः आलोचना स्वल्परूपेण कृता वर्तते। स्वामि-कृष्णानन्दमहाराजेन THE BṚHADĀRAṆYAKA UPANIṢAD इति ग्रन्थस्य प्रथमाध्याये SECOND BRĀHMAṆA : THE CREATION OF THE UNIVERSE इत्यत्र बृहदारण्यकोपनिषदम् अनुसृत्य ब्रह्माण्डस्य सृष्टिविषये आलोचना क्रियते। कुमुद-कुमार-पाण्डेयमहोदयेन वेद में सृष्टि विषयक की अवधारणा इति प्रबन्धः लिखितः (International Journal of Sanskrit Research 2021; 7(5): 133-137)। यद्यपि सृष्टिविषयकाः एते प्रबन्धाः प्राप्यन्ते तथापि महाकवि-कालिदासः यथैव वदति –

**मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम्। प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः**[3]।। इति तथैव मया अपि अप्रधानोपनिषदः आधारीकृत्य सृष्टिविषयकानि यानि तत्त्वानि प्राप्यन्ते तानि संक्षेपेण पूर्वाचार्याननुसृत्य 'कासुचित् अप्रधानोपनिषत्सु सृष्टिरहस्यम्' इति शोधप्रबन्धे उपस्थापयिष्यन्ते।

**कार्यप्रणाली :**

कस्मिन्नपि विषये किमपि नूतनं तथ्यं उपस्थाप्यते अथवा ज्ञाततथ्यस्य विश्लेषणेन नूतनरूपेण सुव्यवस्थितरूपेण च सर्वेषां समीपे उपस्थापनम् एव शोधशब्देन अवबुध्यते अथवा कस्यचन ग्रन्थविशेषस्य मूलभूततत्त्वस्य समुन्मीलनम्, व्यवस्थितरूपेण उपस्थापनम् अथवा पुनर्व्यवस्थापनम् एव शोधः इत्युच्यते।

**शोधकार्यस्य प्रयोजनम् –**

'कारणं विना कार्यं नैव भवति' इति दृष्ट्या शोधकार्यस्य अपि अवश्यमेव किमपि प्रयोजनं वर्तते। शोधकार्यस्य मुख्यमुद्देश्यम् अस्ति कस्याश्चित् जिज्ञासायाः समाधानम्। एवंरूपेण अस्य शोधकार्यस्य किमपि उद्देश्यम् अवश्यमेव वर्तते। ब्रह्माण्डस्य सृष्टिरहस्यविषये सर्वेषां जिज्ञासा सर्वदा वर्तते। सृष्टेः पूर्वं कथम् आसीत् एषः ब्रह्माण्डः? अस्मिन् विषये तथ्यं कुत्र प्राप्यते? सृष्टेः प्रारम्भे अस्य ब्रह्माण्डस्य अवस्था कीदृशी आसीत्? तदनन्तरं कथम् अस्यां धरित्र्यां प्राणिनाम् आविर्भावः वर्तते? अस्मिन् विषये प्राचीनानाम् ऋषीणां किं मतमस्ति, आधुनिक-भूवैज्ञानिकानां किं मतमस्ति तत् पर्यालोचयिष्यते। अत्र प्रबन्धे अप्रधानोपनिषत्सु यानि मतानि सन्ति तानि मुख्यतया संक्षेपेण उपस्थापयितुं प्रयासः करिष्यते। अपि च सृष्टिरहस्यम् इति एकस्य विषयस्य विश्लेषणं करिष्यते। अत्र शोधप्रबन्धे शोधकर्ता आदौ उपनिषद्ग्रन्थान्

पठति तदनन्तरं तत्र प्राप्ततथ्यान् संगृह्य तेषां योजनया विश्लेषणं करोति।

प्राचीनशास्त्रीयसिद्धान्तमाधारीकृत्य गवेषणाद्वारा यत् प्रामाणिकं तथ्यं समुपलभ्यते, तत्तु सर्वथा मौलिकं भवति। एवंरूपेण प्रस्तुत: शोधप्रबन्धोऽपि मौलिकशोधरूपेण गणयितुं शक्यते । अथवा व्याख्यात्मकशोधरूपेण अपि अस्य ग्रहणं भवितुं शक्यते। यत: हि समस्याया: मूलं ज्ञात्वा तस्या: सरलसमाधानाय व्याख्यात्मकशोध: प्रस्तूयते ।

**चर्चा:**

उपनिषद् भारतीयाध्यात्मिकचिन्तनस्य मूलाधार:। सर्वेषां वेदानां सार: उपनिषदि निहित: वर्तते। सर्वान् आध्यात्मिकविषयान् सरलरूपेण उपस्थापयति इयं उपनिषद्विद्या। उपनिषद: ब्रह्म-जीव-जगतां विषये ज्ञानं प्राप्यते। उपनिषद् रहस्यविद्यानाम्नापि अभिहिता। उपनिषद् एव अस्माकं हृदयगुहायां निहितास्त्रि यत् अज्ञानं तत् दूरीकृत्य अस्माकं हृदये ज्ञानस्य आलोकं प्रकाशयति। तस्मात् उच्यते बृहदारण्यकोपनिषदि – ''असतो मा सद्गमय, तमसो मा ज्योतिर्गमय, मृत्योर्मामृतं गमयेति[4]'' इति । उपनिषदि मूलत: जगत: उत्पत्ति: कथं भवति? जन्म-मरणचक्रस्य किं प्रयोजनमस्ति? जीवात्मना सह ईश्वरस्य क: सम्बन्ध: अस्ति? इत्यादय: विषया: आलोचिता: सन्ति। (उप- नि- षद् (सद्) उप + नि उपसर्गपूर्वक षद्लृ (विशरणगत्यवसादनेषु) + क्विप् (कर्त्तर्थे) एवंरूपेण उपनिषद् इति पदं निष्पद्यते। उपशब्दस्य अर्थ: अस्ति अत्र समीपम् (ब्रह्मसामीप्ये) अर्थात ब्रह्मनिष्ठगुरूणां समीपे। नि-शब्दस्य अर्थ: अस्ति निश्चयेन, नितराम् (पूर्णतया)। षद् इत्यस्य अर्थ: भवति विशरणम् (अविद्याया: नाश:, कर्तृत्वस्य भोक्तृत्वस्य च नाश:)। गति: (ज्ञानप्राप्ति:, मोक्षेषु गति:)। अवसादनम् (दु:खानां शिथिलीकरणम्)। अर्थात् ब्रह्मनिष्ठगुरो: समीपे गत्वा अविद्याया: पूर्णतया नाश:।

सृष्टिविषये अधुना आलोच्यते –

**जगत: उद्भवप्रक्रिया–**

अथर्ववेदस्य एका उपनिषद् अस्ति अथर्वशिरोपनिषद्। अत्र उपनिषदि पृथिवीसृष्टिविषये बहूनि तथ्यानि प्राप्यन्ते। एक: एव देव: अस्ति, य: सर्वासु दिक्षु निवसति। तस्य देवस्य आविर्भाव: प्रथमं भवति। एष: देव: यथैव सृष्टे: आदौ तिष्ठति तथैव मध्ये अन्ते चापि अस्ति। सर्वे प्राणिन: तस्मात् एव देवात् उत्पद्यन्ते। जगत: सर्वेषु पदार्थेषु एष: एव देव: संव्याप्त: अस्ति। केवलमेक: एव रुद्र: अस्य लोकस्य नियमनं करोति, न अन्य: कोऽपि देव:। तस्मादुच्यते – *स एव जात: स जनिष्यमाण: प्रत्यङ्जनास्तिष्ठति सर्वतोमुख:। एको रुद्रो न द्वितीयाय तस्मै य इमाँल्लोकानीशत ईशनीभि:* इति। अत्र रुद्रदेवेन सह सादृश्यमस्ति गुरुत्वाकर्षणशक्ते:। गुरुत्वाकर्षणशक्ति: सर्वेषु पदार्थेषु व्याप्ता सती जगत: सर्वेषां पदार्थानां नियमनं करोति, रुद्रदेवस्य इव। जगत: एका एव शक्ति: या सर्वेषु पदार्थेषु व्याप्ता अस्ति। तस्मात् सर्वेषां प्राणिनां पृथिव्यां सादृश्यं वर्तते। अत्र उपनिषदि उच्यते यत् सर्वे प्राणिन: रुद्रदेवे एव निवसन्ति, लयसमये सर्वेषां विलय: अपि तत्र भविष्यति। विश्वस्य उद्भव: रुद्रात् एव भवति। रुद्रदेव: अग्नि-ओषधि-वीरुधेषु तिष्ठति। एष: सर्वं भुवनं सृजति। जगति यत् किमपि वर्तते तत् सर्वं रुद्रे एव समाहितमस्ति। रुद्रस्य पूर्वं भूतकाले किमपि नासीत् भविष्यति अपि किमपि न स्थास्यति। अत्र उपनिषदि रुद्रस्य सहस्रपदं तथा च सहस्रमस्तकं कल्पितम्। तत् तु सर्वेषु भूतेषु

संव्याप्तम् अस्ति। एषा कल्पना अस्माभिः ऋग्वेदस्य पुरुषसूक्ते अपि प्राप्यते। तत्र उच्यते –

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम्[6]।। इति

अर्थात् अत्र दृश्यते यत् – जगतः सर्वेषां प्राणिनां मस्तकं तथा च पादं तस्य रुद्रस्य पुरुषस्य वा मस्तकं पादञ्च । यावत् एषा पृथिवी तिष्ठति तावत् पर्यन्तम् सहस्रपरिमाणं मस्तकं तथा च पादं विलुप्तं न भविष्यति। पृथिव्याः लयप्राप्ते सति एतत् एकं सहस्रपरिमाणं मस्तकं पादञ्च काले एव समाहितं भविष्यति। यद्यपि पुरुषसूक्ते पुरुषस्य मस्तकं सहस्रम् उच्यते तथापि अथर्वशिरोपनिषदि रुद्रस्य एकं मस्तकं तथा च पादसहस्रं कल्पितमस्ति, यत् मस्तकं पादञ्च सर्वेषु भूतेषु संव्याप्तम् अस्ति। उच्यते च – **सहस्रपादेकमूर्ध्ना व्याप्तं स एवेदमावरीवर्ति भूतम्**[7] इति।

अथर्वशिरोपनिषदि उच्यते- अक्षरात् एव कालस्य उत्पत्तिर्जायते, कालादेव भगवतः रुद्रस्य उत्पत्तिर्जायते। रुद्रः यदा शयिष्यते तदा सर्वस्य प्राणिसमुदायस्य संहारः भविष्यति। एतेन अनुमीयते यत् यदा कस्मिन्नपि कारणे गुरुत्वाकर्षणशक्तेः कार्यक्षमता नष्टा भविष्यति तदा सर्वस्य जीवजगतः विलोपः भविष्यति। तस्मादुच्यते – **अक्षरात्संजायते कालः कालात्व्यापक उच्यते। व्यापको हि भगवान् रुद्रो भोगायमानो यदा शेते रुद्रस्तदा संहार्यते प्रजाः**[8]। इति

यदा भगवान् रुद्रः श्वासं गृह्णाति तदा तमः उत्पद्यते, तमसः आपः उत्पद्यन्ते। रुद्रो पुनः यदा अपः मथ्नाति तदा शिशिरः (आपतत्त्वस्य गाढरूपम्) उत्पद्यते। पुनः शिशिरस्य मन्थने कृते फेनकस्य प्रादुर्भावः भवति, फेनकात् अण्डम्, अण्डात् ब्रह्मणः प्रादुर्भावः भवति। अनन्तरं ब्रह्मणः वायोः, वायोः ओंकारस्य, ओंकारात् सावित्र्याः, सावित्र्याः गायत्र्याः, गायत्र्याः लोकानाम् उद्भवः भवति। एवमस्ति अत्र अथर्वशिरोपनिषदि सृष्टिप्रक्रिया। तस्मादुच्यते अत्र उपनिषदि – **उच्छ्वसिते तमो भवति तमस आपोंऽप्स्वङ्गुल्या मथिते मथितं शिशिरे शिशिरं मथ्यमानं फेनो भवति, फेनादण्डं भवत्यण्डाद्ब्रह्मा भवति, ब्रह्मणो वायुः वायोरोंकार ॐकारात्सावित्री सावित्र्या गायत्री गायत्र्या लोका भवन्ति**[9] इति।

कृष्णयजुर्वेदस्य उपनिषद् अस्ति कठरुद्रोपनिषद्। अस्य कण्ठरुद्रोपनिषद् इति नामान्तरमपि वर्तते। अत्र उच्यते यत् शक्तिसम्पन्नात् ब्रह्मरूपात् आत्मनः आकाशम् अर्थात् शब्दादयः तन्मात्राः उत्पद्यन्ते। आकाशात् वायुरूपा अपञ्चीकृतस्पर्शतन्मात्रा उत्पद्यते, पुनः वायोः अग्निः, अग्नेः जलम्, जलात् अस्याः पृथिव्याः उत्पत्तिर्भवति। शिवस्वरूपः ईश्वरः सूक्ष्मभूतानां पञ्चीकरणं कृत्वा तस्मात् ब्रह्माण्डस्य रचनां करोति। एवञ्च ब्रह्माण्डस्य उदरे सर्वेषां भूतानां पूर्वकृतकर्मानुसारेण देव-दानव-यक्ष-किन्नर-मनुष्य-पशु-पक्ष्यादियोनिषु विभज्य ब्रह्माण्डस्य रचना क्रियते। अस्थि-स्नाय्वादिभ्यः निर्मितं सर्वेषां जीवानां शरीरं स्वकीयकर्मानुसारेणैव प्रकाशितं भवति। तस्मादुच्यते –

**ब्रह्माण्डस्योदरे देवा दानवा यक्षकिन्नराः। मनुष्याः पशुपक्ष्याद्यास्तत्तत्कर्मानुसारतः**[10] इति।।

**तत्तत्कर्मानुसारतः** इति पदेन अत्र अनुमीयते यत् विश्वब्रह्माण्डस्य सृष्टिः तथा विनाशः चक्राकारेण आवर्तितः अस्ति। यतः हि सर्वेषां पूर्वकर्म यदि स्यात् तर्हि पूर्वमपि पृथिवी आसीत् यस्य विनाशात् परम पुनः सृष्टिप्रक्रिया उत्पद्यते। अत्र उपनिषदि ब्रह्माण्डस्य विनाशात् परं पुनः तस्य आविर्भावस्य उल्लेखः क्रियते।

शुक्लयजुर्वेदस्य एका उपनिषद् अस्ति सुबालोपनिषद्। अत्र प्रथमद्वितीयखण्डयोः सृष्टिप्रक्रियायाः

विस्तृततया चर्चा वर्तते। रैक्वर्षेः जिज्ञासायां घोराङ्गिरसः ऋषिः सृष्टिप्रक्रियायाः आरम्भः तथा च विराड्रूपब्रह्मणः सर्वेषां वर्णानाम्, प्राणस्य, वेदानाम्, वृक्ष-पशु-प्राणिनाम् आविर्भावः कथं भवति तस्य विस्तारेण आलोचनं कृतवान्। तत्र उपनिषदि रैक्वर्षिणा यदा पृच्छ्यते सृष्टेः पूर्वं किमासीत्? तदा तस्य प्रश्नस्योत्तरे घोराङ्गिरसर्षिणा उच्यते – सृष्टेः पूर्वं न सत् आसीत् न असत् आसीत् न वा सदसत् आसीत्। तदानीं किमपि न आसीत्। उच्यते च तत्र – **तदाहुः किं तदासीत्तस्मै स होवाच न सन्नासन्न सदसदिति**[11] इति। अनन्तरं किमुत्पद्यते इति जिज्ञासायामुच्यते घोराङ्गिरसर्षिणा – सर्वादितत्त्वात् तमः उत्पद्यते, तमसः भूतादिः अर्थात् अक्षर-अव्यक्त-अहंकारादयः उत्पद्यन्ते। पुनः भूतादिभ्यः आकाशम्, आकाशात् वायुः, वायोः अग्निः, अग्नेः जलम्, जलात् पृथिवी उत्पद्यते। एतत् सर्वम् एकत्र मिलित्वा ब्रह्माण्डरूपम् अण्डम् भवति। अस्मिन् ब्रह्माण्डरूपे अण्डे एकसंवत्सरं यावत् पुरुषः स्थितः आसीत्। अनन्तरं पुरुषेण तस्य अण्डस्य भागद्वयं कृतम्। अस्य भागस्य अधोभागः पृथिवी ऊर्ध्वभागश्च आकाशः। एतयोः द्वयोः मध्यभागे सहस्रशिरोविशिष्टः, सहस्रनेत्रविशिष्टः,सहस्रपादविशिष्टः दिव्यः पुरुषः, यः विराट्पुरुषः इत्यपि कथितः भवति, तस्य उत्पत्तिर्भवति। सः विराट्पुरुषः प्राणिषु आदौ मृत्युम् असृजत्। यस्य स्वरूपं त्रिनेत्रविशिष्टः रुद्रः, त्रिशिरस्कं तथा च त्रिपादविशिष्टः खण्डपरशुः अर्थात् महेश्वरः। स्वकीयेन सृष्टं मृत्युं (यमदेवताम्) दृष्ट्वा ब्रह्मा भीतः अभवत्। तदा रुद्रः ब्रह्मणि प्रविष्टः आसीत्। अनन्तरं ब्रह्मा सप्त मानसपुत्रान् उत्पादयति। ते सप्त पुत्राः सप्त मानसपुत्रान् जनयन्ति स्म। ते सप्त पुत्राः प्रजापतयः आसन्। पुनः सम्पूर्णस्य जगतः आविर्भावः कथं भवति इति जिज्ञासायामुच्यते – अस्मान् विराट्पुरुषस्य मुखात् ब्राह्मणः,बाहुद्वयात् क्षत्रियः, ऊरुद्वयात् वैश्यः, पद्भ्यां च शूद्रः जायते स्म। एवञ्च मनसः चन्द्रमाः चक्षुषोः सूर्यः, श्रोत्रात् वायुः तथा प्राणश्च एवं हृदयात् सम्पूर्णं जगत् जायते स्म। एवंरूपेण विराट्पुरुषस्य अपानवायोः(अपानो नामावाग्गमनवान्पाय्वादिस्थानवर्ती) निषाद-यक्ष-राक्षस-गन्धर्वाः,अस्थिभ्यः पर्वताः, लोमभ्यः ओषधिवनस्पतयः, क्रोधजः ललाटात् रुद्रः जायते। एषः विराट्पुरुषः महान् भूतरूपः अस्ति। तस्य विराट्पुरुषस्य निःश्वसितमेव एतत् यत ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः, शिक्षा, कल्पम्, व्याकरणम्, निरुक्तम्, छन्दः, ज्योतिषशास्त्रम्, न्यायशास्त्रम्, मीमांसा, धर्मशास्त्राणि, व्याख्यानानि, उपव्याख्यानानि, सर्वाणि भूतानि। अत्र उपनिषदि एवमपि उच्यते यत् विराट्पुरुषः हिरण्यवत् ज्योतिस्स्वरुपः अस्ति। अस्मिन् विराट्पुरुषे आत्मा,प्रत्यगात्मा तथा सर्वे लोकाः प्रतिष्ठिताः सन्ति। सः विराट्पुरुषः आत्मानं भागद्वये विभज्यते। तस्य अर्धभागे स्त्रीरूपस्य तथा च अपरस्मिन् अर्धभागे पुरुषस्य आविर्भावः भवति। सांख्यदर्शनेऽपि अस्याः उपनिषदः इव प्रकृतिः तथा पुरुषस्य अस्तित्वं स्वीक्रियते। तत्र पङ्ग्वन्धवत् प्रकृतिपुरुषयोः संयोगात् सर्गस्य उत्पत्तिः स्वीक्रियते। तत्र उच्यते –

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।
पंग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः[12]।।

एवंरूपेण पूर्वोक्तेन भागद्वयेन क्रमेण सः विराट्पुरुषः देवः भूत्वा देवान् ,ऋषिः भूत्वा ऋषीन् असृजत्। एवम्प्रकारेण क्रमेण यक्ष-राक्षस-गन्धर्वान् तथा च ये खलु ग्रामेषु अरण्येषु तिष्ठन्तः पशवः सन्ति तानपि असृजत्। एतेषु पशुषु गौः, अनड्वान्, अश्वः,गर्दभः, गर्दभी इत्यादयः पशवः आसन्। सुबालोपनिषदः तृतीयखण्डे सृष्टिविषये द्वितीयं मतमपि उपस्थापितमस्ति। तत्र उच्यते – सृष्टेः आदौ एतत् जगत् असत्

अर्थात् एतत् जगत् सत् अपि अव्यक्तम् आसीत्। तस्मादुच्यते – **असद्वा इदमग्र आसीद्**[13]। इति **लयप्रक्रिया –** अत्र उपनिषदि पृथिव्याः विनाशप्रक्रियाविषये उच्यते – सः एव विराट्पुरुषः अन्ते वैश्वानराग्निः सन् सर्वाणि भूतानि संदहति। एषा पृथिवी अप्सु प्रलीयते, आपः तेजसि प्रलीयन्ते, तेजो वायौ, वायुः आकाशे, आकाशम् इन्द्रियेषु, इन्द्रियाणि तन्मात्रेषु, तन्मात्राणि भूतादौ, भूतादिः महति, महान् अव्यक्ते, अव्यक्तम् अक्षरे, अक्षरं तमसि विलीयते, तमश्च परमे देवे एकीभवति। अनन्तरं न सत् तिष्ठति, न असत् तिष्ठति न च सदसत् सम्मिलितरूपेण तिष्ठति। उच्यते च अत्र उपनिषदि -**सोऽन्ते वैश्वानरो भूत्वा संदग्ध्वा सर्वाणि भूतानि पृथिव्यप्सु प्रलीयत आपस्तेजसि प्रलीयन्ते तेजो वायौ विलीयते वायुराकाशे विलीयत आकाशमिन्द्रियेष्विन्द्रियाणि तन्मात्रेषु तन्मात्राणि भूतादौ विलीयन्ते भूतादिर्महति विलीयते महानव्यक्ते विलीयतेऽव्यक्तमक्षरे विलीयते अक्षरं तमसि विलीयते तमः परे देव एकीभवति परस्तान्न सन्नासन्न सदसदिति**[14]। एवंरूपेण अत्र सुबालोपनिषदि ब्रह्माण्डस्य उत्पत्तिविषये तथा च लयविषये विस्तृततया चर्चा अस्माभिः दृश्यते।

छान्दोग्योपनिषदि अपि सृष्टिप्रक्रियायाः वर्णनं दृश्यते। अत्र चतुर्थाध्यायस्य तृतीयखण्डे रैक्वर्षिद्वारा संवर्गविद्यायाः उपदेशे सृष्टिप्रक्रियायाः उल्लेखः समुपलभ्यते। अत्र उच्यते वायुः एव संवर्गः अस्ति। संवर्गशब्दस्य व्युत्पत्तिविषये शाङ्करभाष्ये उच्यते – **संवर्गः संवर्जनात्संग्रहणात्संग्रसनाद्वा**[15] इति। अतएव संवर्गशब्दस्य अर्थः भवति संग्रहणं संग्रसनम् वा। अत्र सृष्टिविषये उच्यते प्रथममन्त्रे – **वायुर्वाव संवर्गो यदा वा अग्निरुद्वायति वायुमेवाप्येति यदा सूर्योऽस्तमेति वायुमेवाप्येति यदा चन्द्रोऽस्तमेति वायुमेवाप्येति**[16]। अर्थात् वायुः अग्न्यादीनां संग्रहणं करोति तस्मात् वायुः एव संवर्गः। यदा अग्निः निर्वापितः भवति तदा वायौ लीनं भवति वायुस्वभावं च प्राप्नोति, सूर्यः यदा अस्तं गच्छति तदा वायुरूपमेव प्राप्नोति एवञ्च चन्द्रे अस्तमिते चन्द्रः अपि वायुरूपं प्राप्नोति । अत्र सन्देहः भवति यत् स्वस्वरूपे स्थितस्य सूर्यस्य चन्द्रस्य च वायौ कथं लयः भवतीति ? अस्योत्तरे उच्यते शाङ्करभाष्ये — **नैष दोषः; अस्तमनेऽदर्शनप्राप्तेर्वायुनिमित्तत्वात्, वायुना ह्यस्तं नीयते सूर्यः, चलनस्य वायुकार्यत्वात्। अथवा प्रलये सूर्यचन्द्रमसोः स्वरूपभ्रंशे तेजोरूपयोर्वायावेवापिगमनं स्यात्**[17] इति। यदा सूर्यः जलं शोषयति तदा जलमपि वायौ लीनं भवति। उच्यते च अत्र द्वितीयमन्त्रे- **यदाप उच्छुष्यन्ति वायुमेवापियन्ति वायुर्ह्येवैतात् सर्वान्संवृङ्क्त इत्यधिदैवतम्**[18]। इति एवञ्च उच्यते छान्दोग्योपनिषदि अध्यात्मदर्शनमतम्। अध्यात्मदर्शने उच्यते प्राणः एव संवर्गः यतः हि प्राणः एव वागादीन्द्रियाणां संग्रहणं करोति। प्राणः एव सर्वेषां वागादीन्द्रियाणां स्वात्मनि लीनं करोति। उच्यते च छान्दोग्योपनिषदि— **अथाध्यात्मं प्राणो वाव संवर्गः स यदा स्वपिति प्राणमेव वागप्येति प्राणं चक्षुः प्राणँश्रोत्रं प्राणं मनः प्राणो ह्येवैतान्सर्वान्वृङ्क्त इति**[19]। अत्रापि उपनिषदि अस्माभिः रैक्वर्षिद्वारा संवर्गविद्यामाध्यमेन सृष्टिः तथा लयप्रक्रिया दृष्टा।

**निष्कर्षः:**

एतस्मात् अध्ययनात् अस्माभिः दृश्यते यत् अस्माकं ब्रह्माण्डः विराट्पुरुषतः सृष्टः। विराट्पुरुषः इत्युक्ते अखण्डः आत्मा यः सर्वव्यापकः अस्ति इत्यपि स्वीकर्तुं शक्यते। एषा सृष्टिप्रक्रिया तथा च विनाशप्रक्रिया चक्राकारे आवर्तिता अस्ति। अस्माकम् ऋषिभिः आध्यात्मिकदृष्ट्या तेषाम् अत्युन्नतचिन्तनेन एतत्

वैज्ञानिकतत्त्वम् अस्माकं समीपे उपस्थापितम्। अनेकेषां वैज्ञानिकतत्त्वानां वैज्ञानिकदृष्ट्या व्याख्यानमपि कृतम्। अनया दृष्ट्या अस्माकं ऋषयः वैज्ञानिकाः सन्ति इति निश्चयेन वक्तुं शक्यते। प्रायः सृष्टिविषयकेषु वैदिकसूक्तेषु तथा च उपनिषत्सु अपि एकं तत्त्वं प्रतिवारं प्राप्यते तत्तु विराट्पुरुषस्य तत्त्वम्। तस्य इच्छायामेव सर्वेषां जीवजगतः सृष्टिः तथा विनाशः सम्पद्यते। सृष्टिसमये पृथिवी अत्यन्ता निर्मला आसीत्, तदानीं प्रकृतिः अपि अतीव सुन्दरी आसीत्। परन्तु वर्तमानसमये प्रदूषणाधिक्यात् तथा च मानवसमाजस्य अहंमनोभावात् पृथिवी अद्य विपन्ना अस्ति, तस्याः सृष्टेः सौन्दर्यम् अद्य म्रियमाणम् अस्ति। ग्रहनक्षत्राणां हेतुः अस्याः पृथिव्याः विनाशस्य सम्भावना यद्यपि अस्ति ततोऽधिका सम्भावना अस्ति मनुष्यनिर्मितेन विविधवस्तुना। यथा- मनुष्यनिर्मितः परमाणुबम्बः पृथिवीविनाशस्य अपरं कारणमपि भवितुमर्हति। अन्ते एवं वक्तुं शक्यते यत् सृष्टेः विषयं ज्ञात्वा वयं सर्वे वसुन्धरायाः रक्षणार्थं प्रयासं करिष्यामः। इति शम्।।

**अन्त्यटीका—**

1. वेदान्तसारः,पृष्ठम्-116.
2. यजुर्वेद- 30.
3. रघुवंशम्. श्लोकः 1.3.
4. बृहदारण्यकोपनिषद्. 1.3.28.
5. अथर्वशिरोपनिषद्, मन्त्रः 5.
6. पुरुषसूक्तम्,10.90.1
7. अथर्वशिरोपनिषद्, मन्त्रः 6
8. अथर्वशिरोपनिषद्, मन्त्रः 6
9. तदेव
10. कठरुद्रोपनिषद्, मन्त्रः 20.
11. सुबालोपनिषद्. 1.1.
12. सांख्यकारिका, कारिका 21.
13. सुबालोपनिषद्, 3.1.
14. तदेव, 2.4.
15. छान्दोग्योपनिषद्, 4.3.
16. तदेव. 4.3.1.
17. तदेव. पृष्ठा-370.
18. तदेव. 4.3.2.
19. तदेव. 4.3.3.

**Selected Bibliography:**

*Bṛhadāraṇyakopaniṣad.* Gorakhpur: Gita Press, 2058 S. V.
*Chāndogyopaniṣad.* Gorakhpur: Gita Press, 2011 S. V.

Krishnananda, Swami. *THE BṚHADĀRAṆYAKA UPANIṢAD.* web: https://www.swami-krishnananda.org/brhad_00.html. Accessed 31/08/2024.

Dwivedi, Prabhunath and Sureshchandra Chaube. *saṃskṛta śodhapravidhi*. Varanasi: Sharada Sanskrit Sansthan, 2014.

īśvarakṛṣṇa. *Sāṃkhyakārikā*. Ed. Rakesh Shastri. Delhi: Sanskrit Granthagar, 1998.

Kalidasa. *Raghuvaṃśamahākāvyam*. Ed. Brahma Shankar Mishra. Benaras: Chaukhamba Series office, 1956.

*Manusmṛti.* Ed. Gopalshastri Nene. Varanasi: Chaukhamba Sanskrit Sansthan, 2037 V.S.

Pandeya, Kumud Kumar. *"veda meṃ sṛṣṭi viṣayaka kī avadhāraṇā."* Ananta 7(5). Issue (2021): 133-137. http://www.anantaajournal.com/. Accessed 31/08/2024.

Sadananda Yogindra. *Vedāntasāra*. Delhi: Parimal publications, 2004.

Singh, Jogindar. *"upaniṣad evaṃ smṛti graṃthoṃ meṃ sṛṣṭi paraka siddhāṃta"*. Eduzone Research journal vol. 8, Issue 1 (2019): 22-28. https://www.eduzonejournal.com/index.php/eiprmj/article/view/228. Accessed 31/08/2024.

*Vaidikasūktasaṅkalana.* Ed. Vijay Shankar Pandeya. Delhi: MLBD, 2001.

*108 upaniṣad, brahmavidyākāṇḍa.* Ed. Shriram Sharma. Mathura: Yug nirman yojana, 2005.

# प्राकृतव्याकरणे अव्ययविमर्शः

**सैकत-दासः**

**प्रबन्धसारः** – व्याकरणचर्चायाम् अव्ययानां तात्पर्यमस्ति। एषाम् अन्तर्भूक्ति र्नामपदे भवति। सवैः वैयाकरणैः अव्यया आलोच्यन्ते। न केवलं संस्कृतव्याकरणे, प्राकृतव्याकरर्णेऽपि अव्ययानां चर्चा लक्षणीया। प्राकृतव्याकरणे शाखाद्वयं वर्तते – प्राच्यशाखा पाश्चात्यशाखा च। शाखाद्वये बहवः वैयाकरणाः सन्ति, येषु केवलं पञ्चानां वैयाकरणानां मतानुसारम् अव्ययालोचनमस्माभिरत्र विहितम्। प्राच्यशाखायाः वररुचिकृतः प्राकृतप्रकाशः क्रमदीश्वरकृतः संक्षिप्तसारः मार्कण्डेयकृतः प्राकृतसर्वस्वः पाश्चात्यशाखायाः हेमचन्द्रकृतं सिद्धहेमशब्दानुशासनम् त्रिविक्रमभट्टकृतं प्राकृतशब्दानुशासनम् इति-एते पञ्च ग्रन्थास्तथा ग्रन्थकृतः प्रबन्धेऽस्मिन् पर्यालोचनार्थं विविच्यन्ते। प्रायशः सर्वैः प्राकृतव्याकरणकृद्भिः संस्कृतव्याकरणावलम्बनेन सूत्राणि प्रणीतानीति परिलक्ष्यते। एतैः वैयाकरणैः केवलं मनोभावप्रकाशकशब्दानां (interjection) कृते येषाम् अव्ययानां प्रयोगोऽस्ति तद्विषयकं सूत्रं कृतम्, न तु विषयान्तरम्। प्रबन्धेऽस्मिन् विषयमिमम् अवलम्ब्य तौलनमेकं सूच्यते।

विशेषशब्दाः – प्राकृतव्याकरणम्, वैयाकरणाः, अव्ययम्, उपसर्गाः, समुच्चयबोधकशब्दाः।

न व्ययमिति नञ्-तत्पुरुषसमासकृते अव्ययपदं निष्पद्यते। अस्याभिधानिकार्थो भवति – यस्य क्षयं नास्ति। प्रसङ्गेऽस्मिन् गोपथब्राह्मणे भणितम्–

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।।[1]

सर्वेषु लिङ्गेषु, सर्वेषु वचनेषु सर्वासु च विभक्तिषु यस्य परिवर्तनं न स्यात्, तस्याव्ययत्वं जायते। गोपथब्राह्मणस्यास्य मन्त्रस्य तात्पर्यमिदं यत् – विराजमानं स्थित्वापि यत् स्वधर्मात् विच्युतं न भवति, तदव्ययम्। अत्र परमब्रह्म एव अव्ययत्वरूपेण प्रतिपादितम्।

व्याकरणशास्त्रेऽव्ययमित्युक्ते न तु व्ययरहितं परमं ब्रह्म अवबुध्यते। प्रत्येकभाषाणां व्याकरणे अव्ययशब्दस्य प्रयोगः स्यात्, यस्य आङ्गलपरिभाषा – indeclinable. यस्यार्थः - योऽपरिवर्तनीयः। सर्वासु भाषासु इमे अपरिवर्तनीयाः शब्दाः अव्ययरूपेण परिगणिताः। वस्तुतस्तु, न पाणिनीयव्याकरणे, सर्वैरेव गोपथब्राह्मणस्येयं संज्ञैव अव्ययसंज्ञारूपेण ऊररीकृता।

महावैयाकरणपाणिनिना अव्ययसंज्ञा न कथिता। तेन सूत्रं कृतम् – **स्वरादिनिपातमव्ययम्**[2] अर्थात् स्वरादीनां निपातानाञ्चाव्ययत्वं जायते। अपि च, **तद्धितश्चासर्वविभक्तिः**[3], **कृन्मेजन्तः**[4], **क्त्वातोसुन्-कसुनः**[5], **अव्ययीभावश्च**[6] – एतैः सूत्रैः निष्पन्नानां शब्दानाम् अव्ययत्वं जायते।

यदेव भवतु, प्राकृतव्याकरणेऽपि अव्ययस्य किमपि लक्षणमस्माभिः न दृश्यते। वररुचिना निपाताः इत्यधिकारसूत्रे अव्ययानामुल्लेखः कृतः। परन्तु, सिद्धहेमशब्दानुशासने हेमचन्द्राचार्येण निपाताः इति नोक्त्वा अव्ययमिति सूत्रस्याधिकारे अव्ययानामालोचनं कृतम्।

साधारणतया अव्ययेन अस्माभिः यद् बोध्यते (Adverb, Preposition, Conjunction, Interjection) तेषां रूपाणि प्राकृतभाषायाम् एवम्भवन्ति। यथा – अज्ज (today), एण्हिं, एत्थाहे, इयाणिं, संपय (now), ता, तया, तओ, तो, तइया, ताहे (then), जया, जइया, जाहे (when), कया, कइया (when), कल्लं (yesterday) सहसा, झत्ति (suddenly), नवरं (alone), न, मा (not), चेत्यादीनि। उपसर्गाः यथा – अइ (beyond), अणु (after), अव (away), आ (upto), सं (together), परि (all round), पडि (towards), सु (well), इत्यादयः। एतद्विहाय कारकनियन्त्रितोपसर्गाः सन्ति – अन्तरेण (without), जाव (until), गहाय (with). समं (with), विणा (without), आरब्भ (from), उवरिं (above), समीवं (near), बाहि (outside) पच्चक्खं (in the) इत्यादयः। अपि च, समुच्चयबोधकाः केचित् शब्दाः सन्ति, यानि अव्ययानि। यथा – अ, च, य, किंच, वा,अहवा, जइ, तदाहि इत्यादीनि।

प्रबन्धेऽस्मिन् मूलतः प्राकृतप्रकाश-प्राकृतशब्दानुशासन-संक्षिप्तसार-प्राकृतसर्वस्व-सिद्धहेमशब्दानुशासनानामव्ययप्रकरणस्यालोचनं (मूलतया मनोभावप्रकाशकशब्दाः) क्रियते।

वाक्योपन्यासार्थं प्राकृते **तमिति** अव्ययस्य प्रयोगो भवति। तमित्यस्य कोऽपि अर्थो नोपलभ्यते, केवलम् आलङ्कारिकपदरूपेण पदमिदं व्यवह्रियते। वाक्यानां प्रारम्भे पदमिदं प्रयोक्तव्यम्। अस्मिन् विषये सिद्धहेमशब्दानुशासने प्राकृतशब्दानुशासने च तं वाक्योपन्यासे[7] सूत्रमिदं प्राप्यते। उदाहरणम् – तं तिअस-वंदि-मोक्खं (त्रिदश-वन्दि-मोक्षम्)।

अभ्युपगमे अर्थात् अङ्गीक्रियते इत्यस्मिन्नर्थे **आम** अव्ययस्य प्रयोगः दृश्यते। यथा – आम बहला बणोली। त्रिविक्रमभट्टेन एवमेव उक्तम्, न तु भिन्नम्। प्राकृतसर्वस्वे आम अव्ययस्य उल्लेखोऽस्ति, परन्तु अस्मिन्नेव अर्थे न। तत्र भवान् अर्थे एव अव्ययमिदं गृहीतम्। यथा – आम कुणउ (भवान् करोतु)। पाणिनिव्याकरणे आम् इत्यत्र आम् इति वर्तते। बालमनोरमाकारेणोक्तम् – आम् अङ्गीकारे। अत्र स्वरादिनिपातमव्ययम् इत्यनेन सूत्रेण आम् इत्यस्य अव्ययत्वं सिद्धम्।

वैपरीत्यभावे तु **णवि** इत्यस्य प्रयोगः परिलक्ष्यते। सूत्रं तावत् – णवि वैपरीत्ये[8]। अन्यत्र तु वीपरीतार्थे एव अव्ययमिदं गृहीतं वैयाकरणैः। उदाहरणम् – उण्हेह सीअला णवि कयलि वणे।

पुनःपुनः – अस्मिन्नर्थे प्राकृते व्याकरणे **पुणरुत्तं** इत्यव्ययं प्रचलितं स्यात्।[9] उदाहरणम् – पेच्छ पुणरुत्तं।

अतःपरम्, विषादार्थे विकल्पार्थे पश्चात्तापे निश्चयार्थे सत्ये च **हन्दि** इत्यस्य प्रयोगो भवति।[10] उदाहरणं तावत् – हन्दि चलणे णओ सो ण माणिओ, हन्दि हुज्ज एत्ताहे (हन्दि चरणे नतः, स न मानितः, हन्दि भविष्यति इदानीम्)। हेमचन्द्रमते विषादार्थे हन्दि-अव्ययं विहाय अव्वो इत्यस्यापि प्रयोगः प्रचलितः स्यात्।[11] इदं तु त्रिविक्रमभट्टेनापि स्वीकृतम्। अपि च ओ अव्वो च पश्चात्तापे अर्थे प्रयोगो भवति – इति हेमचन्द्रस्य अभिमतम्। अयमर्थः त्रिविक्रमभट्टेन क्रमदीश्वरेण चापि गृहीतः। यद्यपि भन्दि इत्यव्ययस्यापि प्रयोगः अस्मिन्नर्थे एव भवति – इति तु त्रिविक्रमभट्टः।[12] विकल्पार्थेऽपि न केवलं हन्दि, वणे इत्यस्यापि

प्रयोगो परिलक्ष्यते। निश्चयार्थे हन्दि इति विहाय बले हु खु वणे – इत्येषां प्रयोगः दृश्यते।

इवार्थे प्राकृतव्याकरणे षट् अव्ययानि सन्ति – **मिव पिव विव व्व व विअ** चेति।[13] प्राकृतप्रकाशे इवार्थे म्मिव मिव विअ इत्येषां त्रयाणाम् उल्लेखाः सन्ति। कुत्रापि केवलं अ इत्यस्यापि प्रयोगः प्राप्यते। प्राकृतसर्वस्वे यथा – चंदो अ (चन्द्र इव)।

यदि एवं भवति तर्हि एवं भविष्यति – अस्मिन्नेव अर्थे प्राकृते **जेण तेण** इत्येतौ द्वयौ प्रयोक्तव्यौ। उदाहरणं यथा – भमररुअं जेण कमलवणं। भमररुअं तेण कमलवणं। प्राकृतशब्दानुशासने सूत्रमिदं वर्तते,[14] न तु अन्यत्र।

अवधारणार्थे **णइ – चेअ – चिअ** – च्चादीनाम् अव्ययानां प्रयोगाः सन्ति हेमचन्द्रानुसारेण।[15] यथा – गईए णइ। स च्च य रूवेण (गत्या एव। स एव च रूपेण)। अत्र वररुचिना उक्तम् – विअ-वेअ-अवधारणे। अर्थात् विअ वेअ इत्येतौ अपि अवधारणे प्रयोक्तव्यौ। मार्कण्डेयेन चेअ चिअ इत्यस्मिन् स्थाने च्चेअ च्चिअ च उक्तम्। तेनात्र वृत्तौ उक्तम् – सेवादित्वात् द्वित्वम्।

निर्धारण-निश्चयाभ्यां कृते **बले** अव्ययस्य प्रयोगः दरीदृश्यते।[16] यथा – बले पुरिसो धणंजओ खत्तियाणं (पुरुषः धनञ्जयः क्षत्रियाणां)। (निर्धारणे)। बले सीहो (सिंह एवायम्)। (निश्चये)। उल्लेख्यं यत् निर्धारणे हुं अव्ययस्यापि प्रयोगो भवति – इति तु प्राकृतप्रकाशे एवञ्च संक्षिप्तसारेऽपि।

संस्कृतव्याकरणस्य सम्भावनावाचकस्य इव किल इत्यस्यार्थे प्राकृते साहित्ये **किर इर हिर** – एतेषाम् अव्ययानां प्रयोगः दृश्यते।[17] सूत्रस्यास्य उल्लेखः त्रिविक्रमभट्टेनापि कृतः। परन्तु प्राकृतप्रकाशे वररुचिना भणितम् – इरकिरकिला अनिश्चिताख्याने। अत्र इर-किर-किलाः शब्दाः अनिश्चयस्य असम्यगर्थस्य प्रतिपादने प्रयुज्यन्ते। यथा – या किल रमिओ। अत्र किलशब्दः रमितार्थप्रतिषेधस्य अपरिस्फुटतां कथयति। क्रमदीश्वरेणापि अस्मिन्नर्थे अर्थात् अनिश्चिताख्याने एतेषाम् उल्लेखः क्रियते। परन्तु मार्कण्डेयेन त्वत्र निश्चिताख्यानार्थं स्वीक्रियते।

केवलार्थे **णवर** इत्यव्ययस्य प्रयोगो भवति। वाक्यं यथा – णवर पिआइं चिअ णिव्वडन्ति। (केवलं प्रियाणि एव भवन्ति)। अन्येषां वैयाकरणानां मतं तु अभिन्नम्। केवलं वैसादृश्यं स्यात् णवर इत्यत्र णवरं अस्ति, अत्र तु अनुस्वारसहितम्।

अनन्तरस्य भाव इति आनन्तर्यः। अस्मिन् आनन्तर्यार्थे **णवरि** इत्ययं शब्दः निपातार्थे प्रयुज्यते।[19] यथा – णवरि अ से रहुवइणा। (अनन्तरं च तस्य रघुपतिना)। अत्र स्मर्यते यत् केचित्तु णवरि केवलानन्तर्ययोः इत्येवं सूत्रं पठन्ति। अर्थात् केवलार्थेऽपि णवरि अव्ययस्य प्रयोगः दृश्यते। णवरि छिण्णं सीसं रणेरिउणो। (रणे रिपोः केवलं शिरश्छिन्नम्)।

निवारणार्थे प्राकृते **अलाहि** अव्ययस्य प्रयोगः परिलक्ष्यते।[19] इदं तु सर्वत्रैव दृश्यते, प्राकृतसर्वस्वं विहाय। प्राकृतसर्वस्वे निवारणार्थे अव्ययचतुष्टयस्य उल्लेखःकृतः मार्कण्डेयेन। उदाहरणं यथा –

अण अग्गिं गेण्ह करे, सप्पं छिव माइ पाएहिं।
णाइ खले वीसंभसू, अलाहि जुरावसु तवस्सिं।।

अस्मिन् उदाहरणे निवारणार्थे अव्ययचतुष्टयस्य प्रयोगः लक्ष्यते।

नञर्थे **अण णाइं** इत्येतौ अव्ययसंज्ञकौ व्यवह्रियेते।[20] उदाहरणं यथा – अणचिन्तिअं अजायन्ति

(अचिन्तितं अजानन्ती)। णाइं करेमि रोसं (न करोमि रोषम्)। प्राकृतशब्दानुशासने सूत्रमिदं प्राप्यते, अन्यत्र तु न।

हा धिक् – इत्यस्मिन्नर्थे **हद्धी** इत्यस्य प्रयोगो भवति। सूत्रं हि – हद्धी निर्वेदे।[21] अत्र मार्कण्डेयेन भणितम् – हद्धि खेदानुतापयोः। प्राकृतशब्दानुशासनेऽपि एवंदृश्यते। यथा – हद्धी हद्धी।

**वेव्वे** इति निपातस्य तु भये वारणे विषादे च अर्थे कृते प्रयोगो भवति।[22] उदाहरणं यथा – वेव्वे पलाइदं तेण।

आमन्त्रणार्थे **वेव्व** इत्यव्ययं प्रयुज्यते। अपि च, वेव्वे अपि। वेव्व च आमन्त्रणे – सूत्रे चकारादयमर्थः उपलभ्यते। यथा – वेव्व गोले। वेव्वे मुरन्दले वहसि पाणिअं। आमन्त्रणे मामि हला हले एतेषामपि अव्ययानां प्रयोगः दरीदृश्यते, परन्तु तानि तु सखिम् आमन्त्रणार्थम्। यथा – हला सउन्दले। आमन्त्रणे, अज्ज वेव्वे हो – एतेषां प्रयोगोऽपि दृश्यते – इति तु अन्ये वैयाकरणाः। वररुचिना उक्तम् – अज्ज आमन्त्रणे। उदाहरणं यथा – अज्ज महाणुहाव किं करेसि।

प्राकृते **दे** अव्ययस्य प्रयोगो भवति सम्मुखीकरणार्थे। अपि च सखिम् आमन्त्रणार्थेऽपि एतदव्ययं व्यवह्रियते। सूत्रे चकाराद् अयमर्थः लभ्यते।[23] यथा – दे पसिअ ताव सुन्दरि।

**हुं**-इत्ययं शब्दो दानपृच्छानिवारणेषु अर्थेषु निपातसंज्ञको भवति। अर्थात् दाने, जिज्ञासार्थे, निवारणे च हुं अव्ययस्य प्रयोगो भवति।[24] यथा – हुं देअर गेण्हासु (हुं देवर गृहाण)। वररुचिना क्रमदीश्वरेण च सूत्रमध्ये निवारणस्थाने निर्धारणेति उक्तम्। अर्थात् निर्धारणेऽपि हुं इत्यस्य प्रयोगः दृश्यते। यथा – हुं होसु तुण्हिओ (हुं भव तूष्णीकः)। प्रश्नार्थेऽपि हुं अव्ययस्य प्रयोगः परिलक्ष्यते इति तु प्राकृतसर्वस्वे। उदाहरणं – हुं सो एस जणो।

अतःपरम्, निश्चये वितर्के सम्भावने विस्मये चार्थे **हु खु** इत्येतौ अव्ययसंज्ञकौ व्यवह्रियेते।[25] यथा – तं हु अच्छिन्नसिरी (त्वं अपि अच्छिन्नश्रीः)। वररुचिना हु खु स्थाने यथाक्रमेण हुँ क्खु इति कृतम्। क्रमदीश्वरेण अत्र हुं खु इति कृतम्। अपि च मार्कण्डेयेन हु क्खु खु – त्रयाणाम् अव्ययानामुल्लेखः कृतः। तत्र अर्थोः न तु भिन्नः।

निन्दायाम्, आक्षेपे, विस्मये, सूचनायां च **ऊ** अव्ययस्य प्रयोगो दरीदृश्यते। यथा – ऊ णिल्लज्जो। ऊ किं मए भणिअं (किं मया भणितम्)। इत्यादयः। संक्षिप्तसारे प्राकृतसर्वस्वे च यथाक्रमेण उं इति वर्तते।

कुत्सितार्थे प्राकृते **थू** इत्यस्य प्रयोगो भवति।[25] यथा – थू णिल्लज्जो लोओ। प्राकृतप्रकाशे थू इत्यत्र सू वर्तते। यथा – सू सिविणो। प्राकृतशब्दानुशासने इत्यत्र धू इत्यस्ति। अपि च संक्षिप्तसारे थु इति। वङ्गभाषायां घृणार्थे इत्यस्य प्रयोगो परिलक्ष्यते।

सम्भाषणार्थे रतिकलहे च **रे अरे** अव्ययद्वयस्य प्रयोगः परिलक्ष्यते।[27] यथा- रे हिअय मडअसरिआ (रे हृदय! अल्पसरित्)। वररुचिना क्रमदीश्वरेण च एतद् अव्ययद्वयं विहाय हिरे अव्ययस्यापि उल्लेखः कृतः। हेमचन्द्रमते क्षेपे सम्भाषणे रतिकलहे च हरे इति शब्दो निपातसंज्ञको भवति। सूत्रे चकाराद् अर्थोऽयम् उपलभ्यते।

प्राकृतव्याकरणे **अव्वो** एको निपातः। यस्य प्रयोगो भवति दुःखे आनन्दे अपराधे आदरे – इत्यादिषु अर्थेषु।[28] अव्वो दलत्ति हिअयं (दुःखे)। अव्वो पिअस्स समओ (आनन्दे)। वररुचिना केवलम् अत्र त्रिषु

अर्थेषु अव्ययमिदं गृहीतम्। त्रिविक्रमभट्टः अत्र अब्भो इति कथयति।

सम्भावनार्थे **अइ** – अव्ययं प्रयुज्यते।[29] यथा- अइ एसि रइ-घराओ। वररुचिमतेऽपि अइ सम्भाषणार्थे प्रयुक्तो भवति। त्रिविक्रमभट्टेन कथितं संभावने अइ च। अस्मिन् सूत्रे च-कारात् पूर्ववर्तिसूत्रात् वणे इति अनुवर्तते। अतएव सम्भावने अइ वणे च द्वौ निपातौ प्रयोक्तव्यौ। क्रमदीश्वरेण तु वणे इत्यत्र बले इत्युक्तम्। यद्यपि हेमचन्द्रेण वणे इत्यव्ययं गृहीतम्, परन्तु तत् न केवलं सम्भावनार्थे, बहुषु अर्थेष्वेव। वणे निश्चयविकल्पानुकम्पे च – अत्र च-कारात् सम्भावनार्थोऽवबुध्यते। यथा – वणे देमि (निश्चयं ददामि)। होइ वणे न होइ (भवति वा न भवति)। दासो वणे न मुच्चइ (दासः न त्यज्यते)।

विमर्शे अर्थे **मणे** अव्ययस्य प्रयोगो भवति।[30] यथा – मणे सूरो। प्राकृतशब्दानुशासने त्रिविक्रमभट्टेनापि सूत्रमिदम् उल्लिखितम्। अन्यत्र तु नोपलभ्यते।

**अम्मो** अव्ययमेकम्।[31] इदं तु केवलं हेमचन्द्राचार्येण त्रिविक्रमभट्टेन च स्वीकृतम्, न तु अन्यैः वैयाकरणैः। अव्ययमिदम् आश्चर्ये अर्थे प्रयुज्यते। यथा – अम्मो कहं पारिज्जइ (कथं शक्यते)।

स्वयमर्थे प्राकृते **अप्पणो** अव्ययस्य प्रयोगो दृश्यते।[32] सूत्रमध्ये वा-कारेण विकल्पार्थः गृह्यते। यथा- विसअं विअसन्ति अप्पणो कमलसरा (विशदं विकशन्ति स्वयं कमलसरांसि)। त्रिविक्रमभट्टः अत्र अप्पणा इत्यव्ययं स्वीकरोति।

प्रत्येकमर्थे **पाडिक्कं पाडिएक्कं** च प्रयुज्यते।[33] सूत्रमध्ये यद्यपि वा इति पदं नास्ति, तथापि सूत्रमिदं वैकल्पिकम्। वृत्तौ उक्तम् – प्रत्येकमित्यस्यार्थे पाडिक्कं पाडिएक्कं इति च प्रयोक्तव्यं वा।... पक्षे पत्तेअं। यथा – पाडिक्कं मित्ताइं। सूत्रमिदं प्राकृतशब्दानुशासने उपलभ्यते।

हेमचन्द्रानुसारेण, पश्य-अस्मिन्नर्थे प्राकृतव्याकरणे **उअ** अव्ययस्य प्रयोगो भवति।[34] सूत्रमिदं प्राकृतशब्दानुशासने प्राकृतसर्वस्वे च उपलभ्यते। उदाहरणं यथा – उअ णिच्चलणिप्पदां (पश्य निश्चलनिष्पन्दा)। सूत्रमिदं वैकल्पिकम्। तस्मात् कुत्रापि ओअच्छ कुत्रापि वा उवह कुत्रापि पुलअ इत्यादीनि रूपाणि दरीदृश्यन्ते।

इतरथा अर्थे **इहरा** अव्ययमिदं प्रयुज्यते।[35] सूत्रमिदं केवलं प्राकृतशब्दानुशासने प्राप्यते, न तु अन्यत्र। सूत्रमिदं वैकल्पिकम्। अस्य रूपान्तरं भवति – इअरहा। यथा – इहरा नीसामन्नेहिं (इतरथा निःसामान्यैः)।

सम्प्रति तथा शीघ्रार्थे **एक्कसरिअं** अव्ययं व्यवहृतम्।[36] त्रिविक्रमभट्टेनापि एतदुक्तम्, न तु भिन्नम्। परन्तु प्राकृतसर्वस्वे शीघ्रार्थे षडव्ययानाम् उल्लेखाः सन्ति। तानि यथा – झत्ति, सहसत्ति, घत्ति, चडत्ति, णवत्ति, एकरिसिअ इति। उदाहरणं यथा – झत्ति वोल्लइ। सूत्रमिदं प्राकृतशब्दानुशासने वैकल्पिकरूपेण उक्तं त्रिविक्रमभट्टेन। अतएव रूपं भवति झत्ति, संपइ इति।

अतः **मोरउल्ला** अव्ययमेकम्।[37] यस्यार्थो विफलो व्यर्थो वा। यथा – मा तम्म मोरउल्ला।

अल्पार्थे अर्धार्थे च **दर** अव्ययस्य प्रयोगो भवति।[38] यथा – दर विअसिअं (अर्धेन ईषद्वा विकसितम्)। सूत्रमिदं वैकल्पिकम् इति तु त्रिविक्रमभट्टः।

प्रश्नार्थे **किणो** अव्ययस्य व्यवहारः दृश्यते।[39] यथा – किणो धुवसि (किम धुनासि)? प्राकृतप्रकाशे, प्राकृतशब्दानुशासने एवमेव रूपेण सूत्रमिदं प्राप्यते। संक्षिप्तसारेऽपि वा। परन्तु अत्र कीस अव्ययस्य उल्लेखः कृतः क्रमदीश्वरेण।

**इ जे र** चेति प्राकृतव्याकरणे अव्ययरूपेण परिगण्यते।[40] येषां व्यवहारः केवलं पादपूरणार्थे भवति। अत्र मार्कण्डेयेन उक्तम् – खल जे दे इ र पादपूरणे। उदाहरणं यथा – अणुकूलं वोन्तुं जे (अनुकूलं वक्तुम्)।

ग्रहणं कुरु इत्यस्मिन्नर्थे **हन्द हन्दि** च अव्ययद्वयं प्रयुज्यते। यथा – हन्द महु हन्दि परिमलमिमं। अपि अर्थे **पि वि** चेति प्रयोगो भवति। यथा – न हु अत्थि न वि अ हुअं।

परिलक्ष्यते यत्, अव्ययेषु कानिचन अर्थयुक्तानि कानिचन वा अनर्थकानि भवन्ति। एकस्याव्ययस्य नानार्थे व्यवहारोऽपि दृश्यते। एकस्मिन्नर्थे एकाधिकाव्ययमपि समुपलभ्यते। ननु भाषाणामलङ्काराः भवन्ति इमानि अव्ययानि। भाषाप्रयोगे, वाक्यनिर्माणे एतेषामुपयोगाः बुधैः उदात्तकण्ठेन स्वीकृताः। सर्वासां भाषाणामिव प्राकृतभाषायामपि मनोहरार्थयुक्तानि अव्ययानि सन्ति। प्राकृतव्याकरणग्रन्थेषु तानि खलु सुचारुरूपेण वर्णितानि। तान् ग्रन्थानाधारीकृत्य प्राकृताव्ययस्वरूपाणि अर्थाश्च आलोचिताः। अर्थयोगेन प्राकृताव्ययानां सारणी अधः प्रदत्ता।

| **अर्थः / अव्ययम्** | **अर्थः / अव्ययम्** |
|---|---|
| वाक्योपन्यासे – तं | विपरीते – णवि |
| कृतकरणे – पुणरुत्तं | विषादे – हन्दि, वेव्वे, ऊ, हरे, अव्वो |
| कल्पनायाम् – हन्दि | पश्चात्तापे – हन्दि, ओ, अव्वो |
| निश्चये – हन्दि, वले, हु, खु, वणे | निश्चये – हन्दि, वले, हु, खु, वणे |
| गृहाणे – हन्द, हन्दि | इव – मिव. पिव, विव, व्व, व, विअ |
| लक्षणे – जेण, तेण | अवधारणे – णइ, चेअ, चिअ, च्च |
| निर्धारणे - बले | किल – किर, इर, हिर |
| केवले – णवरं, णवरि | अनन्तरे – णवरि |
| निवारणे – अलाहि, हुं | नञर्थे – अण, णाइं |
| निषेधे – माइं | हा धिक् – हद्धि |
| भये – वेव्वे, अव्वो | वारणे – वेव्वे |
| आमन्त्रणे – वेव्व, वेव्वे | सखि-आमन्त्रणे – मामि, हला, हले, दे |
| सम्मुखीकरणे – दे | दाने – हुं |
| जिज्ञासायाम् – हुं | सम्भाषणे – हु, खु, रे, अरे, अव्वो |
| वितर्के – हु, खु | निन्दायाम् – ऊ, थू, सू |
| सूचनायाम् – ऊ, ओ, अव्वो | रतिकलहे – रे, अरे |
| विस्मये – हु, खु, अव्वो | दुःखे – अव्वो |
| अपराधे – अव्वो | आनन्दे – अव्वो |

| | |
|---|---|
| आदरे – अव्वो | सम्भावनायाम् – हु, खु, अइ, वणे |
| विमर्शे – मणे | आश्चर्ये – अम्मो |
| स्मयम् – अप्पणो, अप्पणा | प्रत्येकम् – पाडिक्कं, पाडिएक्कं, पत्तेअं |
| पश्य – उअ | इतरथा – इहरा, इअरहा |
| शीघ्रतायाम् – एक्कसरिअं, झटिति | व्यर्थे – मोरउल्ला |
| अर्धे – दर | अल्पे – दर |
| प्रश्ने – किणो, कीस | पादपूरणे – पि, वि |
| विकल्पे – वणे, हन्दि | अनुकम्पायाम् – वणे |
| स्वीकारे - आम | |

**अन्त्यटीका—**

1. 1.1.26
2. पा. सू. – 1-1-37
3. तदेव – 1-1-38
4. तदेव – 1-1-39
5. तदेव – 1-1-40
6. तदेव – 1-1-41
7. सि.हे.श. – 8-2-176
8. तदेव – 8-2-178
9. तदेव – पुणरुत्तं कृतकरणे (8-2-179)
10. तदेव – हन्दि-विषाद-विकल्प-पश्चात्ताप-निश्चय-सत्ये (8-2-180)
11. तदेव – अव्वो सूचना-दु:ख-सम्भाषणापराध-... (8-2-204)
12. भन्दि विकल्प-विषाद-सत्य-निश्चय-पश्चात्तापेषु च (प्रा.श.)
13. सि.हे.श. – मिव पिव विव व्व व विअ इवार्थे वा (8-2-182)
14. लक्षणे जेण तेण
15. सि.हे.श. – णइ चेअ चिअ च्च अवधारणे (8-2-184)
16. तदेव – वले निर्धारणे-निश्चययो: (8-2-185)
17. तदेव – किरेर हिर किलार्थे वा (8-2-186)
18. तदेव – आनन्तर्ये णवरि (8-2-188)
19. तदेव – अलाहि निवारणे (8-2-189)
20. तदेव – अण णाइं नञर्थे (8-2-190)

21. तदेव – 8-2-192
22. तदेव – वेव्वे भय-वारण-विषादे (8-2-193)
23. तदेव – दे संमुखीकरणे च (8-2-196)
24. तदेव – हुं दान-पृच्छानिवारणे (8-2-197)
25. तदेव – हु खु निश्चय-वितर्क-सम्भावन-विस्मये (8-2-198)
26. तदेव – थू कुत्सायाम् (8-2-200)
27. तदेव – रे अरे सम्भाषण-रतिकलहे (8-2-201)
28. तदेव – अव्वो सूचना-दु:ख... पश्चात्तापे (8-2-204)
29. तदेव – अइ संभावने (8-2-205)
30. तदेव – मणे विमर्शे (8-2-207)
31. तदेव – अम्मो आश्चर्ये (8-2-208)
32. तदेव - स्वयमोर्थे अप्पणो न वा (8-2-209)
33. तदेव – प्रत्येकम: पाडिक्कं पाडिएक्कं (8-2-210)
34. तदेव – उअ पश्य (8-2-211)
35. तदेव – इहरा इतरथा (8-2-212)
36. तदेव – एक्कसरिअं झगिति सम्प्रति (8-2-213)
37. तदेव – मोरउल्ला मुधा (8-2-214)
38. तदेव – दरार्धाल्पे (8-2-215)
39. तदेव – किणो प्रश्ने (8-2-216)
40. तदेव – इ-जे-रा: पादपूरणे (8-2-217)

**ग्रन्थपञ्जी**

Siddhahemaśabdśānuśāsanam (Hemachandra). Ed. By Jagatram Bhattacharya, Kolkata, Sanskrit Book Depot, 2023.

Prakrit Grammar (Trivrikrama). Ed. By P.L.Vaidya, Sholapur, Jaina Sanskriti Samraksaka Sangha, 1954.

प्राकृतव्याकरण (हेमचन्द्रकृत)। सम्पा. – के.वा.आप्टे। वाराणसी, चौखाम्बा संस्कृत संस्थान, 1996.

प्राकृतसर्वस्वम् (मार्कण्डेयविरचितम्)। Ed. By Krishna Chandra Acharya, Ahmedabad, Prakrit Text Society, (NA)

प्राकृतप्रकाश: (वररुचिप्रणीत:)। The Kashi Sanskrit Series 38, Chaukhambha Sanskrit Sansthan, 2007(rept.).

# सुपद्म-व्याकरणस्यालोके समासस्य संक्षिप्तालोचनम्

**श्रेयश्री-दासः**

**सारसंक्षेपः –**

भारतभूमौ व्याकरणशास्त्रस्य आविर्भावो भवति वेदाङ्गरूपेण, वेदस्य सहायकशास्त्रम् इत्यर्थः। मनुष्यशरीरे विद्यमानैः अङ्गैः सह वेदाङ्गानि उपमीयन्ते। मनुष्यशरीरे विद्यमानेन प्रधानाङ्गेन मुखेन सह व्याकरणशास्त्रस्य तुलना भवति। इयम् उपमा वेदाङ्गानां मध्ये व्याकरणशास्त्रस्य प्राधान्यं प्रकाशयति। आचार्य-पाणिनिना विरचितः *अष्टाध्यायी* इति ग्रन्थः वैयाकरणसम्प्रदायैः वेदाङ्गरूपेण गृहीतः। आचार्य-पाणिनिना दशानाम् पूर्वाचार्याणाम् उक्तानि नामानि यथा पाणिनेः पूर्वं व्याकरणशास्त्रस्य प्रबलम् अभ्यासप्रवृत्तिम् अभिव्यञ्जयन्ति तथा पाणिनि-पश्चात्काले रचितानि *कातन्त्र-व्याकरणं मुग्धबोध-व्याकरणं* च इति व्याकरणग्रन्थाः परवर्तिकाले व्याकरणशास्त्रस्य अभ्यासधारां प्रकाशयन्ति। एवम् पाणिनि-परवर्तिकाले आचार्य-पद्मनाभदत्तेन विरचितं *सुपद्म-व्याकरणम्,* अपाणिनीय-व्याकरणम् इति। अस्मिन् व्याकरणे सन्धि-संज्ञादीनि सूत्राणि प्रकरणाकारेण उपस्थास्यन्ते। व्याकरणशास्त्रस्य प्रधानविषयाणां मध्ये एकपादीभवः अर्थात् समासः च अन्यतमः महत्वपूर्णविषयः। समाससूत्रविरचने, समासविभागकरणे तथा व्याख्याप्रदाने च वैयाकरणस्य अस्य स्वतन्त्रता दृश्यते। अतः *सुपद्म-व्याकरण*स्थिते समासविषये संक्षेपेण उपस्थापना एव अस्य प्रबन्धस्य विषयः इति।

**कृञ्चीशब्दाः –**

*वेदाङ्गशास्त्ररूपेण व्याकरणशास्त्रस्य* प्राधान्यम्, सुपद्म-व्याकरणस्य *सामान्यपरिचयः,* समाससंज्ञाविभागादयः, पाणिनीय-व्याकरणेन सह तुलनात्मकालोचना।

**मूलप्रबन्धः –**

सर्वज्ञानस्य तथा सर्वशास्त्रस्य आधारः प्रभवः च वेदः। एतया वेदरूपधारया न केवलं भारतभूमिः अपि तु सर्वं जगत् समृद्धं जातम्। अस्य ग्रन्थस्य अक्लेशरूपेण अध्ययनाय सहायकानि षट् शास्त्राणि सन्ति, यानि अङ्गानि इति कथ्यन्ते। अङ्गम् इति पदं यथा अवयव-वाची तथा उपाय-वाची इत्यपि दृश्यते। अन्यैः पदैः सह समासे अङ्गम् इति पदम् अवयव-वाची भवति। अतः वेदस्य अङ्गम् वेदाङ्गम् वेदावयव इत्यर्थः। पुनः वेदार्थस्य अवगताय एतानि शास्त्राणि उपायरूपाणि सहायकरूपाणि च एवमपि व्याख्यातुं शक्यते। छन्दः, कल्पः,ज्योतिषम्, निरुक्तं, शिक्षा, व्याकरणं च - एतानि शास्त्राणि वेदाङ्गम् इति प्रसिद्धानि। वेदस्य एते सहायकग्रन्थाः मनुष्यशरीरस्थितैः अङ्गैः सह उपमीयन्ते। *पाणिनीय-शिक्षायाम्* आह -

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।**

**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।** [१]

मनुष्यशरीरे यथा मुखस्य प्राधान्यमस्ति तथा एतेषां वेदाङ्गानां मध्ये व्याकरणस्य प्राधान्यमस्ति। अथ एतद् वक्तुं शक्यते, भारतवर्षे व्याकरणशास्त्रस्य प्रादुर्भावो भवति वेदाङ्गशास्त्ररूपेण। मुख्यविषयस्य विषये आचार्य-पतञ्जलिना उक्तम् - 'प्रधाने च कृतो यत्नः फलवान् भवति'[२]। वाक्यस्य शुद्धतायाः रक्षणाय, अशुद्धतायाश्च दूरीकरणाय इदं व्याकरणशास्त्रं चिकित्सकरूपम्। यथा *वाक्यपदीये* विद्यते – 'तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्[३]। संस्कृतवाङ्मये बहवः व्याकरणग्रन्थाः विरचिताः। किन्तु तेषां मध्ये ई.पू. पञ्च-षष्ठ-शतके आचार्य-पाणिनिना रचितस्य *अष्टाध्यायी* इति ग्रन्थस्य प्रामाण्यं लोकप्रसिद्धम्। तर्हि अयं ग्रन्थः पण्डितैः वेदाङ्गम् इति स्वीकृतः। आचार्य-पाणिनिश्च संस्कृतजगतः मध्यमणिः इति गण्यते। आचार्य-पाणिनिः तस्य ग्रन्थे दशानाम् आचार्याणां नामानि उल्लिखितवान्, यद् आचार्य-पाणिनेः पूर्वं विद्यमानाम् अभ्यासधारां संस्कृत-व्याकरणशास्त्रस्य प्रकाशयति। यस्मिन्नेव सूत्रे आचार्य-पाणिनिना पूर्वाचार्याणां नामानि उल्लिखितानि तानि सूत्राणि अधः दीयते –

१) आपिशलिः - वा सुप्यापिशलेः (६।१।९२)।
२) काश्यपः - तृषिमृषिकृषेः काश्यपस्य (१।२।२५), नोदात्तस्वरितोदयमगार्ग्य-काश्यप-गालवानाम् (८।४।६७)।
३) गार्ग्यः - अड् गार्ग्य-गालवयोः (७।३।९९)।
४) गालवः - इको ह्रस्वोऽङ्यो गालवस्य (६।३।६१), तृतीयादिषु भाषितपुंस्कं पुंवद् गालवस्य (७।१।७४), अड् गार्ग्य-गालवयोः (७।३।९९), नोदात्तस्वरितोदयमगार्ग्य-काश्यप-गालवानाम् (८।४।६७)।
५) चाक्रवर्मणः - ई चाक्रवर्मणस्य (६।१।१३०)।
६) भारद्वाजः - ऋतो भारद्वाजस्य (७।२।६३)।
७) शाकटायनः - लङः शाकटायनस्यैव (३।४।१११), व्योर्लघुप्रयत्नतरः शाकटायनस्य (८।३।१८), त्रिप्रभृतिषु शाकटायनस्य (८।४।५०)।
८) शाकल्यः - सम्बुद्धौ शाकल्येतावनार्षे (१।१।१६), इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च (६।१।१२७), लोपः शाकल्यस्य (८।३।१९), सर्वत्र शाकल्यस्य (८।४।५१)।
९) सेनकः - गिरेश्च सेनकस्य (५।४।११२)।
१०) स्फोटायनः - अवङ् स्फोटायनस्य (६।१।१२१)।

संस्कृत-व्याकरण-साहित्यस्य ऐतिहासिकाः आचार्य-पाणिनिं मध्यमणिः इति गृहीत्वा अखिलं व्याकरण-साहित्य-जगत् त्रीभिः युगैः विभक्तवन्तः। यथा – प्राक्-पाणिनीययुगं, पाणिनीययुगं, पाणिनि-परवर्तियुगं च। एषां त्रयाणां युगानां मध्ये प्राक्-पाणिनीययुगे तथा पाणिनि-परवर्तियुगे च रचिताः व्याकरणग्रन्थाः अपाणिनीय-व्याकरणम् इति कथ्यन्ते। प्राक्-पाणिनीययुगे रचिताः ग्रन्थाः अधुना न प्राप्यन्ते। अतः साम्प्रतं पाणिनि-परवर्तियुगे रचिताः व्याकरणग्रन्थाः अनेन पदेन ज्ञायन्ते। बहवः ऐतिहासिकाः अपाणिनीय इति पदेन पाणिनि-विरुद्धः इत्यर्थं गृहीतवन्तः। पाणिनीय-व्याकरणे वैदिकभाषायाः लौकिकभाषायाः च

पदानां शुद्धताविषये सूत्राणि दृश्यन्ते। किन्तु पाणिनि-परवर्तिकाले समाजे वैदिकभाषायाः प्रयोगः क्रमेण न्यूनीभवति। अतः तत्विषयकानां सूत्राणाम् अध्ययनं तथा प्रयोजनं च लुप्तं जातम्। तदर्थं च परवर्तिकालिनः वैयाकरणाः वैदिकभाषायाः पदशुद्धिविषयकान् नियमान् परित्यज्य केवलं लौकिकभाषायां स्थितैः पदैः सह अन्वितानि सूत्राणि रचितवन्तः। किन्तु एतद् वक्तुं न शक्यते यत्, सर्वैः वैयाकरणैः वैदिकव्याकरणस्य सूत्राणि परित्यक्तानि। यतः बहुभिः पाणिनि-परवर्तिभिः वैयाकरणैः तेषां व्याकरणग्रन्थे वैदिकपदानां शुद्धिविषये कतिपयाः नियमाः आलोचिताः। *सरस्वतीकण्ठाभारणम्* इति व्याकरणे वैदिकपदविषये कतिपयाः नियमाः उल्लिखिताः जाताः। एवम् अपरम् अपाणिनीय-व्याकरणम् आचार्य-वोपदेवेन रचितं *मुग्धबोधव्याकरणम्* इति। अत्र वैयाकरणेन सुस्पष्टेन वैदिक-पदविषये सूत्राणि न उल्लिखितानि। परन्तु वैदिकपदानां शुद्धताविषये अस्मिन् व्याकरणे यत् अन्तिमं सूत्रं 'बहुलं ब्रह्मणि' (मुग्ध. ११८४) इति लभ्यते तत् वैदिकव्याकरणस्य मूल-वैशिष्ट्यं प्रकाशयति। अत्र **ब्रह्मणि** इति पदेन **वेद** इति बोधयति। अपरपक्षे **बहुलम्** इति पदविषये आचार्यैः उक्तम् –

**क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव।**
**विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति।।**[४]

अनेन सूत्रेण ग्रन्थकारः सूचयितुम् इच्छति यत्, लौकिकसंस्कृत-व्याकरणस्य नियमाः सर्वत्र वैदिकपदविषये न प्रयोज्यन्ते इति।

पुनः भारतभूमौ नास्तिकदर्शनरूपेण परिचिताः बौद्धादयः कतिपयाः सम्प्रदायाः वेदं प्रति नास्तिकत्वात् व्याकरणरचनाकाले वैदिकपदविषये सूत्राणि न गृहीतवन्तः इत्यपि श्रूयते। यथा *चान्द्र-व्याकरणम्, शाकटायन-व्याकरणम्* इत्यादयः। एतेषां मध्ये *चान्द्र-व्याकरणस्य* रचयिता आचार्य-चन्द्रगोमी बौद्धधर्मावलम्बी आसीत् इति संस्कृत-व्याकरण-साहित्यस्य ऐतिहासिकाः उक्तवन्तः। बौद्धसम्प्रदायान् लोकान् सरलपथेन संकृतभाषायाः शिक्षणाय अयं ग्रन्थः रचितः इति कथ्यते। किन्तु अस्मिन् व्याकरणे उल्लिखितमेकं सूत्रम् अस्ति येन एतद् ज्ञायते, *चान्द्र-व्याकरणे* वैदिकपदानां साधुत्वविषये आलोचना आसीत्। एतद्विषये सूत्रं यथा 'स्वरविशेषमष्टमे वक्ष्यामः' (चान्द्र. व्या. १.१.१४५)। अनेन सूत्रेण एतद् बोध्यते, वैदिकस्वराणां विषये सूत्राणि आचार्येण अष्टमाध्याये आलोचितानि। किन्तु अधुना प्राप्ते *चान्द्रव्याकरणे* केवलं षट् अध्यायाः दृश्यन्ते। तेन एतद् अनुमीयते यत्, नास्तिकत्वात् वैदिकभाषायाः व्याकरणविषयके अध्यायद्वये स्थितानि सूत्राणि परित्यक्तानि बौद्धाचार्यैः इति ।

एतस्मिन् अवसरे अपाणिनीय इति पदस्य चर्चायाः आवश्यकता वर्तते। न पाणिनीय इति अपाणिनीयः, नञ्तत्पुरुषसमासः। नञ् इति अव्ययपदस्य षट् अर्थाः कथ्यन्ते। एतस्मिन् विषये एका कारिका प्रसिद्धा जाता –

**तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।**
**अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः।।**[५]

तत्सादृश्यम् (न क्षत्रियः = अक्षत्रियः, क्षत्रियसदृशः), अभावः (न दुःखम = अदुःखम्, दुःखस्य अभावः), तदन्यत्वं (न पटः = अपटः, पटादन्यः), अल्पता (न केशी = अकेशी, स्वल्पकेशः), अप्राशस्त्यं (न युगम् = अयुगम्, अप्राशस्त्ययुगम्), विरोधः (न सुरः = असुरः, सुरविरोधी) च। एतेषु षट्सु अर्थेषु मध्ये

अपाणिनीय इति पदे विद्यमानेन नञ् इति अव्ययपदेन तत्सादृश्यम् तदन्यत्वं च इति अर्थद्वयं ग्रहणीयम्, अर्थात् पाणिनीयसदृश: पाणिनीयभिन्नं च।

पुन: अत्र अन्यविषयोऽपि लक्ष्यते, यदा समाजे संस्कृतभाषया सह अन्यभाषा व्यवह्रियते तदा तस्या: भाषाया: पदसिद्धिविषयका: नियमा: लौकिकभाषाया: नियमै: सह व्याकरणग्रन्थे स्थानं लब्धा:। यथा प्राकृतभाषाया: सूत्राणि पाणिनि-परवर्ति-काले रचिते कतिपये व्याकरणग्रन्थे उपलभ्यन्ते। *हैमव्याकरणं संक्षिप्तसारव्याकरणं* च एतस्मिन् विषये प्रमाणम्।

अत: उपर्युक्तविमर्शात् एतत् स्पष्टं यत्, अपाणिनीयम् इति पदेन सर्वांशे पाणिनि-विरुद्धम् इत्यर्थ: न ग्रहणीय:।

पाणिनि-परवर्तिकाले विरचिता: कतिपया: व्याकरणग्रन्था: यथा – *कातन्त्र-व्याकरणं, चान्द्रव्याकरणं, शाकटायन-व्याकरणं, जैनेन्द्र-व्याकरणं, हैमशब्दानुशासनं, मुग्धबोधव्याकरणं, संक्षिप्तसारव्याकरणं, सुपद्मव्याकरणं, हरिनामामृतव्याकरणं, सरस्वतीकण्ठाभरण*-व्याकरणम् इति। अस्य प्रबन्धस्य शिरोनामानुसारेण प्रसिद्धानाम् अपाणिनीयव्याकरणानां मध्ये आचार्य-पद्मनाभदत्तेन विरचितस्य *सुपद्मव्याकरणस्य* समासविषये आलोचनात् पूर्वं *सुपद्म-व्याकरणस्य* विषये संक्षेपेण चर्चा क्रियते।

*सुपद्म-व्याकरणं* पाणिनि-परवर्ति-काले रचितम् अपाणिनीय-व्याकरणम्। अस्य व्याकरणस्य विषयानां पर्यालोचनं कृत्वा वक्तुं शक्यते, अत्र अपाणिनीयम् इति शब्दे विद्यमानं नञ् इति अव्ययं नञ: षट्विधानाम् अर्थानां मध्ये तत्सादृश्यम् इत्यर्थं बोधयति, न तु तदन्यत्वम्। यत: ग्रन्थकारेण स्वयमेव उक्तं *सुपद्म-व्याकरणस्य* मङ्गलाचरणश्लोकस्य व्याख्यायाम् – 'विवरणञ्च तस्य शब्दानुशासनेन सह पाणिनीयाादिशब्दस्मृतीरुपलक्ष्य सौकार्योपाध्यये ...'[६] इति। अस्य ग्रन्थस्य सूत्राणामुपरि पाणिनीय-सूत्राणां प्रभाव: सुस्पष्टरूपेण दृश्यते। परन्तु क्षेत्रविशेषे आचार्येण स्वतन्त्रतापि प्रदर्शिता। अत्र आचार्य-पद्मनाभदत्त: वैदिक-व्याकरणस्य स्वरादि-विषयान् परित्यज्य केवलं लौकिक-भाषाया: साधुत्वं प्रतिपादितवान् '...पद्मनाभ: स्फुटं पूर्णं भाषायामाह लक्षणम्'[७]।

पञ्चाध्याय-विंशतिपादविशिष्टे अस्मिन् ग्रन्थे संज्ञा-सन्धि-कारकादीनि सूत्राणि प्रकरणाकारेण उपस्थापितानि। एकया पीठिकया अध्यायविभाजनं पादस्थिता: विषया: च अध: उल्लिख्यन्ते।

| अध्याया: | पादा: | विषया: |
|---|---|---|
| प्रथमाध्याय: | १) प्रथमपाद: | संज्ञाप्रकरणम् |
| | २) द्वितीयपाद: | सन्धिप्रकरणम् (अच्सन्धि:,व्यञ्जनसन्धि:) |
| | ३) तृतीयपाद: | सन्धिप्रकरणम् (विसर्गसन्धि: + षत्वप्रकरणम्) |
| | ४) चतुर्थपाद: | णत्वप्रकरणम् |
| द्वितीयाध्याय: | १) प्रथमपाद: | कारकप्रकरणम् |
| | २) द्वितीयपाद: | विभक्तिप्रकरणम् |
| | ३) तृतीयपाद: | सुबन्तप्रकरणम् |
| | ४) चतुर्थपाद: | सुबन्त-सर्वनामप्रकरणम् |

| | | |
|---|---|---|
| तृतीयाध्याय: | १) प्रथमपाद: | तिङन्तसनादिप्रकरणम् |
| | २) द्वितीयपाद: | तिङन्त-ङित्-प्रकरणम् |
| | ३) तृतीयपाद: | पदकदम्बप्रकरणम् |
| | ४) चतुर्थपाद: | अट्प्रकरणम् |
| चतुर्थाध्याय: | १) प्रथमपाद: | कृत्प्रकरणम् |
| | २) द्वितीयपाद: | उणादिप्रकरणम् |
| | ३) तृतीयपाद: | समासप्रकरणम् |
| | ४) चतुर्थपाद: | अलुक्प्रकरणम् |
| पञ्चमाध्याय: | १) प्रथमपाद: | वृद्धि-तद्धित-प्रकरणम् |
| | २) द्वितीयपाद: | स्त्री-तद्धित-प्रकरणम् |
| | ३) तृतीयपाद: | शेष-तद्धित-प्रकरणम् |
| | ४) चतुर्थपाद: | मधु-तद्धित-प्रकरणम् |

अयं ग्रन्थ: प्रक्रियाक्रमेण रचित:, यत: संज्ञा-सन्धि-कारकादीनि सूत्राणि तत्तत्-नाम-निर्दिष्टे अध्याये सन्निवेशितानि। किन्तु पदसाधनविषये वृद्ध्यादिकार्यविधायके सूत्रविषये च तत्तत्-निर्दिष्ट-प्रकरणस्य अपेक्षा सुस्पष्टा। अत: एवं वक्तुं शक्यते, वैयाकरण: यथोद्देशपक्षावलम्बी आसीत्।

प्रयोजनमनुद्दिश्य मन्द: अपि न प्रवर्तते – इति वचनं स्मृत्वा पाणिनीय-व्याकरणे स्थितेऽपि अस्य अपाणिनीय-व्याकरणस्य गुरुत्वविषये शङ्का जायते। अत: वक्तुं शक्यते, पाणिनीय-सूत्राणां सरलार्थस्य प्रापणाय बोधनाय च। पुन: पाणिनि-परवर्तिकाले लौकिकभाषायाम् अनुप्रविष्टानां नूतनपदानां शुद्धताया: प्रतिपादनाय आचार्य-पद्मनाभदत्तेन अयं व्याकरणग्रन्थ: अनुसर्यते।

अस्य ग्रन्थस्य रचयिता श्रीदत्तस्य पौत्र: दामोदरदत्तस्य पुत्र: च ई.चतुर्दशशतकस्य आचार्य-पद्मनाभदत्त:। एतस्य आचार्यस्य जीवनकालविषये तथैव कोऽपि सूचना न उपलभ्यते। *शब्दशास्त्रेर इतिहास* इति बङ्गालभाषायां विरचितेऽस्मिन् ग्रन्थे उक्तम्, आचार्यपद्मनाभदत्त: मिथिलाया: भोरग्रामस्य निवासी आसीत्। अयं ग्रन्थकार: न केवलं *सुपद्म-व्याकरणं*, तस्योपरि *सुपद्म-विवरण-पञ्जिकामपि* रचितवान्। एतौ ग्रन्थौ विहाय आचार्येण *उणादि-वृत्ति:, यङ्लुगादि-वृत्ति:, भूरिप्रयोग:, परिभाषावृत्ति:, आनन्दलहरी-टीका* इति दश ग्रन्था: विरचिता:। एषां ग्रन्थानां मध्ये कतिपयानां ग्रन्थानां पुष्पिकांशे स्व-वंशवृक्षविषये तालिका प्रदत्ता आचार्य-पद्मनाभदत्तेन। तत् सूच्यनुसारेण, वररुचि: आचार्य-पद्मनाभस्य पूर्वपुरुष: आसीत्। य: विक्रमादित्यराजस्य नवरत्नसभाया: अन्तर्भुक्तस्य कालिदासस्य समकालिक: आसीत्। न केवलं वररुचि:, न्यासदत्त:, दुर्घटाचार्य:, हलायुधाचार्य: इत्येषाम् प्रसिद्धाचार्याणां नामानि अपि प्राप्यन्ते आचार्य-पद्मनाभदत्तस्य पूर्वाचार्यरूपेण। किन्तु अस्मिन् विषये सन्देह: भवति यत: ग्रन्थस्य प्रसिद्धे: हेतो: देवतासम्बन्ध: प्रख्यातजनानां नाम-ग्रहणं च इति दृश्यते श्रूयते च।

अत: प्रबन्धस्य शिरोनामानुसारेण अधुना अस्य ग्रन्थस्य चतुर्थाध्यायस्य तृतीयपादस्थिते समासप्रकरणविषये आलोच्यते। समास: इति प्रक्रियावाचकं संज्ञावाचकं च पदम्। आचार्येण अनेकपदस्य एकपदत्वं समास इत्युक्तम्। अस्य प्रकरणस्य 'समर्थानां समास:'(सु. ४.३.१) इति

प्रथमसूत्रं तथा अधिकारसूत्रम्। समस्यमानानां पदानां चरित्रं प्रकाशयति इदं सूत्रम्। अनेन सूत्रेण परस्परान्वयसम्बद्धयुक्तानां पदानां समासो विधीयते। किन्तु महाभाष्यकारेण 'समर्थ: पदविधि:' (पा.२.१.१) इति पाणिनीय-सूत्रं परिभाषा इति कथ्यते 'परिभाषाया युक्तत्वे कर्तव्यम'[८]। अत: अत्र उभयाचार्ययो: मध्ये आपातत: विरोधो दृश्यते। अस्मिन् अवसरे वक्तुं शक्यते, अधिकारसूत्रस्य उपयोगिता स्वसूत्रे न भवति परन्तु परवर्तिसूत्राणां कार्यमनेन सिद्ध्यति। तथास्य प्रसार: अधिक: भवति। *महाभाष्ये* आह 'अधिकारो यथा रज्ज्वायसा वा बद्धं काष्ठमनुकृष्यते तद्वदनुकृष्यते च-कारेण'[९] । सुपद्मकारेण उक्तस्य 'समर्थानां समास:' इति सूत्रस्य अधिकार: तथा कार्यं केवलं अस्मिन् प्रकरणे सीमितम्। किन्तु 'समर्थ: पदविधि:' इति पाणिनीय-व्याकरणस्थितस्य सूत्रस्य कार्यं न केवलं समासविषये अपि तु सर्वस्मिन् पदविधिविषये प्रयुक्तं भवति। अर्थात् एकत्र स्थित्वा सर्वं पदविषयकविधिं प्रज्ज्वलयति दीपवत् -

**दीपो यथा प्रभाद्वारा सर्वगेह-प्रकाशक:।**
**परिभाषा तथा बुद्ध्या सर्वशास्त्रोपकारिका।।**[१०]

कार्यस्य भेदवशात् सूत्रप्रकृते: अपि भेद: दृश्यते, अत: आचार्ययो: सिद्धान्तानां मध्ये विरोध: नास्ति।

आचार्य-पद्मनाभदत्तेन प्रदत्तानि समासविषयकाधिकारसूत्राणि दृष्ट्वा एतद् ज्ञायते यत्, आचार्य-पद्मनाभदत्तेन सप्तविधा: समासा: स्वीकृता:। यथा –




**नियमवहिर्भूतसमास: –**

समर्थानां पदानां प्रकृति: कथं भविष्यति इत्यत्र कथ्यते 'सुप् सुपा' (सु.४।३।२) इति सूत्रेण। सूत्रान्तर्गतस्य 'सुपा' इति तृतीयान्तपदस्य यत: परवर्तिसूत्रेषु अनुवृत्ति: विधीयते तत: सूत्रमिदम् अधिकारसूत्रम् इति। पुन: सुबन्तेन पदेन सह सुबन्तस्य पदस्य समासविधानार्थम् एतद् विधिसूत्रम् इत्यपि उच्यते – 'इत्यधिकृतं वेदितव्यम्,विधिश्चायम्।'[११]। अपि तु येषां समासानां किमपि लक्षणं नास्ति अर्थात् केनापि समाससूत्रेण समासपदस्य सिद्धि: न जायते तेषां शिष्टप्रयुक्तानां समासपदानां समासत्वमनेन सूत्रेण साधनीयम् इति आचार्येण उक्तम्। अत: वक्तुं शक्यते, नियमात् वहिर्भूतसमासानां संज्ञाविधायकं सूत्रम् इदम्। *महाभाष्येऽपि* 'सह सुपा' इति केवलसमास: तथा विधायकसंज्ञासूत्रम् च इति उल्लिखितम्।

**अव्ययीभावसमास: –**

अत:परम् 'अव्ययीभाव:'(सु.४।३।३) इति अधिकारसूत्रेण अव्ययीभावसमासस्य आलोचनाराभ्यते। अत्र 'अव्ययं सप्तम्यनुक्रम-समीप ...' (सु. ४।३।५) इति सूत्रेण पञ्चदशार्थे सुबन्तेन पदेन सह अव्ययपदं समस्यते। अस्मिन् सूत्रे पाणिनीय-सूत्रोक्तं 'व्यृद्ध्यर्थ:' इति विषयं पृथग्रूपेण न गृहीत्वा अभाव इत्यस्मिन् अन्तर्भावितम्। अत्र अभावस्य अर्थाभाव-व्यृद्धी इति अर्थद्वयं गृहीतम् 'अभाव: सम्बन्धिभेदादनेकविध: ...'[१२]। द्वितीयत:, सप्तविभक्तीनां मध्ये केवलं सप्तम्यन्त-द्योतकाव्ययपदेन सह अयं समास: इष्यते

इति विषयः सुस्पष्टेन उक्तः। तृतीयतः, पारमार्थिकसम्पद् पार्थिव-धनसम्पद् इति च विषयद्वयं सूत्रोक्तेन सम्पद् इति पदेन बोध्यम्। यथा- सब्रह्म इति पारमार्थिकार्थे अव्ययीभावसमासः। ब्रह्मज्ञानमेव अत्र सम्पद्। ब्रह्मज्ञानस्य उदयो भवति इत्यर्थः। समृद्धिः मद्राणां, सुमद्रम् इति धनसम्पदर्थे अव्ययीभावसमासः। किन्तु पाणिनीय-साम्प्रदायिकैः सम्पद् (समृद्धिः) इति पदं केवलं धनसम्पदर्थे गृहीतम्। कतिपयानि नूतनोदाहरणानि दृश्यते, सादृश्यार्थे यथा - सदृशः किख्याः सकिखि, एवं सलक्षि स्त्री, सवीणं ध्वनति ; शब्दप्रकाशनार्थे उत्पाणिनि; असम्प्रत्यर्थे अतितैसृकम् इति। एवं बहूनि नूतनोदाहरणानि प्राप्यन्ते। अवशिष्टानां सूत्राणां कार्यं पाणिनीय-सूत्राणां सदृशमेव, भिन्नता केवलं दृश्यते तु उपस्थापने। कतिपयानि सूत्राणि एकाधिकानां पाणिनीय-सूत्राणां समन्वयेन रचितम्। यथा- 'अनुद्वैर्घ्य-सापीप्ययोः' (सु.४.३.१२), 'संख्या वंश्य-नदीभिः' (सु.४.३.१५)। कतिपये सूत्रे तु समार्थकशब्दस्य प्रयोगः दृश्यते, यथा- 'यथा न तुल्ये' (सु.४.३.५), 'यावदियत्तायाम् (सु. ४.३.६)। पाणिनीय-सूत्र-निष्पन्नानि कानिचित् पदानि तिष्ठद्ग्वादि-गणान्तर्गतं कृत्वा निपातनेन साधितानि आचार्य-पद्मनाभदत्तेन।

**तत्पुरुषसमासः –**

अतःपरं तत्पुरुषसमासः। आचार्यस्य मतेन, तत्पुरुष इति अन्वर्थसंज्ञा 'स एव पुरुषस्तत्पुरुष इति'[१३]। पुरुषः इति विशेष्यपदम्, पुनः तत्पुरुषसमासे प्रायशः विशेष्यपदस्य प्राधान्यं दृश्यते। तेन तत्पुरुषः अन्वर्थसंज्ञा आचार्येण कथिता इति अनुमीयते। आचार्य-पद्मनाभदत्तम् अनुसृत्य तत्पुरुषसमासस्य विभागाः यथा –




अल्पाक्षरं सूत्रम् इति लक्षणे उक्तेऽपि अस्य *सुपद्म-व्याकरणस्य* बहुस्थले वाक्यद्वयविशिष्टं सूत्रं दृश्यते। यथा- 'पूर्वापरावरोत्तरमेकदेशिना षष्ठ्यन्तेन। अर्द्धं नपुंसकम्।' (सु. ४.३.१९)। इति। अवयव-षष्ठी-विषयके अस्मिन् सूत्रे पूर्वादि-शब्दानां षष्ठ्यन्तावयविवाचिना पदेन सह समासो विधीयते। तथा नपुंसकवाचकम् अर्द्धम् इति पदं षष्ठ्यन्तेन पदेन सह समस्यते। कतिपयेषु स्थलेषु पाणिनीय-सूत्राणां वार्त्तिककारेण प्रदत्तैः वार्त्तिकैः सह मेलबन्धनम् अपि दृश्यते अत्र। यथा दृश्यते - द्वितीय-तत्पुरुष-विधायके 'द्वितीया श्रितातीत-पतित-गतात्यस्त-प्राप्ताऽऽपन्नारुढ-गमादैः'(सु. ४।३।२३) इति सूत्रे। तृतीया-तत्पुरुषविधायकं 'तृतीया तत्कृतगुणवचन ...'(सु.४.३.२३) इति सूत्रस्थस्य 'तत्कृत' इति पदस्य ग्रहणसार्थकताविषये आचार्येण प्रदत्ते उदाहरणे अभिनवत्वं दृश्यते। यथा- घृतेन पाटवम्। अत्र तृतीयान्तपदे गुणवाचकपदे च सन्निधाने स्थितेऽपि समासो न भवति। यतः घृतभक्षणेन पटुत्वं न जायते, घृतभक्षणस्य परिणामोऽयं गुणः - 'यत्तु घृतेन पाटवं घृतभक्षणपरिणामविशेषगुणवचनं न पुनर्घृतभक्षणमात्रादेव पाटवमुत्पद्यते'[१४] इति। प्रकृतिवाचिना सुबन्तेन सह, अर्थशब्देन सह एवं वलि-हितादिभिः पदैः सह चतुर्थ्यन्तपदस्य चतुर्थी-तत्पुरुषसमासः विधीयते 'चतुर्थी प्रकृत्यर्थ-वलि-हित-सुख-रक्षित-देयैः' (सु. ४।३।३०) इति सूत्रेण। उदाहरणं यथा- देवदेयम् पुष्पम्, वरप्रदेया कन्या इति।

'पञ्चमी भयादैः'(सु. ४.३.३१) इति सूत्रेण न केवलं भयवाचकैः सह पञ्चम्यन्तस्य समासो विधीयते अपि तु भयादिः इति रूपेण आकृतिगणं स्वीकृत्य भयवाचकैः भिन्नैः कतिपयैः अन्यैः शब्दैः सह पञ्चम्यन्तपदस्य समासः साधयति। यथा - राजभयम्, श्वभीतिः, सितेतरः, ग्रामनिर्गतः, अधर्मजुगुप्सुश्च इति। अल्पार्थे बोध्ये अपेतादिभिः सह पञ्चम्यन्तस्य समासो जायते। किन्तु अनल्पार्थे न स्यात्। एतद्विषये उदाहरणं दीयते मञ्चपतितः इति। अत्र मञ्चात् पतितस्य जनस्य अदूरत्वात् समासः, न तु प्रासादात् पतितः इत्यत्र समासो न जायते दूरत्वात्, 'मञ्चपतित इति अत्रादूरत्वादत्वं, प्रासादादिति दूरत्वादनल्पतेति'[१५]। किन्तु पाणिनीय-व्याख्यातृभिः दूर-अदूरात् भिन्नम् अन्यार्थे सूत्रे **अल्पशः** इति पदम् गृहीतम्। **अल्पशः** इति पदेन समासस्य अल्पविषयता इष्यते। यत्र अपेतादिभिः सह पञ्चम्यन्तस्य पदस्य समासो न दृश्यते तानि सर्वाणि **अल्पशः** इति पदेन सिद्धानि। काशिकाकारेणोक्तम् - 'अल्पा पञ्चमी समस्यते , न सर्वा'[१६]। अन्योदाहरणानि यथा - रोगमुक्तः, रणापत्रस्तः इति। षष्ठी-समासविषये स्वल्पं सूत्रं दीयते आचार्येण। तेषां मध्ये 'न *निर्धार्य्य*-पूरण-गुण-सुहितार्थाव्यय-लादेशैः'(सु.४.३.३५) इति षष्ठीसमास-निषेधसूत्रम् अत्र आलोच्यते। अस्मिन् सूत्रे निर्धारणेन सह तथा पूरणादिभिः सह षष्ठ्यन्तस्य पदस्य समासो निषिद्ध्यते। लादेशैः इत्यनेन लकारादेशप्राप्तानि शतृ-शानच्-प्रत्ययान्तानि पदानि ग्रहणीयानि। कारकशेष-विवक्षा-प्राप्तस्य षष्ठ्यन्तस्य पदस्य सुबन्तेन पदेन सह समासो निषिध्यते 'कारकषष्ठी च न समस्यते' इति वार्तिकेन। आचार्य-पाणिनिना 'क्तेन च पूजायाम् (पा.२।२।१२), 'तृजकाभ्यां कर्तरि' (पा.२।२।१५), 'कर्मणि च' (पा.२।२।१४) इत्यादिभिः सूत्रैः कृत्-प्रत्ययान्तस्य पदस्य कर्तृ-कर्मकारकादिस्थाने प्राप्तेन षष्ठ्यन्तेन पदेन सह कृत्प्रत्ययान्तस्य पदस्य समासो निषिद्धः। अतः दृश्यते पद्मनाभाचार्येण एकेन वार्त्तिकेनैव विषयोऽयं साधितः। किन्तु याजकादि-गणपठितैः पदैः सह षष्ठ्यन्तस्य समासो न निषिद्धः ''याजकादिभिः सह कारकषष्ठी च समस्यते'' इति। किन्तु सूत्रस्य वृत्तौ समानाधिकरणेन सह भिन्नस्य पदस्य समासो निषिध्यते सम्बन्धाभावात्। यथा 'राज्ञः श्रौघ्नस्य धनम्। समानाधिकरणेन सम्बन्धाभावात्'[१७] इति।

सप्तमी-तत्पुरुषसमासस्य 'सप्तमी शौण्डादिभिः' (सु.४।३।३६) इति प्रधानसूत्रम्। अत्र सूत्रोक्ते शौण्डादिगणे सिद्धः शुष्कः चेत्यादीनि पदानि गृहीतानि आचार्य-पद्मनाभदत्तेन। उदाहरणानि यथा - काम्पिल्यसिद्धः कुम्भीपक्वः चेति पदानि साधितानि अनेन सूत्रेण। किन्तु पाणिनीय-व्याकरणे एतैः पदैः सह सप्तम्यन्तस्य समासो वार्त्तिकेनोक्तः। 'कृत्ययता नियमे'(सु. ४.३.३६) इति सूत्रे पदग्रहणविषये अभिनवत्वं दृश्यते। 'कृत्यैर्ऋणे'(पा.२।१।४३) इति समगोत्रीये अस्मिन् पाणिनीय-सूत्रे आचार्येण सर्वैः कृत्यप्रत्ययान्तैः पदैः सह समासो विधीयते। किन्तु पाणिनि-व्याख्यातृभिः केवलं कृत्यसंज्ञके यत्-प्रत्ययविषये एवं व्यवस्था क्रियते। काशिकाकारेणोक्तम् - 'यत्-प्रत्ययेन एव इष्यते'[१८] इति। अपरपक्षे आचार्य-पद्मनाभेन स्पष्टेन उक्तम्, कृत्यसंज्ञकेन यत्-प्रत्ययेन सहैव समासः कर्तव्यः, तद्धित-प्रत्ययो यत्-प्रत्ययः इति नात्र ग्रहणीयः। ग्रन्थकारस्य भाषया - 'कृत्यसंज्ञोऽयं यत् कृत्ययदिति शाकपार्थिवादिः। कृत्यग्रहणं तद्धितयन्निरसार्थम्।'[१९] इति। तीर्थध्वाङ्‌ः तीर्थवायसः चेत्यादीनि पदानि पात्रेसमितादिगणे अन्तर्भुक्तं कृत्वा निपातनेन साधितवान् 'पात्रेसमितादयः क्षेत्रे' (सु.४.३.३९) इति सूत्रेण।

कु-तत्पुरुषश्च प्रादितत्पुरुषश्च इति संज्ञा दृश्यते। परन्तु गति-तत्पुरुष इति संज्ञा अत्र परिवर्जिता। वैदिक-स्वरेण सह गतेः सम्बन्धत्वात्, किन्तु समासो न परिहृतः। उर्यादीनि इति च्वि-डाच्-प्रत्ययान्तस्य

अव्ययपदस्य, सर्वनामपदस्य च कृदन्तेन सह समासः अत्र दृश्यते। कु-प्रादि-तत्पुरुष इति संज्ञाद्वयम् आचार्येण अत्र अव्ययपूर्व-तत्पुरुष इति नाम्ना गृहीतम् 'अयं चाव्ययपूर्वस्तत्पुरुषः'[२०]। उपपद-तत्पुरुष-समासविषये आचार्यस्य स्वतन्त्रता दृश्यते। पाणिनीय-व्याकरणे **उपपदम्** इति पदस्य द्विविधौ अर्थौ प्राप्येते। यथा, पदस्य समीपम् इति **उपपदम्**। पुनः धात्वधिकारस्थे सूत्रे विद्यमानेन सप्तम्यन्तपदेन उदाहरणवाक्ये यत पदं बोध्यं तत् पदम् **उपपदम्** इति ज्ञायते। किन्तु पद्मनाभाचार्येण केवलं समीपे उच्चारितपदम् **उपपदम्** इत्यर्थं गृहीत्वा कार्याणि साधितानि। किमपि विभक्त्यन्तं पदं न गृहीतम् **उपपदम्** इत्यस्य बोधार्थम्। 'कृता तदर्थोपपदम् (सु.४.३.४१) इति उपपद-तत्पुरुष-विधायकसूत्रे कृत्-प्रत्ययस्य निमित्तं यत् पदम्, तेन उच्चारितपदेन सह कृदन्त-प्रातिपदिकस्य समासः विधीयते। यथा- कुम्भं करोतीति विग्रहे कृ-धातोः विहितस्य अण्-प्रत्ययस्य निमित्तं कुम्भ इति पदम् **उपपदमेव**। तेन सह कार इति कृदन्तस्य पदस्य समासे सति कुम्भकारः इति पदं जायते। एतद्विषये अपरद्वयं सूत्रम् यथा – १) अमैवाव्ययेन (सु.४.३.४२) २) तृतीयादीनि वा क्त्वा च (सु. ४.३.४३)।

**कर्मधारयसमासः –**

कर्मधारय-समासविषये आचार्येण उक्तम् *पञ्जिकायाम्* - 'द्विगुपर्यन्तं कर्मधारयाधिकारः'[२१] इति। तत्पुरुषसमासात् कर्मधारयसमासस्य भिन्नताविषये विष्णुमिश्राचार्येण उक्तम् – 'असमानविभक्तिमत्प्रतिपदप्रकृतिकत्वे सत्यभेदबोधकत्वं तत्पुरुषत्वम्। समानविभक्तिमत्पदप्रकृतिकत्वे सत्यभेदबोधकत्वम् (कर्मधारयत्वम्)'[२२] इति। अथ वक्तुं शक्यते, समस्यमान-पदानां भिन्न-विभक्तिमाश्रित्य आचार्येण समासविषयेऽपि भिन्नता स्वीकृता। 'विशेषणमेकार्थेन कर्मधारयो बहुलम् (सु.४.३.५८) इति सूत्रेण एकार्थे विशेषणस्य विशेष्येण सह कर्मधारयसमासो विहितः। किन्तु क्वचित् तु अन्यार्थेऽपि कर्मधारयः दृश्यते यथा संज्ञाबोधनार्थम्। तेन मकरन्दकारेण उक्तम् – 'यद्वा क्रमिकं यन्नामयुगमेकार्थेऽन्यार्थे बोधकम्। तादात्म्येन भवेदेषः समासः कर्मधारयः।'[२३] इति।

कर्मधारयसमासविषये आचार्येण अनेकानि सूत्राणि प्रदीयन्ते। यथा - 'पूर्वकालवृत्तयः', 'श्रेण्यादयः कृताद्यैश्च्व्यर्थे', 'कतर-कतमौ जातिपरिप्रश्ने', 'वर्णो वर्णेन', 'जातिः प्रशंसावचनाद्यैः' इत्यादीनि सूत्राणि। उपमान-कर्मधारय-समासविषये आचार्यः पुनरभिनवत्वं दर्शितवान् 'उपमानावधारणे' (सु.४.३.५९) इति सूत्रेण। उपमानावधारणे इति प्रथमायाः द्विवचनान्तं पदम्। उपमानम् इति पदम् आरोपणविषयवाचकं सुबन्तं पदम् अर्थात् विशेषण-वाचकपदम्। अवधारणम् इति पदेन उपमेयोपमानयोः साधारणधर्मवाचिकम् ओपमेयम् अर्थात् साधारणधर्मवाचकं पदम् इति बोध्यम्। उदाहरणेन स्पष्टीक्रियते – शङ्ख इव पाण्डरः इत्यत्र शङ्ख इति उपमानम्। पाण्डरः इति साधारणधर्मः। अयं धर्मः उपमानोपमेययोः साधारणधर्मं प्रकाश्य साधारणधर्मविशिष्टे पदार्थद्वये अर्थात् शङ्खे इति उपमाने तथा दन्तादिरूपे उपमेये अवतिष्ठते। अतः अत्र समासे सति शङ्खपाण्डरः इति उपमान-कर्मधारय-समासो भवति। अस्मिन् विषये आचार्यस्य सूत्रमिदं काठिन्यविशिष्टम्। 'उपमेयं व्याघ्रादिभिः श्रेष्ठार्थे' (सु.४.३.६६) इति सूत्रेण आचार्येण श्रेष्ठार्थे व्याघ्रादिभिः सह उपमेयवाचकस्य सुबन्तपदस्य समासो विधीयते। श्रेष्ठार्थः इति पदेन विशेषधर्मः एव बोध्यः। अतः अनेन सूत्रेण विधिमुखेन समासविषये विधानं दीयते। वृन्दारकः कुञ्जरः इत्यादयः पदानि अपि आचार्येण व्याघ्रादिगणान्तर्गतानि कृतानि। व्याघ्रादिगणः आकृतिगणरूपेण गृहीतः आचार्येण -

'आकृतिगणत्वात् पद्मं कमलं किसलयं चन्द्रः इत्यादयः ...'[२४]। 'क्तेन नञ्विशिष्टेनानञ् (पा. २.१.६०) इति पाणिनीय-सूत्रं भिन्नरूपेणोपस्थापितम् अत्र। यथा - 'कृतादीन्यकृतादिभिः'(सु. ४.३.६०)। अत्र आचार्यः क्त-प्रत्ययान्तशब्दान् कृतादिगणरूपेण तथा नञ्विशिष्ट-क्त-प्रत्ययान्तशब्दान् अकृतादिगणरूपेण उल्लिखितवान्। एवं भवितुं शक्यते, पाणिनि-परवर्ति-समये वैयाकरणैः ययोः पदयोः मध्ये अयं समासः दृश्यते तेषां विषये गणद्वयं कृतम्।

न केवलं क्षेपार्थे **किम्** इति सर्वनाम्ना सह समासः दृश्यतेऽत्र, संज्ञार्थेऽपि समासः विधीयते 'किं संज्ञाक्षेपयोः' (सु. ४.३.६४) इति सूत्रेण। संज्ञार्थे यथा – किम्पुरुषः किन्नरः इति। आक्षेपार्थे किंराजा किंपुत्रः इति। निन्दनीयार्थे कितवादि-शब्दैः सह निन्दनीय-सुबन्तस्य पदस्य समासः विधीयते 'निन्द्यं कितवादिभिः' (सु. ४.३.६८) इति सूत्रेण। अस्य सूत्रस्य याज्ञिककितवः, छात्रदर्दुरूढः, कम्बोजमुण्डः इत्यादिभिः उदाहरणैः चतुर्दश-शतकस्य सामाजिक-व्यवस्थाविषयम् अपि ज्ञातुं शक्यते। किन्तु आचार्य-पद्मनाभदत्तेन पाणिनीय-व्याकरणे उक्तानि 'मयूरव्यंसकादयश्च' (पा. २।१।७२) इति सूत्रे अन्तर्गतानि कतिपयानि निपातनसिद्धपदानि अस्य सूत्रस्य उदाहरणरूपेण उपस्थाप्यन्ते। निपातनेन सिद्धपदानां विषये एवं व्यवस्था दृश्यते *सुपद्मव्याकरणस्य* 'यदृच्छादयश्च'(सु.४.३.७३) इति सूत्रे। कर्मधारयसमासस्य नियमवहिर्भूतानि पदानि यदृच्छादिगणे पठित्वा साधितानि 'यदृच्छादयश्च'(सु.४.३.७३) इति सूत्रेण। अत्र पदचयनविषये आचार्य-पद्मनाभस्य स्वतन्त्रता दृश्यते।

**द्विगुसमासः –**

द्विगु-समासविधायकेन 'द्विगुः संख्या तद्धितार्थसमाहारयोः' (सु.४.३.७४) इति सूत्रेण आचार्येण पद्मनाभदत्तेन समाहारार्थे तद्धितार्थे च द्विगुसमासः विधीयते। उत्तरपदद्विगुविषये आचार्येण किमपि न उक्तम्। किन्तु *सुपद्मव्याकरणस्य* टीकाकारेण विष्णु-मिश्राचार्येण स्वीकृतः द्विगुसमासस्य अयं विभागः। *मकरन्दे* दृश्यते – 'स्वान्तर्निविष्टशब्दाभ्यां शब्दान्तरसमासगः। यो द्विगुः शाब्दिकैरुक्तः स उत्तरपदद्विगुः'[२५] इति। पदाभ्यां सह विग्रहवाक्यस्थस्य पदान्तरस्य द्विगुः उत्तरपदद्विगुरेव उच्यते। तथा वैयाकरणैः वाक्यालापे अयं समासः व्यवह्रियते। एतत् लक्षणीयं यत्, द्विगुसमास एव कर्मधारयात् भिन्नसमासः। अस्य समासस्य भिन्नताविषये मकरन्दकारेणोक्तम्- 'समानविभक्तिमत्पदप्रकृतिकत्वे सत्यभेदबोधकसंख्यापूववपदत्वं द्विगुत्वम्।'[२६] इति।

**बहुव्रीहिसमासः –**

अतःपरं *सुपद्मव्याकरणे* पञ्चविधसूत्रेण आचार्येण बहुव्रीहि-समासः विधीयते। 'अनेकमन्यपदार्थे बहुव्रीहिः'(सु.४.३.७५) इति सूत्रेण आचार्येण न केवलं अन्यपदस्यार्थे पदानां बहुव्रीहि-समासः विधीयतेऽपि तु क्रियाप्रतिरूपकाभ्याम् अस्ति-नास्ती इति अव्ययाभ्यां सह समासः विधीयते। विकल्पेन मध्यपदलोपविषयक-बहुव्रीहि-समासः च वार्त्तिकसूत्ररूपेण अस्य सूत्रस्य वृत्तौ दृश्यते। व्यतिहार-बहुव्रीहि-विषयके 'तेषु तैश्च युद्धमिति सरूपे'(सु.४.३.७८) इति सूत्रेण पुनः स्पष्टार्थः दृश्यते 'युद्धमिति' पदेन। अर्थात् सप्तम्यन्त-पदानां तृतीयान्तपदानां वा युद्धार्थाभिहिते समासो भवति इति स्पष्टम् उक्तम्। किन्तु पाणिनीय-व्याकरणोक्ते 'तत्र तेनेदमिति सरूपे'(पा.२.१.५६) इति सूत्रेण न केवलं युद्धार्थः प्राप्यते पाणिनीय-साम्प्रदायिकव्याख्यातः, 'युद्धं च समासार्थः इति सर्वम् इति-करणाल्लभ्यते।'[२७] इति।

तुल्ययोग-बहुव्रीहि-विषये आचार्य-पद्मनाभेन प्रदत्तं सूत्रं यथा - 'सह तेन वर्तने' (सु. ४।३।७९) इति। सूत्रोक्तं **वर्तनम्** इति पदं विद्यमानार्थे गृहीतम्। विद्यमानार्थे तृतीयान्तपदस्य सह इति पदेन समं समासो विधीयते। यथा – विद्यया सह वर्तते इति सविद्यः, दर्पेण सह वर्तते इति सदर्पः। अपरपक्षे, आचार्य-पाणिनिना तु यया कयाचित् क्रियया सह अयं समासः विधीयते। अतः वक्तुं शक्यते, कालक्रमेण अस्य समासस्य प्रयोगः संकीर्णजातः।

**द्वन्द्वसमासः –**

द्वन्द्व-समास-विधायकस्य 'चार्थे द्वन्द्वः' (सु.४.३.८०) इति सूत्रस्य 'च' इति पदस्य चतुर्णाम् अर्थानां मध्ये समाहारेतरेतरयोगौ इत्यर्थे समासो भवति। द्वन्द्वसमासविषये आचार्य-विष्णुमिश्रस्य व्याख्यायाम् अभिनवत्वं दृश्यते 'पदजन्यप्रतिपत्ति विषयभेदबोधकत्वे सति समानविभक्तिकपदत्वं द्वन्द्वत्वम्'[२८]। विषयभेद इत्यनेन समाहार-इतरेतरयोग इति विषयद्वयं बोधनीयम्। *सुपद्मवृत्तौ* एतद्द्वयस्य संज्ञायामाह संहतिप्राधान्ये अर्थात् समुदायस्य प्राधान्ये सति हि समाहारः, यथा - वाक् च त्वक् च वाक्त्वचम् इति। संहन्यमान-प्राधान्ये अर्थात् पृथक्-पृथग्-अवयवस्य प्राधान्ये सति इतरेतरयोगः, कृष्णश्च अर्जुनश्च कृष्णार्जुनौ इति। द्वन्द्वसमासविषये *सुपद्मव्याकरणे* इदं सूत्रं केवलं प्राप्यते। उदाहरणानि पाणिनीय-व्याख्यातृभिः प्रदत्तानि उदाहरणानि इव।

समासविषये आलोचनादनन्तरं समस्यमान-पदानां पूर्वनिपातविषये आलोच्यते परवर्तिभिः सप्तविधसूत्रैः। अत्र **उपसर्जनम्** इति पारिभाषिकशब्दः वर्जितः। स्पष्टतया उक्तम् - 'प्रथमा पूर्व समासे' (सु,४.३.८३)। अर्थात् समाससूत्रे प्रथमाविभक्तियुक्तपदस्य पूर्वनिपातः भवति। द्वन्द्व-बहुव्रीहि-समासानां पूर्व-पर-निपातविधायकानां सूत्राणां वक्तव्यम् आचार्य-पाणिनिना प्रदत्त-सूत्राणां तथा कात्यायनादेः वार्त्तिकानाम् इव, भिन्नता दृश्यते केवलम् उपस्थापने। यथा – द्वन्द्वे घ्यन्तमजाद्यदन्तमल्पाच्लघ्वक्षरमभ्यर्हितं यथोत्तरम् (सु.४.३.८३), ऋतु-नक्षत्र-वर्ण-संख्याः क्रमेण (सु.४.३.८४), बहुव्रीहौ सप्तमी-निष्ठा-विशेषणान्यदण्डहस्तादिषु (सु.४.३.८५), वाऽऽहिताग्न्यादिषु (सु.४.३.८६) इति।

अतःपरम् एकशेष-विषये सूत्राणि प्रदीयन्ते। एकशेष इति संज्ञा आचार्येण परित्यक्ता। *सुपद्मव्याकरणानुसारेण* सरूपविशिष्टानां समस्यमानानाम् एकाधिकपदानां द्वन्द्वसमासे क्वचित् क्वचित् एकपदमपि अवशिष्यते। आचार्य-पाणिनिना एकशेषः समासरूपेण न स्वीकृतः। तर्हि पाणिनीय-व्याकरणस्य समासाधिकारे एकशेषविषयकसूत्राणि न दृश्यन्ते। किन्तु परवर्तिकाले पाणिनीय-व्याख्यातृभिः एतद्विषयः आलोचितः। किन्तु आचार्य-पद्मनाभः एकशेषविषयकसूत्रं समासप्रकरणे उपस्थापितवान्। अतः वक्तुं शक्यते, एकपदस्य अवशेषणं द्वन्द्व-समासस्य अपरं भागरूपेण आचार्येण स्वीकृतम्। द्वन्द्वसमासभिन्ने अन्यसमासे तु एकशेषो न सम्भवः, एतद्विषये उभयाचार्यस्य सहमतं दृश्यते। पाणिनीय-व्याकरणे विषयेऽस्मिन् स्पष्टोक्तिः नास्ति किन्तु बालमनोरमाकारेण स्पष्टीक्रियते - अत्र 'तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे - 'इति पूर्वसूत्राद् द्वन्द्व इत्यनुवृत्त्य द्वन्द्वे प्रसक्त इति व्याख्येयम्।'[२९] इति।

एतदनन्तरं समासबद्धपदानां लिङ्गनिर्धारणविषये सूत्राणि दृश्यन्ते। एतद्विषयक-सूत्राणां वक्तव्यं पाणिनीय-सूत्राणामिव किन्तु उपस्थापनविषये तथा पदचयनविषये स्वतन्त्रता लक्षणीया। यथा – 'अन्यवत् प्राप्तापन्नालम्प्रादिपूर्वे तत्पुरुषे' (सु.४.३.९८)। अस्मिन् सूत्रे गृहीतस्य 'अन्यवत् इति पदस्य विषये

वङ्गानुवादांशे आचार्य-त्रैलोक्यनाथाचार्येणोक्तम् – वाच्यवत् अर्थात् समासेन यदभिधेयो भवति तदनुसारेण समासबद्धपदस्य लिङ्गं प्राप्यते। यथा – प्राप्तजीविका,आपन्नसुख:। प्रथमप्रकाश इत्यर्थे षष्ठी-तत्पुरुषसमासे अन्तस्थितम् उपज्ञा उपक्रम: इति च पदद्वयं क्लीवलिङ्गं भवति। अस्य सूत्रस्य उदाहरणरूपेण आचार्येण प्रदत्तेन 'चन्द्रोपज्ञम् असंज्ञम् इति वाक्येन ज्ञातुं शक्यते, संज्ञाहीन-व्याकरणस्य रचनाविषये चन्द्राचार्य: प्रथम: आसीत्। समाहारार्थे द्वन्द्वसमासविषया: सूत्राणि पाणिनीय-सूत्रेभ्य: स्पष्टतराणि। यथा –

| | |
|---|---|
| १. अनुवादे चरणानाम् (पा.२.४.३) स्थेणोरलुङीति वक्तव्य:(वा.) | द्वन्द्वोऽनुवादे चरणानां स्थेणोर्लुङि (सु.४.३.१११) |
| २. अध्ययनतोऽविप्रकृष्टाख्यानाम् (पा.२.४.५) | समीपाध्ययनानाम् (सु.४.३.११३) |
| ३. जातिरप्राणिनाम् (पा.२.४.६) | अप्राणिद्रव्यजातीनाम् (सु.४.३.११४) |
| ४. विशिष्टलिङ्गो नदीदेशोऽग्रामा: (पा.२.४.७) | नदीदेशनगराणां भिन्नलिङ्गानाम् (सु.४.३.११५) |

मृग इति शब्द: यथा मृगवाचक: तथा पशुवाचकोऽपि भवति। आचार्य- पाणिनिना 'विभाषा वृक्ष-मृग-तृण...' (पा. २.४.१२) इति सूत्रे मृग-पशु-पदद्वयं पृथक्-पृथग्-रूपेण गृहीतम्। किन्तु पद्मनाभाचार्येण एकेन पदेन उभयार्थौ ज्ञापितौ 'मृगशब्द: कुरङ्गे पशुमात्र च वर्तते।'[३०] इति। किन्तु पाणिनीय-व्याखातृणां मतानुसारेण विषयेऽस्मिन् तात्पर्यमस्ति। पशु-मृग-शकुनि-शब्दा: मृगवाचका:, यत: 'मृगा: सर्व:' इति अमर:[३१] इति। पृथक् निदेशेन एतद् ज्ञायते, पशुवाचकपदस्य पशुवाचक-पदै: सह शकुनिवाचकपदानां शकुनिभि: सह मृगवाचकानां पदानां मृगै: सह समाहार-द्वन्द्व: स्यात्, अन्येन सह केवलम् इतरतरयोग: सभंव: इति 'अत्र पशुग्रहणेनैव सिद्धे मृश्वादि-ग्रहणे सत्यपि अन्तरेणैषां परस्परेण वा द्वन्द्वो मा भूदित्येवमर्थम्'[३२] इति। पाणिनीय-साम्प्रदायिकै: द्विगुसमासस्य लिङ्गनिर्धारणविषये प्रदत्तानि वार्त्तिकानि अत्र आचार्य-पद्मनाभदत्त: एकेन सूत्रेण उपस्थापितवान्। यथा - 'अदन्तो द्विगु: स्त्रीसमाहारेपात्रादिभि:'(सु.४.३.१२७)। 'आबन्नन्त: क्लीवञ्च नश्च लुक्' इति वार्त्तिकोऽपि तत्र दृश्यते।

दीर्घस्वरान्तानां समासबद्धपदानां ह्रस्वत्वविषये उपस्थापिते 'गोस्त्रियोरन्यार्थेऽत्र्यादीयस:' (सु.४.३.१२९) इति सूत्रे भिन्नता दृश्यते। अन्यार्थाभिहिते सति गो-पदान्तस्य, स्त्री-प्रत्ययान्तस्य दीर्घस्वरान्तस्य च ह्रस्वत्वं प्राप्यते। 'अत्र्यादीयस:' इति निषेधांशेन ईयस्-प्रत्ययान्त-पदोत्तरं विहितस्य स्त्री-प्रत्ययस्य ह्रस्वत्वं निषिध्यते। पाणिनीय-व्याकरणे अप्राप्तोऽयं विषय: वार्त्तिकेनैव साधित:।

अत: *सुपद्म-व्याकरणे* उपस्थापितेनानेन समासप्रकरणेन समासविषये सारल्येन ज्ञातुं शक्यते। सूत्रसंख्या-संक्षेपणाय आचार्य: एकाधिकानां पाणिनीय-सूत्राणां विषयान् स्वल्पसूत्रेण उपस्थापितवान्, तर्हि कतिपयस्य सूत्रस्य आकारो दीर्घो भवति। अत: अल्पाक्षरं सूत्रम् इति नियमविषये व्यभिचार: दृश्यते इति कतिपयेषु स्थानेषु। किन्तु एवं न शङ्क्यं, यत: **अल्पाक्षरम्** इति पदेन इष्टार्थप्रकाशनाय सूत्रे व्यवहृतं सर्वेषां मध्ये अल्पतरमक्षरमेव बोध्यम्। इति शम्।

## सन्दर्भसूची

१. मनमोहनघोष: (सम्पादक:), *पाणिनीयशिक्षा,* कलकाता: कलकाता विश्वविद्यालय:, १९३८, पृष्ठा ४३।

२. अयोध्यानाथ-सान्यालः (सम्पादकः), *पातञ्जल-महाभाष्यम्* (प्रथमं द्वितीयं च आह्निकम्), वर्धमानः वर्धमान-विश्वविद्यालयः, २०१४, पृष्ठा २३।

३. विष्णुपद-भट्टाचार्यः (सम्पादकः), *वाक्यपदीयम्* (ब्रह्मकाण्डः), कलकाताः पश्चिमवङ्ग-राज्य-पुस्तक-पर्षद्, २००६, पृष्ठा ३४।

४. त्रैलोक्यनाथ-भट्टाचार्यः (सम्पादकः), *सुपद्मव्याकरणम्*, कलकाता, १३४१ वङ्गाव्दः, पृष्ठा ४२७।

५. जीवनानन्द-विद्यासागर-भट्टाचार्यः (सम्पादकः), *मुग्धबोधव्याकरणम्*, कलकाताः १९०२, पृष्ठा २६३।

६. त्रैलोक्यनाथ-भट्टाचार्यः (सम्पादकः), *पूर्वोक्तम्*, कलकाता, १३४१ वङ्गाव्दः, पृष्ठा १।

७. *तदेव*।

८. शिवदत्त-शर्मा (सम्पादकः), *महाभाष्यम्* (द्वितीय-खण्डम्), दिल्लिः चौखाम्वा संस्कृत प्रतिष्ठान, २०१४ (पुनर्मुद्रणम्), पृष्ठा ३१४।

९. शिवदत्त-शर्मा (सम्पादकः), *पूर्वोक्तम्* (प्रथम-खण्डम्), दिल्लिः चौखाम्वा संस्कृत प्रतिष्ठान, २०१४ (पुनर्मुद्रणम्), पृष्ठा ४१०।

१०. विनोदलाल-सेनः (सम्पादकः), *सिद्धान्त-कौमुदी* (द्वितीयभागः), कलकाताः श्रीबलराम प्रकाशनी, २००५ (द्वितीय-संस्करणम्), पृष्ठा ४ (भूमिकांशे)।

११. त्रैलोक्यनाथ-भट्टाचार्यः (सम्पादकः), *पूर्वोक्तम्*, कलकाता, १३४१ वङ्गाव्दः, पृष्ठा ८७७।

१२. तदेव, पृष्ठा ८७८ ।

१३. त्रैलोक्यनाथ-भट्टाचार्यः (सम्पादकः), *सुपद्म-विवरण-पञ्जिका*, कलकाता, १३१० वङ्गाव्दः, पृष्ठा १९३।

१४. *तदेव*, पृष्ठा १९५।

१५. *तदेव*, पृष्ठा १९६।

१६. जयशङ्करलाल-त्रिपाठी सुधाकर-मालवीयश्च (सम्पादकः), *काशिका* (द्वितीय-खण्डम्), वाराणसीः मतिलाल वाराणसी दास, २०११ (सप्तम-संस्करणम्), पृष्ठा २९१।

१७. त्रैलोक्यनाथ-भट्टाचार्यः (सम्पादकः), *पूर्वोक्तम्*, कलकाता, १३४१ वङ्गाव्दः, पृष्ठा ८९६।

१८. जयशङ्करलाल-त्रिपाठी सुधाकर-मालवीयश्च (सम्पादकः), *पूर्वोक्तम्*, पृष्ठा२९४।

१९. त्रैलोक्यनाथ-भश्ढ्चार्यः (सम्पादकः), *पूर्वोक्तम्*, कलकाता, १३१० वङ्गाव्दः, पृष्ठा १९७।

२०. *तदेव*, पृष्ठा १९८।

२१. *तदेव*, पृष्ठा २००।

२२. त्रैलोक्यनाथ-भट्टाचार्यः (सम्पादकः), *पूर्वोक्तम्*, कलकाता, १३४१ वङ्गाव्दः, पृष्ठा ८८४।

२३. तदेव, पृष्ठा ९०७।

२४. त्रैलोक्यनाथ-भट्टाचार्यः (सम्पादकः), *पूर्वोक्तम्*, कलकाता, १३१० वङ्गाव्दः, पृष्ठा २०२।

२५. त्रैलोक्यनाथ-भट्टाचार्यः (सम्पादकः), *पूर्वोक्तम्*, कलकाता, १३४१ वङ्गाव्दः, पृष्ठा ९१९।

२६. तदेव, पृष्ठा ९१८।

२७. जयशङ्करलाल-त्रिपाठी सुधाकर-मालवीयश्च (सम्पादकः), *पूर्वोक्तम्*, पृष्ठा ३७९।

२८. त्रैलोक्यनाथ-भट्टाचार्यः (सम्पादकः), *पूर्वोक्तम्*, कलकाता, १३४१ वङ्गाव्दः, पृष्ठा ९२३।

२९. गिरिधर-शर्मा परमेश्वरानन्द-शर्मा च (सम्पादकः), *सिद्धान्त-कौमुदी* (प्रथमभागः), वाराणसीः मतिलाल वाराणसी दास, २०१६ (पुनर्मुद्रणम्), पृष्ठा १८५।

३०. त्रैलोक्यनाथ-भट्टाचार्यः (सम्पादकः), *पूर्वोक्तम्*, कलकाता, १३१० वङ्गाव्दः, पृष्ठा १२१।

३१. तदेव, पृष्ठा २१२।

३२. जयशङ्करलाल-त्रिपाठी सुधाकर-मालवीयश्च (सम्पादकः), *पूर्वोक्तम्* (तृतीय-खण्डम्), २०११ (सप्तम-संस्करणम्), पृष्ठा ११३।

**ग्रन्थपञ्जिः**

पतञ्जलिः। *महाभाष्यम्*। सम्पादकः शिवदत्त-शर्मा। कैयटोपाध्यस्य *भाष्यप्रदीप* इति टीकया सह नागेशभट्टस्य *भाष्य-प्रदीपोद्योत* इति टीकया सह। द्वितीयखण्डः तृतीयखण्डश्च। दिल्लीः चौखाम्बा-संस्कृत-प्रतिष्ठानम्, २०१४ (पुनर्मुद्रणम्)।

पद्मनाभदत्तः। *सुपद्मव्याकरणम्*। सम्पादकः अनुवादकश्च त्रैलोक्यनाथ-भट्टाचार्यः। विष्णुमिश्रस्य *मकरन्द* इति टीकया सह। कलकाताः संस्कृत-पुस्तक-भाण्डारः, १३४१ वङ्गाव्दः (चतुर्थ-संस्करणम्)।

-। -। सम्पादकः रञ्जित-सिं-साइनिः। विष्णुमिश्रस्य *मकरन्द* इति टीकया सह। वेनारसः : भारतीय-विद्या-प्रकाशनम्, १९८९।

-। *सुपद्म-विवरण-पञ्जिका*। सम्पादकः त्रैलोक्यनाथ-भट्टाचार्यः। कलकाताः १३१० वङ्गाब्दः।

भट्टाचार्यः, कालिजीवनः। *शब्दशास्त्रेर इतिहास*। कलकाताः रामकृष्ण इनास्टिटिउट अव कालचार, १९९५।

भट्टोजी-दीक्षितः। *सिद्धान्त-कौमुदी*। सम्पा. गिरिधर-शर्मा परमेश्वरानन्द-शर्मा च। *वैयाकरण-सिद्धान्त-कौमुदी*। *बालमनोरमा* इति वासुदेव-दीक्षितस्य टीकया सह तथा ज्ञानेन्द्र-सरस्वत्याः *तत्त्वबोधिनी* इति टीकया सह। प्रथमभागः द्वितीयभागश्च। वाराणसीः मतिलाल-वाराणसी-दासः, २०१६ (पुनर्मुद्रणम्)।

-। -। सम्पादकः अनुवादकश्च विनोदलाल-सेनः। ज्ञानेन्द्र-सरस्वत्याः *तत्त्वबोधिनी* इति टीकया सह। द्वितीयभागः। कलकाताः श्रीबलराम-प्रकाशनी। २००५ (द्वितीय-संस्करणम्)।

वामनः जयादित्यश्च। *काशिका*। सम्पादकः जयशङ्करलाल-त्रिपाठी सुधाकर-मालवीयश्च। वेनारसः : मतिलाल-वाराणसी-दासः, २०११ (सप्तम-संस्करणम्)।

# कृष्णानन्दसरस्वतीप्रणीतस्य अन्तर्व्याकरणनाट्यपरिशिष्टस्य सन्ध्यध्यायानां सामाजिकं श्लेषात्मकं चाध्ययनम्

**कुन्दन-रायः**

**सारसंक्षेपः –**

ऊनविंशशताब्द्यां नवद्वीपधाम्नि बहूनि व्याकरणकाव्यशास्त्राणि विरचितानि। तेषु कृष्णानन्दसरस्वत्या विरचितस्य अन्तर्व्याकरणनाट्यपरिशिष्टम् इति रूपकस्य व्याकरणभावना अभूतपूर्वा। लोकशिक्षा-लोकयात्राप्रकाशनाय अप्ययं व्याख्याकारः सुकौशलयुक्तः। नीतिशिक्षादानाय वाङ्मयशास्त्रे नाट्यव्याकरणमाध्यमेन समतुल्यनाट्यकारः स्वल्प एव अस्ति। व्याकरणगतायाः एतादृश्याः भावनायाः पाठोपस्थापनं साहित्यजगति सुदुर्लभम्। पाणिनीयापाणिनीयोभयविधेषु उत्तरवर्तिकाव्यग्रन्थेष्वपि दुर्लभं नाट्यव्याकरणपुस्तकमिदम्। अस्य काव्यस्य पक्षद्वयं वर्त्तते। व्याकरणत्वं काव्यत्वञ्च एकैकेन श्लोकेन प्रतिभासितम्। ग्रन्थेऽस्मिन् यद्यपि कुत्रचित् व्याकरणस्य आनन्दराहित्यं गोचरीभवति तथापि स्थाने स्थाने काव्यस्य रसमाधुर्य्यमपि अनुभूयते। अव्ययानां प्रपराद्युपसर्गाणां भूर्य्यर्थाः गत्यारम्भ उत्कर्ष इत्यादयः अनेकार्थाः सन्ति। अस्मिन् शोधप्रबन्धे सन्ध्यध्यायानां सामाजिकं श्लेषात्मकं चाध्ययनं अस्ति।

**कुञ्चीशब्दाः –**

सामाजिकः, व्याकरणपक्षः, अन्तर्व्याकरणनाट्यपरिशिष्टम्, नाटकपक्षः, कृष्णानन्दः, सन्धिपादः।

**मूलप्रबन्धः –**

**कविपरिचितिः**

वङ्गदेशे नवद्वीपजनपदान्तर्गते महेशपुरनामके ग्रामे कृष्णानन्दवाचस्पतिनामेति कविरासीत्, तस्य गुरुः प्रसिद्धः वुनोरामनाथमहोदयः, स तु वृद्धावस्थायां गङ्गातीरे स्थातुं नवद्वीपतः पञ्चक्रोशोत्तरे गङ्गाया अनतिदूरे धर्म्मदहनामकग्रामे वासमकरोत्। असौ कदाचित् कृष्णनगरराजधानीमागत्य तत्रत्यराजवंशं नवद्वीपाधिपतिं महाराजं श्रीशचन्द्रं स्वरचितान् कतिपयान् रसभावपूर्णान् पूर्वश्लोकान् श्रावयामास। तत् श्रुत्वा च राजा तस्यालौकिककवित्वशक्तिमसाधारणपाण्डित्यञ्च विविच्य तस्मै सरस्वतीत्युपाधिं प्रदाय राजसभासदमकरोत्। कृष्णानन्देन अपि स्वक्रियमाणपुस्तकं मनसि परिकल्प्य अन्तर्व्याकरणनाट्यपरिशिष्टम् अपुर्वं पुस्तकमिदं प्रणीतम्। अन्तर्व्याकरणनाट्यपरिशिष्टमिति रूपकेऽस्मिन् शोधप्रबन्धे 'नाट्यपरिशिष्टं' रूपेण अपि व्यवह्रियते। ऊनविंशशताब्द्यां नवद्वीपधाम्नि बहूनि व्याकरणकाव्यशास्त्राणि विरचितानि। तेषु कृष्णानन्दसरस्वत्या विरचितस्य अन्तर्व्याकरणनाट्यपरिशिष्टम् इति रूपकस्य व्याकरणभावना अभूतपूर्वा। नाट्यमाध्यमेन व्याकरणस्य

पाठदानं पण्डितानां समाजे विशेषस्थानं लभ्यते। व्याकरणगताया: एतादृश्या: भावनाया: पाठोपस्थापनं साहित्यजगति सुदुर्लभम्।

**भूमिका**

अश्रुतपूर्वम् ईदृशं नाट्यपरिशिष्टव्याकरणम्। अतएव समीचीनादपि समीचीनतरमेतत् काव्यव्याकरणशास्त्रम्। महामुनिना पाणिनिना महेश्वरप्रसादात् चतुर्दशमाहेश्वरसूत्राणि प्राप्तानि। तदनन्तरं व्याकरणशिक्षायै अष्टाध्यायीनामधेय: व्याकरणग्रन्थ: रचित:। आलोच्यमानेषु भिन्नेषु व्याकरणेषु पाणिनिमुग्धबोधव्याकरणयो: संमिश्रयो: अभूतपूर्वं काव्यव्याकरणात्मकं नाट्यमिदम्।

लौकिकसंस्कृतभाषायां व्युत्पत्तिलाभार्थं बहूनि अपाणिनीयव्याकरणानि संस्कृतभाषया विरचितानि। तेषु भिन्नेषु व्याकरणेषु पाणिनीयापाणिनीयसम्प्रदायेषु त्रयोदशशताब्द्यां बोपदेवप्रणीतं मुग्धबोधव्याकरणं व्याकरणचर्चायां प्रमुखं स्थानं धत्ते। मुख्यतया पाणिने: विधीन् अनुसृत्य अपि अन्येभ्य: व्याकरणग्रन्थेभ्य: मुग्धबोधव्याकरणस्य मौलिकता भिन्ना अस्ति। पाणिनिपरवर्तिन: वैयाकरणा: भाषाशिक्षणार्थं व्याकरणं रचितवन्त:। किन्तु बोपदेवस्य व्याकरणरचनाया उद्देश्यं तावत् पाणिनिसूत्रमनुसृत्य संस्कृतभाषाया: संक्षेपेण शिक्षादानस्योपायस्य निर्धारणम्। अत: प्रयोजनसाधनाय पाणिने: विश्लेषणात्मकविधिं परित्यज्य संश्लेषणात्मकविधि: स्वीकृता बोपदेवेन तदीये मुग्धबोधव्याकरणग्रन्थे। तन्निमित्तं कृष्णानन्दवाचस्पतिना इमं विधिमधिकृत्य संक्षेपेण काव्यव्याकरणात्मकम् अन्तर्व्याकरणनाट्यपरिशिष्टमिति अयं ग्रन्थ: विरचित:। एकदा बङ्गदेशे मुग्धबोधव्याकरणस्य पठनं पाठनञ्च अधिकतया प्रचलितमासीत्। नाटकरूपेण व्याकरणशिक्षणं सरसमपि सञ्जातम्।

संस्कृतवाङ्मये श्रुयते –

''सुबन्धुर्वाणभट्टश्च कविराज इति त्रय:।
वक्रोक्तिमार्गनिपुणाश्चतुर्थो विद्यते न वा।।''

सुबन्धु: (वासवदत्ताग्रन्थस्य प्रणेता, ईशवीयसप्तमशतकात्प्राक्), वाणभट्ट: (कादम्बरीग्रन्थस्य प्रणेता, ईशवीयसप्तमशतकस्य), कविराजश्च (राघवपाण्डवीयग्रन्थस्य प्रणेता, ईशवीयदशमशतकात्प्राक्) इत्येते त्रयो वक्रोक्तिमार्गे सुनिपुणा:, श्लेषाद्युक्तिकुशला:, एते त्रय एव वक्रोक्तिमार्गं जानन्तीत्यर्थ:, अत: चतुर्थो अस्ति न वा इति सन्देह: विद्यते। किन्तु अन्तर्व्याकरणनाट्यपरिशिष्टम् इति ग्रन्थस्य रचनानन्तरं चतुर्थो विद्यते इति वक्तुं शक्यते, 'न वा' इत्यर्थ: इत्यत्र संशय: नास्त्येव। राघवपाण्डवीयग्रन्थ: द्व्यर्थककाव्यरूपेण परिगण्यते, तत्र एक: श्रीरामपक्ष: भिन्न: तु पाण्डवपक्ष:।

पाणिनीयापाणिनीयोभयविधेषु उत्तरवर्तिकाव्यग्रन्थेष्वपि दुर्लभं नाट्यव्याकरणपुस्तकमिदम्। अस्य काव्यस्य पक्षद्वयं वर्न्तते। व्याकरणत्वं काव्यत्वञ्च एकैकेन श्लोकेन प्रतिभासितम्। ग्रन्थेऽस्मिन् यद्यपि कुत्रचित् व्याकरणस्य आनन्दराहित्यं गोचरीभवति तथापि स्थाने स्थाने काव्यस्य रसमाधुर्य्यमपि अनुभूयते। कथञ्चित् श्लिष्टश्लोकेनापि नाट्यशास्त्रस्य महिमा कीर्तित:। तद् यथा कश्चन श्लोक: –

''सन्त्यव्ययानां भूर्य्यर्थास्तेन किन्नो यदस्ति न।
तेषां परार्थपोषाणां स्वार्थस्य प्रतिपादिता।।''[1]

अत्र अव्ययानां कृपणानां भूर्य्यर्थी बहुधनानि सन्ति तेन नोऽस्माकं किं किं फलम्। यस्मात् परधनरक्षकाणां यक्षतुल्यानामिति यावत् अथवा परेषां तस्करादीनाम् अर्थपोषाणां प्रयोजनसाधकानां 'कृपणस्य धनं याति वह्नितस्करपार्थिवैः'[2] इति भावः। कृपणस्य धनं न देवपूजादावुपयुज्यते, न तेन ब्राह्मणाय दीयते, न चात्मने प्रयोजनमस्ति, न बन्धुभ्यः दीयते। केवलं अग्नितस्करनृपैः नाश्यते। काव्यमिदं श्लिष्टम्।

अपरपक्षे अव्ययानां प्रपराद्युपसर्गाणां भूर्य्यर्थाः गत्यारम्भ उत्कर्ष इत्यादयः अनेकार्थाः सन्ति किन्तु परार्थपोषाणां धात्वर्थमात्रद्योतकानां तेषां स्वार्थस्य प्रतिपादकं वाचकत्वं नास्ति। तथा च निपाताश्चादयो ज्ञेया उपसर्गाश्च प्रादयः तद्द्योतकत्वात् क्रियायोगे लोकादवगता इमे इति मुग्धबोधटीकायां दुर्गादासः।

लोकशिक्षा-लोकयात्राप्रकाशनाय अप्ययं व्याख्याकारः सुकौशलयुक्तः। नीतिशिक्षादानाय वाङ्मयशास्त्रे नाट्यव्याकरणमाध्यमेन एतादृक् समतुल्यनाट्यकारः स्वल्प एव अस्ति। यदा कामादिवशात् राजपुत्राः सिंहासनमर्थयन्ते तदा कुमारश्चरमुखात्तत् श्रुत्वा चिन्तयति स्म यौवनानन्तरं राज्यं लब्धमपि मे किं फलं साधयिष्यति! व्ययच्छलेन उक्तमेव भार्य्यैव वृद्धावस्थोढा किं मे फलं साधयित्री इति। परन्तु बलात् पितरं हत्वा सिंहासनं नेष्यामहे।

**अच्सन्धिपादः**

अस्मिन् नाट्यपरिशिष्टग्रन्थे अच्सन्धिपादे नाट्यव्याकरणयोः श्लेषात्मकं विश्लेषणं दर्शितम्। यथा—

''अयवायावये च स्थितयेऽत्राप्यस्ति ते सुखं।
भवन्ति न सखायोऽत्र तपोरायः सुपावनाः।।''[3]

स्थितिनिमित्तं पर्वतायापि गच्छ तत्रापि ते सुखमस्ति। तप एव रा धनं येषां ते तपोधना पवित्रताजनकाः किं सखायो न भवन्ति अपि तु अवश्यमेव भवन्त्येव। व्याकरणपक्षे तु पूर्णतया परिगृह्यते 'अयवायावये च' इति वाक्यांशः। अस्यार्थः एचः स्थाने अय् अव् आय् आव् स्युः अचि परे। तन्निमित्तम् उदाहरणमपि प्रदर्शितम् – स्थितये (स्थिते ए), भवन्ति(भो अन्ति), सखायः(सखै अस्), पावन(पौ अन) इत्यादयः। पाणिनीयप्रदर्शितं सूत्रम् 'एचोऽयवायावः'[4]। मुग्धबोधसूत्रम् – 'यलायवायावोऽचोचः'[5]। इचः स्थाने य् व् ल् अय् अव् आय् आव् एते अचि परे क्रमात स्युः।

''दुर्हृदेजत आप्नोति वृद्धिं विद्यावतां यशः।
सम्पच्चैति च विद्यौजा आत्मैक्यज्ञां भवौषधमिति।।''[6]

अत्रापि दृश्यते विद्यावतां मनुष्याणां शत्रुः कम्पते। यशसः धनस्य च वृद्धिं याति, विद्यैव बलं यस्येति एतादृशजनः आत्मैक्यज्ञानेनैव समाजे महौषधं प्राप्नोति। विद्या एव मनुष्याणां परमैश्वर्यम्। समाजस्य उन्मीलनाय प्रकाशनाय च सम्पदामावश्यकता अपरिहार्या। एतया विद्यया भवनिवृत्तये महौषधभूतवृद्धिं प्राप्नोति। हितोपदेशे मित्रलाभे उच्यते -

''विद्या ददाति विनयं विनयाद्याति पात्रताम्।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम्।''।।[7]

व्याकरणपक्षे तु – विद्यौजा, न आत्मैक्यज्ञा, भवौषधम् – एतानि उदाहरणानि। श्लोकांशे एव लक्ष्यते 'एजते आप्नोति वृद्धिम् अर्थात् आदेचि परे वृद्धिरेकादेशः स्यात्। पाणिनीयसूत्रं 'वृद्धिरेचि'[8] व्याख्यायामजितनाथेन

मुग्धबोधव्याकरणस्य सूत्रमप्युस्थापितम् – 'आदिगेचोर्नुव्री'[9]। तत्र अवर्णात परः एच वृद्धिं प्राप्नोति। अर्थात् अत्र र्ण इत्यस्यार्थः सवर्णम्, व्री इत्यस्यार्थः वृद्धिः गृह्यते। श्लोकांशे उदाहरणत्रयस्य रूपाणि – विद्या ओजः, आत्म ऐक्यः, भव ओषधम्। अतः आदेचि परे प्रयुक्तानां वृद्धीनां (व्री) रूपाणि परिलक्ष्यन्ते।

न केवलं व्याकरणनाट्यानुसारिप्रचलितव्याख्यापद्धतिः स्वीक्रियते, अपि तु श्लेषात्मकशब्दार्थमधिकृत्य विचारः उपलक्षितोऽस्मिन नाट्यपरिशिष्टे। यथा लक्ष्यव्यञ्जकादिरूपेण शब्दार्थप्रयोगः सुलभतया दर्शितः। यथा –

''अलक्षितनिपातेन ओ अन्तकेन कुत्रचित्।
सन्धिः सम्भाव्यते नाहो अतो दुर्गाश्रितो भव।।''[10]

अन्तकेन यमेन सह सन्धिः मित्रश्च न करणीयं तथा न सम्भाव्यते। किमर्थम् एतादृशेन अलक्षितनिपातेन श्येनादेरिव अलक्षितः निपातः सम्पतनं यस्य स तथा। तदा किं करणीयमेतद्विषये तत्र पुनराह तर्हि दुर्गाश्रितो भव। अत्र दुर्गाश्रित इत्यस्यार्थः न केवलं दुर्गा भगवती विषयका अपि तु परिखादिना दुर्गस्थानमाश्रितो भव। दुर्गाश्रितो इत्यस्यार्थेन यदा यमभयं विधेयं तदा दुर्गाभगवतीम् आश्रयो भव, यदा श्येनाद् बिभ्यसि तदा दुर्गनामकस्थानमाश्रितो भव। दुर्गाश्रयणं विना यमभयनिवारणे भिन्नोपायो नास्ति।

**प्रसङ्गान्तरे दृश्यते पतिपत्नीनां सम्पर्कविचारः**

नाट्यपरिशिष्टे विविधेषु वर्णनेषु तदानीन्तनसमाजव्यवस्थायामेकस्याः गृहिण्या एव गृहभावः प्रशस्यते साऽद्वितीयेत्युच्यते। यस्य जनस्य द्वे नवीने भार्य्ये तस्य मानवस्य मरणेऽपि सन्धेरवकाशो न विद्यते। यतो हि उभे द्वे भार्य्ये परस्परं विवादपरायणे भवतः। एवञ्च ज्ञायते सपत्नीविरोधः परस्परं विधातृकृत एव। कथं तयोः मैत्रीसम्भवः? अतः नाट्यकारकृष्णानन्दः विष्णुशर्मणः मुखेन आह, यस्मात् ते भार्य्ये अपि पत्युरेकमेव शरीरार्द्धमिच्छतः। अपरिहार्ये अस्मिन् सपत्न्योर्विरोधे गृहाश्रमी चिन्ताज्वरी भवत्येव। ईदृशे सपत्न्योर्वाग्युद्धे अस्य भर्तुः मरणं विना सुखं नास्ति एव। एवमेव उच्यते द्विपत्नीकस्य गार्हस्थ्याश्रम एको महान् गुणः अस्ति। गृहाश्रमस्थजनस्य वैराग्यं विना आश्रमान्तरं नास्ति। वैराग्यमेव तस्य एक एव आश्रयः भवति। एतेन श्लेषेण द्विभार्य्यस्य गृहाश्रमे गुणदोषौ समासेन कथितौ। प्राचीनैरुच्यते परस्परं प्रणेययोः अनुरक्तयोश्च दम्पत्योः गृहाश्रमः स्वर्गो भवति। उक्तञ्च मनुना – 'शोचन्ति यामयो यत्र विनश्यत्याशु तत्कुलमिति'[11]।

**व्यञ्जनसन्धिपादः**

कृष्णानन्दसरस्वतीमहोदयेन नाट्यपरिशिष्टग्रन्थे व्याकरणहल्सन्धावप्येवं दृश्यते श्लेषात्मकेन नाट्यव्याकरणपक्षयोः विश्लेषणम्।

''निर्व्वस्तुश्चुचुनाशेन वा वरं यापयेद्दिनं।
सच्चित्तस्यामृतं तद्धि मृतन्तु मृतमेव तत्।''[12]

नाटकपक्षे तु निर्व्वस्तुः नास्ति भक्ष्यं वस्तु यस्य तादृशः. सुबोधो जनः चुचुना तथा शुसुनीतिख्यातजलज-शाकविशेषेण भक्ष्यं दिनं यापयेत्, तस्य तादृशममृतम् अयाचितलब्धत्वादमृतम्। यत्तु मृतं याचितधनं तन्मृतमेव मरणतुल्यमेव मानक्षतिकरत्वादिति भावः। व्याकरणपक्षे तु श्लोकांशे एव प्रवक्ष्यते 'स्तुश्चुचुनाशेन वा'। तथा सकारतवर्गौ शकारेण चवर्गेण वा योगे शकारचवर्गौ क्रमात् स्याताम्। इत्यादिभिः बहुभिः

उदाहरणसहयोगैः व्याख्या परिलक्ष्यन्ते। अत्र पाणिनीयसूत्रम् 'स्तोः श्चुना श्चुः'[13] इत्यनेन सूचितमुदाहरणं श्लोकांशे सत् चित् इति। मुग्धबोधसूत्रमपि परिलक्ष्यते 'स्तुः श्चुभिः श्च्वशात्[14]।
अपि च हल्सन्धिः मुग्धबोधव्याकरणे हस्-सन्धिः इति उच्यते। भिन्नमुदाहरणमेकम्-

''भवेदत्र षड्र्म्मीणां जवो वश्चेत् परत्र च।
पोतवाहो भवनदीं कथं वस्तारयिष्यतीति।।''[15]

नाटकपक्षे तु अत्र भवनद्यां चेत् यदि युष्माकं सम्बन्धे कामक्रोधादिरूपोर्म्मीणां वेगो भवेत् तदा परकाले पोतवाहः कर्णधारः युष्मान् भवनदीं कथं तारयिष्यतीति। तथा च जटिलोर्म्मीषु नद्यादिषु च कर्णधारः न वाहयतीति प्रसिद्धिः। भवसंसारं तरितुमवश्यमेव अस्माकं षड़रिपूणां दमनं कर्तव्यम्। व्याकरणपक्षे भिन्नश्लोके तु समानरूपेण वक्ष्यते किं 'नय्स चन् शे' अर्थात् दान्ते स्थितस्य नस्य चन् स्यात् शे परे। किं शब्दोऽत्र विकल्पवाचकः। अत्र दृश्यते पाणिनीयसूत्रम् 'शि तुक्[16]। मुग्धबोधसूत्रम्- 'नणट्नङश्वकन् शशसस्शसि वा'[17]।

''कान्तिस्तु नुर्जायतेऽपवर्गे क्वाद्यत्रिवर्गके।
तावन्तः सुधियः श्रान्ताः परमन्येऽर्थलिप्सवः।।''[18]

अर्थात् अस्मिन् कलौ युगे अपवर्गे मानवस्य कुत्र स्पृहा जायते अपितु कदापि नेत्यर्थः। तावन्तः सर्वे विद्वांसः धर्मार्थकाममोक्षेषु परिश्रान्तयुक्ताः। अन्ये मानवाः केवलम् अर्थरूपपुरुषार्थकाङ्क्षिणः। व्याकरणपक्षे नुर्जायते पवर्गे क्वाद्यत्रिवर्गके तावन्तः अर्थात् पवर्गे कवर्गादित्रिवर्गे च परे तौ तवर्गे च परे अपदान्ते स्थितो तु अनुस्वारः अन्तः स्यात् सन्निहितानां पवर्गादीनाम् अन्तिमवर्गः स्यात्। उदाहरणं यथा काम्-ति कान्तिः, श्राम्-ता श्रान्ताः। अत्र दृश्यते पाणिनीयसूत्रम् 'अनुस्वारस्य ययि परसवर्णः'[19] अर्थात् अनुस्वारस्थानिकस्य ययि परसवर्णस्य आदेशः भवति। मुग्धबोधसूत्रम्- 'ञपे ञम्नोः'[20] अर्थात् अपदान्तस्थितस्य नोः ञपे परे अम् स्यात्।

अस्मिन् व्यञ्जनसन्धिपादे वारविलासिन्या उर्वश्या सहार्जुनस्य वार्तालापः दृश्यते। तयोः वार्तालापेन तदानीन्तननार्याः चरित्राणि प्रस्फुटितानि। सात्रयः स्वभावतः अबला भीरवश्च किन्तु ताः सात्रयः नृणां मनांसि चित्राणि च हर्तुं सबला भीषणाश्चेति। उर्वश्याः वार्तानुसारेण अद्य कलौ कुत्र मोक्षे मानवस्य स्पृहा जायते अपि तु कुत्रापि नेत्यर्थः। तावन्तः सुधियः त्रिवर्गके श्रान्ताः। अन्ये जनाः केवलम् अर्थलिप्सवः। उर्वशी अर्जुनं कामयति। परन्तु अर्जुनस्य वार्तालापानुसारेण साधुजनः व्यभिचारिनां न हि इच्छति यस्मात् प्रशान्तचित्तस्य स्थैर्य्यहानिः जायते। अत्र दृष्टान्तेन प्रदर्शयति तरङ्गशालिनी नदी प्रशान्तवेगान् क्षुद्रनदान् समधिगत्य तन्मर्य्यादां भिनत्ति। शोकमोहमूलात् दारादिमयसंसारमिदम्। दारादिमयसंसारे पालिते सति मोहशोकाद्युद्भवः आवश्यकः। अतः कारणात् यः पुरुषः अक्षेत्री स एव पुरुषेषु मध्ये श्रेष्ठः। अतः क्षेत्रशून्यः पुरुष एव प्रशस्यते। पुनः अर्जुनस्योपदेशदानेन एव ज्ञायते सर्वस्यानर्थस्य मूलम् यत् अशुभं तत् आत्मन्येव न धारयते। तर्हि कामक्रोधादिरूपसंसारं तरितुं न शक्नोति। अतः संसारिणः स्वकर्मसूत्रबद्धा न भवेयुः। तथा कामक्रोधादीनां वशे न वर्तेरन्। यतः अतिकामात् लङ्केशः हतः, कुरवो मत्सरात्, असुराः लोभात् च।

**विसर्गसन्धिपाद:**

अन्तर्व्याकरणनाट्यपरिशिष्टनामकरूपके विद्यालाभार्थं विद्यार्थिनां विद्या सत्पात्रे दानार्थं प्रेरयते। यो विद्यार्थी विद्यारूपार्जितं धनं सत्पात्राय ददाति सोऽनन्तयशांसि इच्छावते जनाय दद्यात्। वस्तुत: ज्ञानाय शस्त्रविद्या शास्त्रविद्या चेति लोके द्विविधा विद्या प्रसिद्धा। तत्राद्या धनुर्वेदादिशस्त्रविद्या वृद्धावस्थायां बलक्षये सति उपहासप्रदा, द्वितीया शास्त्रविद्या तु सदा सर्वास्वप्यवस्थासु जनै: पूज्यते। तन्निमित्तं यां शास्त्रविद्यां वयम् अर्जितवन्त: तस्या: शास्त्रविद्याया: अवश्यमेव प्रयोग: करणीय:। तदर्थमुच्यते -

''अर्जितो यस्तु विद्यार्थ: सत्पात्राय तमिच्छते।
विसर्ज्जनीय: सोऽनन्तयशसीच्छावतश्चिरात्।''[21]

व्याकरणपक्षे तु श्लोकांशे अस्ति 'छते विसर्ज्जनीय: सोऽनन्तयशसि' इति। नास्ति अन्तय: अन्त: गत: शस् यस्य तस्मिन् छते परे विसर्ग: स: स्यात्। यथा यस्तु इति। अत्रैव पाणिनीयसूत्रम् – 'विसर्ज्जनीयस्य स:'[22]। विसर्ज्जनीयस्य सकार: आदेश: भवति खरि परत:। तेनाह मुग्धबोधसूत्रम् –'वे: सोऽशसन्ते छते'[23]। वे: सकार: स्याद् अ- शसन्ते छते परे। शस् अन्ते यस्य स शसन्त:, न शसन्त: अशसन्त:। तेन 'य: तु' इत्यत्र यस्तु रूपं सिद्धम्।

''येन मोहस्य नादेर्लोप् तदेतज्जन्मन: सत:।
फलं स देहो भाराय भुवो य: स्यान्न मुक्तये।।''[24]।

येनोपायेन मोहस्य तथा अविद्याया: नाश: स्यात्, कीदृशस्य मोहस्य नादे: अर्थात् नास्ति आदिर्यस्य स तथा तस्य। तदेव मोहनाशाय उपयुक्तं ब्रह्मज्ञानमेव प्रशस्तस्य एतज्जन्मन: अर्थात् मनुष्यजन्मन: फलम्। यो देह: मुक्तये न स्यात् स देहो भुवो भाराय। व्याकरणपक्षे तु श्लोकांशे एव दृश्यते 'हस्य नादेर्लोप् तदेतज्जन्मन: सत:' इति। नास्ति आदिर्यस्य तादृशात् तदेतदो: स्थाने जातात् सकारात् परस्य अनुवर्त्तमानविसर्गस्य लोप: स्यात् हसि परे। उदाहरणं यथा स देह: इति। येन मो इति यमप्रभो: शिवस्य सम्बोधनम्। फलमित्यादिकम् उदाहरणम्। अत्रैव पाणिनीयसूत्रम् 'एतत्तदो: सुलोपोऽकोरनञ्समासे हलि'[25] अर्थात् अककारयो: एतत्तदो: य: सु: तस्य लोप: स्यात् हलि न तु नञ्समासे। तस्मात् पुन: मुग्धबोधसूत्रम् – 'हस्येतत्तदोऽनञक: सेर्लोप:'[26] अर्थात् नञक् वर्जादे: तद: तदञ्च परस्य से: वे: लोप: स्यात् हसि परे।

अस्मिन् नाट्यपरिशिष्टे समाजस्य कुलस्त्रीणाम् अवस्था: वर्णिता:। कामदेव: वेदनं प्रदाय कुलस्त्रीणां धैर्य्यरूपं धनम् अहरत्। तथा च कुलस्त्रीणां धैर्य्यमेव धनं तस्य हरणे अतीव पीडा भवति। तस्मात् धैर्य्यस्य हतत्वात् यं जनं प्रति चक्षु: प्रीतिं प्राप्स्यति तस्मिन् जने अनागते अग्निं वरिष्यति इत्याशय:। इतोऽपि पुत्र: यदि कुपथमारूढ: स्यात्, गेहिनी वा रुष्टा स्यात् तदा पृथ्वीपरिवृढस्य अपि ऐश्वर्य्यं सुखकृत् न स्यात्।

धर्मीयपरम्परारूपेण ग्रन्थे शैव-शाक्त-वैष्णवानां वार्तालापे वङ्गीयानां मत्स्यभोजनव्यापारे उपहास: श्रूयते –

''तेषां फलं किं पण्डातो मत्स्यं येऽश्नन्ति वङ्गजा:।
मत्स्याद: सर्वमांसाद इत्युक्तं यैर्न गण्यते।।''[27]

अत: ये वङ्गीयजना: मत्स्यमश्नन्ति, तेषां विद्यात: किं फलम्? यो मत्स्यमत्ति, स सर्वमेव मांसजातमत्ति। तत्र प्राच्य-पाश्चात्त्यभेदेन भोजनाभ्यास: वाक्यैरेवं दृश्यते। शक्तुभोजित्वं यदा प्रकटितं प्राच्यजनै:

पाश्चात्त्यान् प्रति, तदा पाश्चात्त्याः कथितवन्तः एतद् सत्यम्। प्राच्यास्तु मत्स्यभोजिन इति भिन्नश्लोकेन व्याजेन कथितवन्तः। अतः अस्मिन् लोके मत्स्यस्याशनात् पारलौकिकः तथा तादृशी मानसी व्यथा न जायते। ब्राह्मणानां स्वाचारसन्ध्यार्च्चात्यागात् तथा पारलौकिक आधिर्भवति। पुनः अन्येन वाक्येन वङ्गजनानां समर्थनाय प्राच्यास्तान् प्रति –

''अहो मैत्रेयाः! बहुवचनस्य शिरसः शूलानि भवन्तीति।
वाग्जालेननालं पाश्चात्त्या यूयं परिचिताः स्थ।।''[28]

अस्मिन् नाट्यपरिशिष्टे वेदान्ति-नैयायिक-तार्किकाणां वाक्यालापे काव्यस्य महिमा अपि श्रुयते। आलङ्कारिकः कवीन् प्रति उच्यते नैयायिकानामवज्ञया भवतां काव्यस्य च नोपादेयत्वहानिः स्यात्। यतः हि यः काव्यगुणान् जानाति स एव कवीन् आद्रियते।

संस्कृतभाषायां काव्यव्याकरणयोः संमिश्रणयोः एतादृशं रूपकं जगति स्वल्पमस्ति। भर्तृहरिणा[29] विरचितं भट्टिकाव्यं व्याकरणकाव्यशास्त्रम्, परन्तु अन्तर्व्याकरणनाट्यपरिशिष्टं व्याकरणात्मकमपि नाट्यरूपता अत्रास्ति। नाट्यकारेण स्वयमेवमुक्तं काव्यपाठच्छलेन क्षितौ अमृतमाविर्भवति। तत् काव्यामृतास्वादेनैव अमृतं प्राप्नोति। उक्तञ्च-

''काव्यरूपेण पीयुषं देवान्धः त्सरति क्षितौ।''[30]

विशुद्धं व्याकरणं विना काव्यस्य माहात्म्यं यथा अपूर्णं स्यात्, तेनैव काव्यमाध्यमेन व्याकरणस्य अध्ययनमधिकतया रोचते। आत्मनः प्रकाशो यस्य तादृशं महामूल्यमपि वस्तु स्वपरप्रकाशकालिकं प्रदीपादिवत् तस्य आलोकं विना न प्रकाशेत। तेनापि निगदितं तस्य ग्रन्थे -

''शास्त्रान्तरपरिज्ञाने चक्षुर्व्याकरणं परं।
काव्यं शास्त्राब्धिमन्थोत्थं पीयूषं प्रतिभामताम्।।''[31]

**तथ्यसूत्राणि**

1. अन्तर्व्याकरणनाट्यपरिशिष्टम्, श्लोकः ६, पृ. ४
2. हितोपदेशे मित्रलाभः। श्लोकः १५, पृ. १२०
3. अन्तर्व्याकरणनाट्यपरिशिष्टम्, श्लोकः १, पृ. ११.
4. पा. सू. ६/१/७८.
5. मु. सू. २४.
6. अन्तर्व्या. श्लोकः ५, पृ. ९.
7. हितोपदेशः, श्लोकः ६, पृ. ४
8. पा. सू. ६/१/८८
9. मु. सू. २.
10. अन्तर्व्या, श्लोकः १४, पृ. १३

11. तदेव, पृ. १७.
12. तदेव, श्लोक: ४, पृ.१८
13. पा. सू.-८.४.४.
14. मु. सू.-४४
15. अन्तर्व्या, श्लोक: २५, पृ.२८
16. पा. सू.-८.३.३१
17. मु. सू.-५५
18. अन्तर्व्या, श्लोक: १९, पृ. २५
19. पा. सू.-८/४/५८
20. मु. सू.-४१
21. अन्तर्व्या, श्लोक: ४, पृ. ३६
22. पा. सू. ८/३/३४
23. मु. सू.-६३
24. अन्तर्व्या, श्लोक: १९, पृ.४२
25. पा. सू.-६.१.१३४
26. मु. सू.-६
27. अन्तर्व्या, श्लोक: ४, पृ. ९८
28. तदेव, श्लोक: ८, पृ. ९९.
29. मतान्तरे भट्टिहरि/ भट्टि इति.
30. अन्तर्व्याकरणनाट्यपरिशिष्टम्, श्लोक: ४, पृ. ३७.
31. तदेव, श्लोक: १२, पृ. ६.

**सन्दर्भसहायकग्रन्था:**


कृष्णानन्दसरस्वती, अन्तर्व्याकरणनाट्यपरिशिष्टम् (अजितनाथन्यायरत्नकृतया राजसरणीसमाख्यया व्याख्यया समेतम्), कलकाता, १३०१ वङ्गाब्दे।

निरञ्जनस्वरूपब्रह्मचारी, मुग्धबोधं व्याकरणम्, श्रीमदद्वैतबोधाश्रम:, वाराणसी, १३९१ वङ्गाब्दे।

मुखोपाध्याय:, सत्यनारायण:, नवद्वीपेर व्याकरण दर्शनेर इतिहास, नवद्वीपपुरातत्त्वपरिषद, नदीया, २०२१.

बालशास्त्री, हितोपदेश:, चौखम्बासुरभारतीप्रकाशन, वाराणसी, २०१.

दास:, करुणासिन्धु:, संस्कृत साहित्येर समाजतत्त्व ओ अन्यान्य प्रसङ्ग:, रवीन्द्रभारती विश्वविद्यालय, कलकाता, १९९९.

Misra, Jnanankasekhar, A Critique of the Mugdhabodha System of Sanskrit Grammar, Sanskrit Book Depot, Kolkata, 2006.

# अर्थोपक्षेपकविमर्शः

**राजदीप-सरकारः**

**प्रबन्धसारः**
न हि नाट्ये यस्य कस्यापि वस्तुनः प्रदर्शनं क्रियते। तत्र एवम्विधानि कानिचित् नीरसानुचितेतिवृत्तानि वर्तन्ते येषां सविशदं वर्णनं मञ्चोपरि नोपस्थाप्यते । अपि तु पूर्वपरसंलग्नत्वसंरक्षणाय नाट्यकृद्भिः विविधैः नाट्यकौशलैः तत् समासेन प्रदर्श्यते। एतादृशं नाट्यवस्तु सूच्यवस्तुत्वेन परिगण्यते। अत्र नाट्यकौशलशब्देन अर्थोपक्षेपको बोध्यः। स च पुनः पञ्चविधः - विष्कम्भकः, प्रवेशकः, चूलिका, अङ्कावतारः, अङ्कमुखञ्चेति। अस्मिन् पत्रे भासादारभ्य कृष्णमिश्राचार्यपर्यन्तं काव्यिकानां विरचनेषु, भरताचार्यादारभ्य विश्वनाथकविराजं यावत् आलङ्कारिकाणाम् अलङ्कारशास्त्रीयग्रन्थेषु च अर्थोपक्षेपकस्य उपयोगः क्रमविकाशश्च यथाशक्ति समालोच्यते।

**कुञ्चीशब्दाः**
अर्थोपक्षेपकः, विष्कम्भकः, नाट्यशास्त्रम्, दशरूपकम्, नाटकलक्षणरत्नकोषः विश्वनाथकविराजः, भासः, प्रतिमा, अभिज्ञानशकुन्तलम्, अर्थद्योतनिका।

''**इह हि वाङ्मयमुभयथा शास्त्रं काव्यञ्च**'' इति राजशेखरः। प्रवृत्तिर्वा निवृत्तिर्वा येनोपदिश्यते तच्छास्त्रमभिधीयते। अस्मिन् प्रबन्धे शास्त्रशब्देन अलङ्कारशास्त्रं बोद्धव्यम्। शास्त्रेऽस्मिन् आलङ्कारिकैः काव्यानां विविधप्रायोगिकविषयेषु आलोचना क्रियते। अलङ्कारशास्त्रमिदं काव्यानां व्याकरणशास्त्रमित्यपि वक्तुं शक्यते। अतः सुष्ठु काव्यावबोधे अस्य गुरुत्वमपरिहार्यम्। काव्यञ्च द्विविधं दृश्यश्रव्यभेदात्। तत्र दृश्यकाव्यं रङ्गमञ्चे अभिनीतत्वात् दर्शनयोग्यम्। श्रव्यकाव्यन्तु केवलं श्रवणयोग्यम्। दृश्यकाव्यं पुनर्द्विविधम् - रूपकमुपरूपकञ्चेति। इहालङ्कारशास्त्रे बीजबिन्दुपताकाप्रकर्यर्थप्रकृतिपञ्चावस्थार्थोपक्षेपकादीनां प्रायोगिकविषयाणां सुष्ठु आलोचनम्, नाटकादिषु च तेषां प्रयोगश्च विचार्यते। एतेषु प्रायोगिकविषयेषु अर्थोपक्षेपकः अतीव गुरुत्वपूर्णविषयः।

भरताचार्यस्य (आनुमानिकप्रथमशताब्दी) नाट्यशास्त्रे अर्थोपक्षेपकस्य कोऽपि सुस्पष्टार्थो न परिलक्ष्यते। तत्र अभिनवगुप्तस्य (दशमशताब्दी) अभिनवभारतीटीकायां (नाट्यशास्त्रस्य प्रसिद्धटीका) अस्य लक्षणं यथा – ''**अदृष्टमप्यर्थं हृदि प्रवेशयन्तीति प्रवेशकाः**।'' अत्र प्रवेशकशब्दः अर्थोपक्षेपकस्यार्थे प्रयुक्तोऽस्ति। रामचन्द्रगुणचन्द्रयोः (द्वादशशताब्दी) नाट्यदर्पणे अप्येवं परिलक्ष्यते – ''*अप्रत्यक्षानर्थान् सामाजिकहृदये प्रवेशयतीति प्रवेशकः* इति। अतएव परवर्तिनि अङ्के पात्रप्रवेशनम् उत अङ्केऽवर्णितवस्तुनो दर्शकहृदि प्रवेशनम् इत्येव प्रवेशकस्य मुख्यमुपयोगित्वम्। वस्तुतस्तु सामान्यतया विष्कम्भकादीनां यत् कार्यं प्रवेशकस्यापि तदेव। एतदर्थं नाट्यशास्त्रादौ अर्थोपक्षेपकार्थे प्रवेशकशब्दस्य प्रयोग इति मन्यते। सागरनन्दिना (दशमशताब्दी) नाटकलक्षणरत्नकोषे भणितम् —

**''अर्थोपक्षेपका अर्थप्रतिपादका''** इति

अर्थात् अर्थस्य वस्तुन उपक्षेपणं यैः क्रियते त एव अर्थोपक्षेपकाः। तत्रभवता कृष्णमोहनशास्त्रिणा (साहित्यदर्पणस्य लक्ष्मीटीकाकारः) चोक्तं— ''**अर्थान् सरसवृत्तान्तान् उपक्षिपन्ति उपस्थापयन्तीति अर्थोपक्षेपकाः।**'' तारानाथतर्कवाचस्पतेः (ऊनविंशशताब्दी) वाचस्पत्ये चास्य निर्वचनं यथा - अर्थान् प्रयोजनानि उपक्षिपतीति अर्थोपक्षेपकः। अयमर्थोपक्षेपकः पञ्चविधः - विष्कम्भकः, प्रवेशकः, चूलिका, अङ्कावतारः, अङ्कमुखञ्चेति। उक्तञ्च धनञ्जयाचार्येण (दशमशतब्दी) दशरूपके—

**अर्थोपक्षेपकैः सूच्यं पञ्चभिः प्रतिपादयेत्।**
**विष्कम्भचूलिकाङ्कास्याङ्कावतारप्रवेशकैः।।** १.५८।।

अर्थात् अर्थोपक्षेपकैः सूच्यं नाम वस्तु प्रतिपाद्यते। दृश्यकाव्येषु अभिनीतं यन्नाटकीयवस्तु तद्द्विविधदृष्टिकोणतः आलङ्कारिकैर्विभज्यते। तत्र कानिचिद् एवम्विधानीतिवृत्तानि वर्तन्ते येषां सविशदं वर्णनं न भवति। एतज्जातीयकं वस्तु सूच्यमिति कथ्यते। पुनरपरजातीयकम् इतिवृत्तं रङ्गमञ्चे सम्यग्रूपेण प्रदर्श्यते तत्तु दृश्यं श्रव्यं च। एतादृशं कथावस्तु असूच्यं नाम्नाप्यभिधीयते। तथाह्युक्तं दशरूपके—

**द्वेधा विभागः कर्तव्यः सर्वस्यापीह वस्तुनः।**
**सूच्यमेव भवेत् किञ्चिद्दृश्यश्रव्यमथापरम्।।** १.५६।।

रूपकं खलु भवति रसाश्रितम्। रसास्वादनमेव अस्य मुख्यं लक्ष्यम्। परन्तु नाट्ये सकलमितिवृत्तं न रससमन्वितम्। तत्र यन्नाटकीयवस्तु रसासमन्वितम्, विपरीतस्वभावभावव्यञ्जकत्वेन असङ्गतं स्यात्, यत्तु दिनद्वयादिसाध्यं वर्षपर्यन्तञ्च व्याप्तम्, एकमात्रदिननिष्पन्नमपि अतिबहुलं किन्तु पूर्वपरसंलग्नत्वसंरक्षणाय अवश्यकथनीयं तत्सर्वं सूच्यवस्तुत्वेन परिगण्यते। एतदेव नाट्यकृद्भिरर्थोपक्षेपकैः समासेन समुपस्थाप्यते।[1] अपि तु पुराणादिषु वत्सराधिककालनिष्पाद्यत्वेन यद्वस्तु प्रसिद्धं तदपि वत्सरन्यूनकालनिष्पाद्यतया एभिरुपस्थापनीयम्।[2] अधुनास्मिन् प्रबन्धे नाटके तथा अलङ्कारशास्त्रे अर्थोपक्षेपकस्योपयोगः क्रमविकाशश्च विहङ्गमदृष्टितः समासेन समालोच्यते।

**विष्कम्भकः**

पारिभाषिकोऽयं शब्दः। अलङ्कारशास्त्रे मूलतो विष्कम्भकः खलु रूपकाङ्गप्रभेदः। नाट्ये येनार्थोपक्षेपकेण पूर्वकाले घटितानां घटनानां, भविष्यति भवितव्यानां घटनानां च विषये समासेन सूचना दीयते स विष्कम्भकः। स्कन्भ्धातोः कर्तरि ण्वुलि विष्कम्भकः अच्प्रत्ययाच्च विष्कम्भ इति निष्पद्यते। तत्र नार्थवैषम्यम्। नाट्यदर्पणे अस्य निर्वचनं यथा – **''विष्कभ्नात्यनुसन्धानेन वृत्तमुपष्टम्भयतीति विष्कम्भकः।''** विष्कम्भकं वर्णयन् मुनिराह—

मध्यमपुरुषनियोज्यो नाटकमुखसन्धिमात्रसञ्चारः।
विष्कम्भकस्तु कार्यः पुरोहितामात्यकञ्चुकिभिः।। १९.१११।। (मधुसूदनशास्त्रिसम्पादितम्)।

अर्थात् पुरोहितामात्यादिभिः मध्यमपात्रैर्विष्कम्भकः प्रयुक्तो भवति। तत्तु केवलं नाटकस्य मुखसन्धौ एव वर्तते परन्तु एतत् परवर्तिभिरालङ्कारिकैर्न स्वीकृतम्, प्रतिमुखसन्ध्यादावपि तस्य सन्दर्शनात्। उदाहरणं यथा – शाकुन्तले तृतीयाङ्कान्तर्गतो विष्कम्भकः प्रतिमुखसन्धावेव वर्तते। एवमन्यत्रापि दृश्यते।

दशरूपके विष्कम्भकस्य लक्षणं यथा—

**वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः।**
**संक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः।।** १.५९।।

नाट्यदर्पणादिषु अपि दशरूपकस्य छाया दृश्यते। शारदातनयस्य (त्रयोदशशताब्दी) भावप्रकाशने विष्कम्भकादीनां स्वतन्त्रं किमपि लक्षणं नोक्तं तत्र केवलं पूर्वाचार्याणां मतमेव उद्धृतमस्ति। विश्वनाथकविराजस्य (चतुर्दशशताब्दी) साहित्यदर्पणेऽपि दशरूपकस्य प्रतिध्वनिर्दृश्यते।[३]

कोहलो[४] मन्यते केवलं प्रथमाङ्कस्य प्रारम्भ एव विष्कम्भकस्य स्थितिः[५]। परन्तु धनञ्जयादिभिः परवर्तिभिरालङ्कारिकैरेतन्न स्वीक्रियते। विष्कम्भकलक्षणे साहित्यदर्पणकृता ''**आदावङ्कस्य दर्शितः**'' इति यदुक्तं तेन विष्कम्भको यथा प्रथमाङ्कस्य आमुखादनन्तरं तथा अन्येषां वा अङ्कानामादावपि प्रयुक्तो भवितुमर्हति। भावप्रकाशने अप्यस्य समर्थनं परिलक्ष्यते।[६] उदाहरणं यथा – प्रतिमानाटके द्वितीयषष्ठसप्तमाङ्केषु विष्कम्भकः परिलक्ष्यते।

स च विष्कम्भको द्विविधः — शुद्धः संकीर्णश्चेति। उक्तञ्च नाट्यशास्त्रे –

**शुद्धः संकीर्णो वा द्विविधो विष्कम्भकस्तु विज्ञेयः।**
**मध्यमपात्रैः शुद्धः संकीर्णो नीचमध्यकृतः।।** १९.११२।।

**१.शुद्धविष्कम्भकः –** शिक्षागौरवादिना अप्रधानतया वा मध्यमश्रेणीभुक्तेनैकेन पात्रेण, तादृशाभ्यां द्वाभ्यां पात्राभ्याम्, बहुभिर्मध्यमैः पात्रैर्वा सम्प्रयोजितो विष्कम्भकः शुद्धः।

नाट्ये त्रिविधानि पात्राणि परिलक्ष्यन्ते। उत्तमं मध्यमम् अधमञ्चेति। राजा प्रभृतय उत्तमपात्रत्वेन परिगण्यन्ते। भरतमते विज्ञानमाधुर्ययुताः, मधुरभाषिणः, लोकोपचारचतुराः शिल्पशास्त्रविशारदाः इत्यादिनि मध्यमश्रेण्याः पात्राणि भवन्ति। नाट्यदर्पणे अमात्यः, सेनापतिः, वणिक्, विप्रः इत्यादयो मध्यमपात्ररूपेण कथ्यन्ते। कथमेतेषां मध्यमत्वम्? उच्यते नाट्यदर्पणे — ''**मध्यमत्वं चैषां राजापेक्षया, राजा परिजनापेक्षया तु तेऽपि प्रधानम्**''। नीचपात्रन्तु प्रवेशकालोचनावसरे आलोचयिष्यते। तत्र केवलं मध्यमपात्रैः शुद्धविष्कम्भकः प्रयुज्यते। मध्यमपात्रत्वादत्र संस्कृतभाषा अपेक्षते।[७] उदाहरणं यथा –

**एकपात्रेण –**

क. अभिज्ञानशाकुन्तले (नाटकम्) तृतीयाङ्कस्यादौ शिष्यः।[८]

ख. रत्नावल्यां (नाटिका) प्रथमाङ्के यौगन्धरायणः।

ग. मालतीमाधवे (प्रकरणम्) पञ्चमाङ्कस्यादौ श्मशाने कपालकुण्डला।

**अनेकपात्रैः –**

क. अभिषेके (नाटकम्) द्वितीयाङ्कस्यादौ ककुभबिलमुखौ।

ख. ऊरुभङ्गे (एकाङ्कव्यायोगः) प्रथमद्वितीयतृतीयाः।

ग. पञ्चरात्रे (समवकारः) प्रथमाङ्के प्रथमद्वितीयतृतीयाः।

घ. उत्तररामचरिते (नाटकम्) द्वितीयाङ्के आत्रेयी-वासन्त्यौ।

**२.संकीर्णविष्कम्भकः –** मिश्रविष्कम्भक इत्यस्य नामान्तरम्। नीचमध्यमैः पात्रैर्यो विष्कम्भकः प्रयुज्यते स संकीर्णः। तत्र शिक्षागौरवाद्यभावात् पात्राणां नीचत्वम्। अत्र नीचमध्यमपात्राणां समावेशात् अयन्तु संस्कृतप्राकृतभाषाभ्यां प्रवर्तितो भवति।[९] उदाहरणं यथा-

क. प्रतिमायां (नाटकम्) द्वितीयाङ्कस्यादौ काञ्चुकीयः (मध्यमः) प्रतिहारी (नीचः) च।

ख. विक्रमोर्वशीये (त्रोटकम्) तृतीयाङ्कस्यादौ प्रथमशिष्यः (मध्यमः) द्वितीयशिष्यः (नीचः) च।

**प्रवेशकः –**

अयं द्वितीयोऽर्थोपक्षेपकः। प्रवेशयति परवर्तिपात्रप्रवेशं सूचयतीति प्रवेशकः। अर्थात् मञ्चोपरि पात्रप्रवेशस्य सूचनात्वादिदं नामकरणम्। नाट्यशास्त्रेऽस्य स्वरूपं सविस्तरमालोचितमस्ति। उक्तञ्च भरतेन –

परिजनकथानुबन्धः प्रवेशको नाम विज्ञेयः।।१८.२८।।
अङ्कान्तरानुसारी संक्षेपार्थमधिकृत्य बिन्दूनाम्।
प्रकरणनाटकविषये प्रवेशको नाम विज्ञेयः।।१९.११४।।

परिजनशब्देन दासदासीकञ्चुकिप्रभृतयो बोध्याः। तेषां कथानुबन्धः प्रवेशक इति। अङ्कान्तानुसारीत्यनेन प्रथमाङ्के अस्य प्रतिषेधो विधीयते। अतो द्वयोरङ्कयोर्मध्य एवास्य प्रयोग इष्टः। मुनिमते नाटके प्रकरणे च प्रवेशकः प्रयुज्यते।

धनञ्जयो लक्षयति -

तद्वदेवानुदात्तोक्त्या नीचपात्रप्रयोजितः।
प्रवेशकोऽङ्कद्वयस्यान्तः शेषार्थस्योपसूचकः।। १.६०,६१।।

प्रवेशकोऽपि विष्कम्भकवत् भूतभविष्यदर्थज्ञापको भवति। संस्कृतेतरभाषायामयं (अनुदात्तोक्त्या) एकेन नीचपात्रेण, द्वाभ्यां नीचपात्राभ्याम्, बहुभिर्नीचपात्रैर्वा विधीयते। अत्र लक्षणे अङ्कद्वयस्यान्त इति यदुक्तस्तेन विष्कम्भकलक्षणे अस्यातिव्याप्तिर्निवार्यते।

रामचन्द्र-गुणचन्द्रमते अस्य लक्षणम्–

एवं प्रवेशको नीचैः परार्थैः प्राकृतादिना।
एतौ प्रभूतकार्यत्वान्नाटकादिचतुष्टये।।१.२१।।

अत्र लक्षणे नाटकादिचतुष्टयेन नाटक-प्रकरण-नाटिका-प्रकरणिका बोध्याः। अतस्तन्मते एतस्मिन् चतुष्टये विष्कम्भकप्रवेशकौ अवतिष्ठेते। किन्तु व्यायोगादिषु एकाङ्केषु अल्पवृत्तत्वेन एतयोः प्रयोगो न स्वीकृतः। समवकार अपि नैतौ इष्टौ। परन्तु एषो न समुचितः, पञ्चरात्रमिति समवकारे ऊरुभङ्गमिति च व्यायोगे विष्कम्भकस्य सत्त्वात्। नाट्यदर्पणे भावप्रकाशने च प्रवेशकस्य स्थितिविषये यदुक्तं तेन केषाञ्चिन्मते प्रथमाङ्के अपि प्रवेशको भवितुमर्हतीति अनुमीयते।[१०] परन्तु अन्यैरालङ्कारिकैरेतन्न स्वीकृतम्। साहित्यदर्पणे दशरूपकानुरूपं प्रवेशकलक्षणं लक्ष्यते –

प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः।
अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा।।६.५७।।

प्रवेशको केवलं नीचपात्रैरेव प्रयुज्यते। भरतमते क्रोधी, दुश्चरित्रः, कुसत्त्वम्, घातकः, स्थूलमतिः, जुयाडी,

स्त्रैण:, कलहकारी, मित्रहन्ता इत्यादयो नीचपात्रत्वेन परिगण्यन्ते । रामचन्द्रगुणचन्द्राभ्यां दासचेट्यादय:, सागरनन्दिना दासदासीकञ्चुकिप्रभृतय:, मातृगुप्ताचार्येण[११] विटविप्रमुनिकञ्चुकितापसा:, शारदातनयेन तु विटमुनिदैवतपुरुषेत्यादयो नीचपात्ररूपेण इष्यन्ते। नीचपात्रत्वात प्रवेशकस्य भाषा भवति प्राकृतमिति[१२]। किन्तु यदि तापसादिभि: पात्रै: प्रवेशक: प्रयुज्यते तर्हि स संस्कृतभाषया एव प्रवर्तते[१३]। उदारणं यथा–

**एकेन पात्रेण–**

क. स्वप्नवासवदत्ते (नाटकम्) द्वितीयाङ्कस्यादौ चेटि:।[१४]
ख. विक्रमोर्वशीये (त्रोटकम्) पञ्चमाङ्कस्यादौ विदूषक:।
ग. मालतीमाधवे (प्रकरणम्) सप्तमाङ्कस्यादौ बुद्धरक्षिता।

**अनेकपात्रै: –**

क. पञ्चरात्रे (समवकार:) द्वितीयाङ्कस्यादौ वृद्धगोपालकगोमित्रकौ।
ख. शाकुन्तले (नाटकम्) षष्टाङ्कस्यादौ श्यालरक्षिपुरुषा:।
ग. रत्नावल्यां (नाटिका) द्वितीयाङ्कस्यादौ सुसंगतानिपुणिके।

**एतत्सर्वं प्राकृतभाषया प्रयुक्तम्, संस्कृतभाषया यथा –**

क. अभिज्ञानशकुन्तले तृतीयाङ्कस्यादौ शिष्य:।[१५]
ख. प्रबोधचन्द्रोदये द्वितीयाङ्कस्यादौ दम्भवद्धहंकारा:।[१६]
ग. तत्रैव पञ्चमाङ्कस्य प्रारम्भे श्रद्धाशान्तिविष्णुभक्तय:।
घ. तत्रैव च षष्ठाङ्के शान्तिश्रद्धे।

**विष्कम्भकप्रवेशकयो: प्रयोगस्थानम्**

मुनिमते केवलं नाटके प्रकरणे च विष्कम्भकप्रवेशकौ प्रयुज्येते। एतत्सर्वैरङ्गीकृतं परन्तु प्रयोजनवशादन्येषु रूपकेषूपरूपकेष्वपि एतौ प्रयुक्तौ भवेताम्। तद्यथा रामचन्द्रगुणचन्द्रमते नाटिका-प्रकरणिकयो:, शारदातनयमते व्यायोगडिमेहामृगेषु विष्कम्भकप्रवेशकयो: प्रयोग इष्ट:। सिंहभूपालमते (चतुर्दशशताब्दी) डिमे विष्कम्भकप्रवेशकचूलिकानाम्, व्यायोगे विष्कम्भकचूलिकयो:, ईहामृगे तथा अङ्के विष्कम्भकप्रवेशकयो: प्रयोगो भवति। विश्वनाथमते समवकारे प्रवेशक:, डिमप्रहसनसट्टकप्रेङ्खणेषु च विष्कम्भकप्रवेशकौ निषिध्येते। एवं प्रतिषेधनियमेनात्र विधिर्विधीयते। ततोऽन्यत्रापि एतौ भवितुमर्हत इति मन्यते।

पञ्चसु अर्थोपक्षेपकेषु इमौ विष्कम्भकप्रवेशकौ मुख्यत्वेन परिगण्येते। एतदुभयमेवाङ्काद्बहि: प्रयुज्यते न तु अङ्कमध्ये।

**चूलिका –**

शब्दोऽयं पारिभाषिक:। वृत्तान्तविशेषस्य शीर्षे अवस्थितत्वात् इयं चूलिका (चूडास्वरूपा)। चूलास्या नामान्तरम् (चूडात: चूला इति अनुमीयते)। यत्र केवलं नेपथ्यपात्रेण अर्थसूचनं प्रदीयते तत्र चूलिका नाम अर्थोपक्षेपको भवति। उक्तञ्च भरतेन -

अन्तर्य(ज) वनिकासंस्थै: शून्यादिभिरनेकधा।
अर्थोपक्षेपणं यत्तु क्रियते सा हि चूलिका।।१९.११३।।

दशरूपके यथा -

अन्तर्ज(य)वनिकासंस्थैश्चूलिकार्थस्य सूचना।।१.६१।।

सिंहभूपालस्य सुधाकरे अस्य लक्षणमेवम्–

वन्दिमागधसूताद्यैः प्रतिसीरान्तरस्थितैः।।३.१८८।।
अर्थोपक्षेपणं यत्तु क्रियते सा हि चूलिका।
सा द्विधा चूलिका खण्डचूलिका चेति भेदतः।।३.१८९।।

सुधाकरकृन्मतानुसारतः चूलिका द्विविधा - चूलिका खण्डचूलिका चेति। यद्यपि अन्येषु आलङ्कारिकग्रन्थेषु चूलिकाया एवम्विधभेदो न दृश्यते। चूलिकाया अवस्थानविषये भरतादिभिरालङ्कारिकैः स्पष्टतया किमपि नोक्तम्। परन्तु सुधाकरकारेण एतद्विषये स्पष्टीक्रियते। अङ्कस्यादौ अङ्कमध्ये वा चूलिका स्थातुं शक्यते।[१७] रूपगोस्वामिनापि तदेव स्वीक्रियते। साहित्यदर्पणे चूलिकाया दशरूपकवल्लक्षणम् परिलक्ष्यते। उदाहरणं यथा –

१.अङ्कादौ चूलिका यथा उत्तररामचरिते द्वितीयाङ्के – ''(नेपथ्ये) स्वागतं तपोधनायाः। (ततः प्रविशति तपोधना)'' इति नेपथ्यपात्र्या वासन्तिकया आत्रेयीप्रवेशसूचनात् चूलिका।

२. अङ्कमध्ये यथा रत्नावल्यां द्वितीयाङ्के – (नेपथ्ये कलकलः)

कण्ठे कृत्तावशेषं कनकमयमधः शृङ्खलादाम कर्षन्
क्रान्त्वा द्वाराणि हेलाचलचरणरणत्किङ्किणीचक्रवालः।
दत्तातङ्कोऽङ्गनानामनुसृतसरणिः संभ्रमादश्वपालैः
प्रभ्रष्टोऽयं प्लवङ्गः प्रविशति नृपतेर्मन्दिरं मन्दुरायाः।।

इत्यत्र नेपथ्यगतैः पात्रैः प्रयोगानुचितस्य वानरविप्लवाद्यर्थस्य सूचनादियं मध्यचूलिका। तेन खण्डचूलिकाया लक्षणं प्रदीयते एवं -

रङ्गनेपथ्यसंस्थायिपात्रसंलापविस्तरैः।
आदौ केवलमङ्कस्य कल्पिता खण्डचूलिका।।३.१९१-९२।।

अर्थात् यत्र केवलमङ्कस्यादौ रङ्गस्थितैः नेपथ्यस्थितैश्च पात्रैर्वस्तुनः सूचनं प्रदीयते तत्रैव खण्डचूलिका भवति। उदाहरणं यथा -

३. बालरामायणे सप्तमाङ्कस्यादौ प्रविष्टेन कर्पूरचण्डेन यवनिकान्तर्गतेन चन्दनचण्डेन च पर्यायप्रवृत्तवाग्विलासैस्ताडकावधादिभीषणाभयप्रदानान्तस्य रामभद्रचरितस्य बाहुल्यात् प्रयोगानुचितस्य सूचनादियं खण्डचूलिका। यद्यपि एनमन्ये विष्कम्भकं प्राहुः किन्तु सिंहभूपालेन तन्न स्वीक्रियते।

साधारणतया चूलिका अङ्कस्याङ्गत्वेन प्रयुक्तो भवति किन्तु शारदतनयमते कदाचिदस्या विष्कम्भकप्रवेशकवत् बाह्येऽपि निवेशनं सम्भाव्यते। सुधाकरकृदपि तदेव मन्यते।[१८]

**अङ्कमुखम् –**

अङ्कास्यमस्य नामान्तरम्। साधारणतया अङ्कान्ते यदा केनापि पात्रप्रवेशेन पूर्वाङ्काद्भिन्नस्य परवर्तिनः अङ्कस्यार्थः

सूच्यते तदा तदङ्कमुखमिति कथ्यते। वस्तुतस्तु सर्वेषामङ्कानां विषयवस्तुसूचनादस्य मुखस्वरूपत्वम्।[११]
अस्य लक्षणं यथा नाट्यशास्त्रे –

विश्लिष्टमुखमङ्कस्य स्त्रिया वा पुरुषेण वा।
यदुपक्षिप्यते पूर्वं तदङ्कमुखमुच्यते।।१९.११६।।

अर्थात् पूर्वस्याङ्कस्यान्ते स्त्रिया वा पुरुषेण वा पात्रेण असम्वद्धस्य उत्तराङ्कमुखस्य य उपक्षेपस्तदङ्कमुखम्। तुल्यदृष्टिर्लक्ष्यते दशरूपकस्य लक्षणे। तद्यथा –

अङ्कान्तपात्रैरङ्कास्यं छिन्नाङ्कस्यार्थसूचनात्।।१.६२।।

अङ्कान्ते एव पात्रम् अङ्कान्तपात्रम्। तेन अभिनीयमानाङ्कात् विश्लिष्टस्य उत्तराङ्कमुखस्य सूचनं यत्र वर्तते उत्तराङ्कावतारकं तदंशमङ्कास्यमिति उच्यते। उदाहरणं यथा – महावीरचरितस्य द्वितीयाङ्कान्ते-

''**(प्रविश्य)**
सुमन्त्रः – भगवन्तौ वशिष्टविश्वामित्रौ भवतः सभार्गवानाह्वयतः।
इतरे – क्व भगवन्तौ ?
सुमन्त्रः – महाराजदशरथस्यान्तिके।
इतरे – तदनुरोधात् तत्रैव गच्छामः'' इत्यङ्कसमाप्तौ (ततः प्रविशन्त्युपविष्टा वशिष्टविश्वामित्रपरशुरामाः)। इत्यत्र पूर्वाङ्कान्त एव प्रविष्टेन सुमन्त्ररूपपात्रेण शतानन्दजनककथार्थविच्छेदे उत्तराङ्कमुखसूचनादङ्कास्यमिति। भावप्रकाशने उद्धृतं लक्षणं यथा –

पूर्वाङ्कान्तप्रविष्टैर्यदुत्तराङ्कार्थसूचनम्।
पूर्वाङ्कार्थानुवृत्त्यर्थं तदङ्कास्यमुदीरितम्।। ७.२२७।।

अत्र ग्रन्थे अङ्कास्येन सह अङ्कमुखं पृथक्त्वेन लक्ष्यते –

सूत्रणं सकलाङ्कानां ज्ञेयमङ्कमुखं बुधैः। ७.२३८।।

अर्थात् प्रथमलक्षणानुसारतः अङ्कान्त एव विच्छिन्नाङ्कस्य वस्तुसूचनादङ्कास्यं भवति। द्वितीयमते तु अङ्कस्यादौ अन्ते वाखिलानामङ्कानां वस्तुसूचनादङ्कमुखमिति उभयोर्मध्ये पार्थक्यम्। साहित्यदर्पणेऽपि भावप्रकाशनस्य तुल्यदृष्टिर्दृश्यते। तद्यथा –

यत्र स्यादङ्क एकस्मिन्नङ्कानां सूचनाखिला।।
तदङ्कमुखमित्याहुर्बीजार्थख्यापकञ्च तत्।
अङ्कान्तपात्रैर्वाङ्कास्यं छिन्नाङ्कास्यार्थसूचनात्।।६.५९,६०।।

उदाहरणं यथा – भवभूतेर्मालतीमाधवे प्रथमाङ्कस्य प्रारम्भे एतादृशोऽर्थोपक्षेपकः परिलक्ष्यते। तत्र कामन्दक्यवलोकिताभ्यां भूरिवसुप्रभृतीनां भाविभूमिकानां समस्ताङ्कसंक्षिप्तवृत्तान्तसमूहस्य प्रसङ्गतः सूचनादत्र अङ्कमुखमिति। प्रसङ्गतो मालतीमाधवस्य केषुचित् संस्करणेषु अस्य विष्कम्भकाख्या दृश्यते। रूपगोस्वामिनो ललितमाधवे प्रथमाङ्कस्यादौ गार्गीपौर्णमास्योः कथोपकथनेन सकलानामङ्कानां मुख्यप्रतिपाद्यस्य

सूचनात्वादिदमपि अङ्कमुखम्।[२०]

धनञ्जयधनिकनिरूपितम् अङ्कास्यलक्षणमुदाहरणञ्च उद्धृत्य तत्रभवता विश्वनाथेनोक्तम् – एतच्च **''धनिकमतानुसारेणोक्तम्। अन्ये तु अङ्कावतारेणैवेदं गतार्थमित्याहुः।''** अथात् दशरूपके यदुदाहृतं तद्धनिकमते अङ्कास्यं किन्तु अन्यैरेतदङ्कावतारत्वेन गण्यते। तन्न, पूर्वाङ्कान्तर्गतघटनाया अविच्छिन्नत्वेनाप्रवर्तनात्। वस्तुतस्तु अङ्कास्यमेवेदम् तत्रोत्तशङ्के विच्छिन्नतया विषयान्तरस्य सूचनात्। साहित्यदर्पणे उल्लिखितधनञ्जयलक्षणे गृहीत**वा**शब्दो विकल्पार्थकः। अतो धनिकसम्मतलक्षणोल्लेखात् तदनिराकरणाच्च एतद्विकल्पलक्षणरूपेण ग्रहीतुं शक्यते इति अनुमीयते।

**अङ्कमुख्यस्य वैशिष्ठ्यम् –**

अस्य सम्यगालोचनेन कानिचित् वैशिष्ठ्यानि दृष्टिपथमायान्ति। तद्यथा-

क. अङ्कान्तपात्रैः पूर्वाङ्कस्य कथावस्तु छिद्यते परवर्तिनोऽङ्कस्य च सूचना प्रदीयते।

ख. प्रथमाङ्कस्यादावपि अङ्कमुखमवस्थातुं शक्यते। अत्र तु अखिलानामङ्कानां विषयवस्तु सूच्यते।

ग. बीजार्थस्यापि प्रकाशकं भवति अङ्कमुखम्।

**अङ्कावतारः –**

अङ्कस्यावतरणम् अङ्कावतारः। **''अङ्गभावेन अङ्कः अङ्कान्तरं अवतारयति अस्मिन्''** इति व्युत्पत्या अङ्काङ्गीभूतं किमपि घटनं यदा अङ्कान्तरस्य आविर्भावकारणं भवति तत्तदा अङ्कावतार इत्युच्यते। अत्र अङ्कान्ते उल्लिखितं घटनं परवर्तिनोऽङ्कस्योपजीव्यं भवति। अस्य लक्षणनिरूपणावसरे मुनिराह –

अङ्कान्त एव चाङ्को निपतति यस्मिन् प्रयोगमासाद्य।
बीजार्थयुक्तियुक्तो ज्ञेयो ह्यङ्कावतारोऽसौ।। १९.११५

धनञ्जयेनोक्तं –

अङ्कावतारस्त्वङ्कान्ते पातोऽङ्कस्याविभागतः।। १.६२

अर्थात् पूर्वाङ्कस्य अवसानोक्तकथाविच्छेदपूर्वकं भाविनोऽङ्कस्य यः प्रवेशः स अङ्कावतारः। अस्य व्याख्याने धनिकेनोक्तम – **''यत्र प्रविष्टपात्रेण सूचितमेव पूर्वाङ्काविच्छिन्नार्थतया एव अङ्कान्तरमापतति प्रवेशकविष्कम्भकादिशून्यं सोऽङ्कावतारः।''** अतएव धनिकमते अङ्कावतारः प्रवेशकविष्कम्भकादिरहितो भवति। आदिपदेन चूलिकाया ग्रहणमिति मन्यते।

विश्वनाथः सुस्पष्टतया लक्षयति यथा –

अङ्कान्ते सूचितः पात्रैस्तदङ्कस्याविभागतः।
यत्राङ्कोऽवतरत्येषोऽङ्कावतार इति स्मृतः।। (६.५८)।।

तत्सर्वं पर्यालोच्य अङ्कावतारस्य कानिचिद्वैशिष्ठानि वक्तुं शक्यन्ते यत् –

क. पूर्वाङ्कान्ते एव उत्तराङ्कस्य वस्तु सूच्यते।

ख. पूर्वाङ्कान्तर्गतेन घटनाप्रवाहेणैव परवर्तिनोऽङ्कस्य सूचना भवति।

ग. उत्तराङ्कस्य किमपि पात्रं न सूच्यते, यतः पूर्वाङ्कान्तान्तर्गतैरेव पात्रैरुत्तराङ्क आरभ्यते।

घ. उत्तराङ्कादौ प्रवेशकविष्कम्भकादीनां प्रयोगो न भवति।

उदारुरणं यथा - शाकुन्तले षष्ठाङ्कस्यान्ते असुरवधाय दुष्मन्तमाह्वातुं मातलिरिन्द्रेण प्रेरितः। ततः स आगत्य विषण्णहृदयं राजानं दृष्ट्वा सुकौशलेन तमुद्बोध्य तस्मै इन्द्रसन्देशं निवेदयामास। कृतसङ्कल्पो दुष्मन्तोऽपि राजकार्यममात्यपिशुने समर्प्य अमरावतीं प्रति गन्तुमुद्यतो बभूव।

